तस्य-दुर्योधनस्य, **हर्षं**-प्रीतिं **सञ्जनयन्**, **प्रतापवान्**-तेजोविशेषवान्, **कुरुवृद्धः**-कुरूणां ज्येष्ठः, पण्डितो वा, । 'बृधबृद्धौ पण्डितेऽपि'

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

(अमरकोषः ३.१००) इत्यभिधानात्। पितामहः, भीष्मः उच्चैः अत्यन्तं सिंहनादं विनद्य संनद्य, विधाय इत्यर्थः। शंखं दध्मौ पूरयामास ॥१२॥

यतः एवम् –

ततश्शंखाश्च भेर्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ॥

ततः-सेनानायकभीष्मकृतसिंहनादशंखध्मानानन्तरं, कौरवसैन्यैः इति अध्याहारः। शंखाश्च भेर्यश्च पणवानकगोमुखाश्च- पणवध्वनिविधायक सूक्ष्ममृदङ्गविशेषाः। आनकाः-स्थूलवाद्यविशेषाः। गोमुखाः-सङ्गीतानुसारिमर्दलविशेषाः। 'सर्वो द्वन्द्वो विभाषया एकवद्भवति' इति तूर्याङ्गेष्वेकवद्भावो नास्ति। सहसैव शीघ्रमेव, अभ्यहन्यन्त-ताडिताः। स च शंखादिजन्यः शब्दः तुमुलः-सङ्कुलः अभवत् ॥ १३ ॥

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ।
माधवः पाण्डवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥ १४ ॥

ततः-युद्धोत्सवार्थं कृतकौरववाद्यध्वन्यनन्तरं, श्वेतैर्हयैः युक्ते योजिते, महति स्यन्दने-रथे, स्थितौ माधवः मधोर्गोत्रापत्यं श्रीकृष्णः। तदुक्तं भारते–

तेषां ज्येष्ठो वीतिहोत्रो वृष्णः पुत्रो मधोस्ततः।
तस्य पुत्रशतं त्वासीत् वृष्णिज्येष्ठं यतः कुलम् ॥

1. यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः।
मया दत्तः स धर्मात्मा तेन चासौ वृकोदरः ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

माधवा वृष्णयो राजन् यादवाश्चेति संज्ञिता: ।। इति ।

पाण्डवः अर्जुनश्चैव, दिव्यौ शंखौ प्रदध्मतुः ।। १४ ।।

तदेव विभज्य कथयति–

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।

पौण्ड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ।। १५ ।।

हृषीकाणां-इन्द्रियाणां, ईशो, **हृषीकेशः**-श्रीकृष्णः[1] **पाञ्चजन्यो** पञ्चजनाख्ये रक्षसि भवः पाञ्चजन्यः शंखः-तं **दध्मौ धनञ्जयः** अर्जुनः **देवदत्तं** नाम शंखं **दध्मौ** । भीमं-भयानकं कर्म यस्य सः **भीमकर्मा**[2] **वृकोदरः** भीमः **पौण्ड्रं** नाम **शंखं दध्मौ** ।। १५ ।।

किञ्च –

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।

नकुलस्सहदेवश्च सुघोषमणिपुष्पकौ ।। १६ ।।

कुन्तीपुत्रो राजा युधिष्ठिरः 'गवियुधिभ्यां स्थिरपः' (पा.सू.८.३.९५) इति 'षत्वम्', **अनन्तविजयं** नाम शंखं दध्मौ । **नकुलः सहदेवश्च सुघोषमणिपुष्पकौ** नाम शंखौ प्रदध्मतुः प्रकर्षेण पूरयामासतुः ।। १६ ।।

---

1. दैत्यः पञ्चजनो महान् ।
अन्तर्जलचरः कृष्ण शङ्खरूपधरोऽसुरः ।। .... तच्छ्रुत्वा सत्वरं प्रभुः।
जलं प्रविश्य तं हत्वा ....
तदङ्गप्रभवं शङ्खम् आदाय रथमागमत् ।।'' (श्रीमद्भागवतम्-१०-४६-४०-४१)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किञ्च –

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥

परमः-श्रेष्ठः **इष्वासः**-धनुः, यस्य स **परमेष्वासः** । **काश्यः** काशिराजः, महारथश्शिखण्डी च, धृष्टद्युम्नश्च, विराटश्च, क्रमात् पराजितो रणे भग्नो न भवतीति **अपराजितः** सात्यकिश्च, ते पृथक् शंखान्, दध्मुः इत्युत्तरेणान्वयः ॥ १७ ॥

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुश्शंखान् दध्मुः पृथक्पृथक् ॥ १८ ॥

हे **पृथिवीपते**-धृतराष्ट्र । **द्रुपदश्च, द्रौपदेयाश्च महाबाहुः सौभद्रः**- सुभद्रायां अपत्यं अभिमन्युः **सर्वशः**-उक्ता अनुक्ताश्च योधाग्रेसराः **शंखान्** **पृथक् पृथक्, दध्मुः** ॥ १८ ॥

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥

नभःपृथिवीं च व्यनुनादयन्-प्रतिध्वनिभिरापूरयन्, **तुमुलः**- स : **सः** प्रसिद्धः, **घोषः**-कृष्णार्जुनादीनां शंखनादः **धार्तराष्ट्राणां** धृतराष्ट्रसम्बन्धिनां त्वदीयानाम् इत्यर्थः । **हृदयानि** मनांसि, **व्यदारयत्**- बिभेद ॥ १९ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

'अथ' इत्यादिश्लोकचतुष्टयम् एकं वाक्यम् ।

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥ २० ॥

हृषीकेशं तदा वाक्यमिदमाह महीपते ।

हे महीपते-धृतराष्ट्र, अथ-उभयसैन्यकृतशंखनादानन्तरं, शस्त्रसम्पाते-शस्त्राणां सम्यक्पतने शस्त्रप्रयोग इत्यर्थः । प्रवृत्ते सति, कपिध्वजः कपिः हनूमान् ध्वजे यस्य सः पाण्डवः-अर्जुनः व्यवस्थितान्-युद्धोद्योगेन स्थितान्, धार्तराष्ट्रान्, दृष्ट्वा, धनु : उद्यम्य-सज्जीकृत्य, तदा हृषीकेशं-श्रीकृष्णं, इदं-वक्ष्यमाणं वाक्यं आह ॥ २० ॥

अर्जुन उवाच–

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥
यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ २२ ॥

हे अच्युत, अस्मिन् रणसमुद्यमे-युद्धोपक्रमे, कैः सह मया योद्धव्यं-युद्धं कर्तव्यम् अतः योद्धुकामान् अवस्थितान् एतान्-धार्तराष्ट्रान्, यावन्निरीक्षे, तावत्, उभयोः सेनयोः मध्ये मे रथं स्थापय इति अर्जुनः प्राहेति सम्बन्धः ॥ २२ ॥

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे प्रियचिकीर्षवः ॥ २३ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ये **दुर्बुद्धेः धार्तराष्ट्रस्य**-धृतराष्ट्रपुत्रस्य दुर्योधनस्य, ऋष्यन्धक 'वृष्णिकुरुभ्यश्च' (पा.सू. ४.१.११४) इति 'अण्' प्रत्ययः।

युद्धे प्रियचिकीर्षवः-प्रियं कर्तुमिच्छन्तः **एते अत्र**-इह, **समागताः**, **अहं योत्स्यमानान्**-युद्धं करिष्यमाणान्, एतानिति शेषः, **अवेक्षे**-पश्यामि। अत उभयसेनामध्ये रथं स्थापय इत्यर्थः ॥ २३ ॥

ततः किं जातम् इत्याकाङ्क्षायाम् –

सञ्जय उवाच–

एवमुक्तो हृषीकेशो गुडाकेशेन भारत।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥

हे **भारत**-भरतवंशोद्भव धृतराष्ट्र ! गुडाका निद्रा, तस्याः ईशेन - नियामकेन **गुडाकेशेन**-जितेन्द्रियेण अर्जुनेनेत्यर्थः। **एवं**-पूर्वोक्तप्रकारेण-**उक्तः**सन्, **हृषीकेशः** उभयोः सेनयोः मध्ये **रथोत्तमं**-श्रेष्ठरथं **स्थापयित्वा** पार्थम् उवाच इत्युत्तरेणान्वयः ॥ २४ ॥

भीष्मद्रोणप्रमुखतस्सर्वेषां च महीक्षिताम्।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥ २५ ॥

भीष्मद्रोणप्रमुखतः भीष्मश्च द्रोणश्च तयोः प्रमुखतः-पुरतः **सर्वेषां** महीं क्षियन्ते-पालनेन निवासयन्तीति **महीक्षितः**-राजानः, **तेषां** पुरतश्च, **रथोत्तमं** स्थापयित्वा इति पूर्वेणान्वयः। पृथायाः कुन्त्या अपत्यं पार्थः। तस्य सम्बुद्धिः हे **पार्थ, समवेतान्**-युद्धार्थं सङ्गतान्, **एतान् कुरून्**-**कुरुवंश्यान्** पश्य इति अर्जुनम् उवाच इति योजना ॥ २५ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्रापश्यत्स्थितान् पार्थः पितॄनथ पितामहान्।
आचार्यान्मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखींस्तथा ॥
श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि ॥ २६ ॥

अथ कृष्णवाक्यश्रवणानन्तरं पार्थः तत्र कुरुसेनायां स्थितान् पितॄन्-पितृव्यान् भूरिश्रवःप्रमुखान्, पितामहान्-भीष्मादीन् आचार्यान्-द्रोणादीन् मातुलान्-शल्यादीन् भ्रातॄन्-सुयोधनादीन् पुत्रान् दुर्योधनादिनां पुत्रान् लक्ष्मणादीन्, पौत्रान्-तत्पुत्रान्, सखीन्-मित्राणि कृतवर्मादीन्, श्वशुरान् सुहृदः-कृतोपकारांश्च, अपश्यत्, अपि च, उभयोः एतादृशानेव अपश्यत् इति योजना ॥ २६ ॥

तान् समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ।
कृपया परयाविष्टो विषीदन् इदमब्रवीत् ॥ २७ ॥

कौन्तेयः-पार्थः अवस्थितान्-वर्तमानान् तान्-पूर्वोक्तान् सर्वान् बन्धून् समीक्ष्य सम्यग्दृष्ट्वा परया उत्कृष्टया कृपया आविष्टो - व्याप्तः विषीदन्-शोचन् इदं वक्ष्यमाणं वचनं अब्रवीत् ॥ २७ ॥
इत ऊर्ध्वम् अध्यायसमाप्तिपर्यन्तम् अर्जुन उवाच–

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्[1] ।
सीदन्ति मम गात्राणि मुखं च परिशुष्यति[2] ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २८ ॥

1. युयुत्सुं समुपस्थितं इमं पुरस्थं स्वजनं पितृपुत्रादिकं दृष्ट्वा - मदीया इति ज्ञात्वा (ता).

2. श्रमादिनिमित्तशोषापेक्षया अतिशयकथनाय सर्वतोभाववाचि ''परि'' शब्दप्रयोगः(गू).

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे कृष्ण समुपस्थितं-प्राप्तं युयुत्सुं योद्धुमिच्छन्तं इमं स्वजनं-बन्धुजनं दृष्ट्वा वर्तमानस्य मम गात्राणि-अवयवाः सीदन्ति-विशीर्यन्ते। किं च, मे मुखं च परिशुष्यति-शुष्कीभवति मे-मम शरीरे वेपथुः- कम्पश्च जायते। रोमहर्षः-रोमोद्गमश्च जायते ॥ २८ ॥

गाण्डीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ २९ ॥

मे गाण्डीवं नाम धनुः हस्तात् स्रंसते-च्यवते। किं च, त्वक् चर्म लक्षणया तु शरीरं परिदह्यते-सर्वतः परितप्यते। किं च मे मनः-अन्तःकरणं, भ्रमति-चलतीव स्थितम्, अत एव (रथे) अवस्थातुं न शक्नोमि[1] ॥ २९ ॥

निमित्तानि च पश्यामि विपरीतानि केशव।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३० ॥

प्रशस्ताः केशा अस्य सन्तीति केशवः केशोद्वोऽतरस्याम् (पा.सू.५.२-१०९) इति 'व'प्रत्ययः हे केशव अहं, विपरीतानि अनर्थसूचकानि निमित्तानि शकुनानि पश्यामि अपि च आहवे-युद्धे स्वजनं हत्वा अनु-अनन्तरं, श्रेयः-शुभं न पश्यामि ॥ ३० ॥

विजयादिकं शुभं किं न पश्यसि इत्याकाङ्क्षायाम् आह–

---

1. गाण्डीवभ्रंशेन अधैर्यलक्षणं दौर्बल्यम् त्वक्परिदाहेन च अन्तः सन्तापः। अवस्थातुं शरीरं धारयितुं न शक्नोमि इत्यनेन मूर्च्छा सूच्यते। तत्र हेतुः "मम मनः भ्रमतीव" इति। भ्रमणकर्तृसादृश्यं नाम मनसः कश्चित् विकारविशेषः मूर्च्छायाः पूर्वावस्था। चः हेतौ ॥ यत एवम् अतः नावस्थातुं शक्नोमि (गू).

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥ ३१ ॥

हे कृष्ण अहं विजयं न काङ्क्षे। राज्ञो भावः कर्म वा राज्यं च सुखानि च न काङ्क्षे-न कामये गां भुवं गाः धेनूर्वा विन्दतीति गोविन्दः। हे गोविन्द राज्येन नः-अस्माकं, किं प्रयोजनम् भोगैः सुखैः क़िम्, जीवितेन वा किम्[1] ॥ ३१ ॥

येषामर्थे काङ्क्षितं नो राज्यं भोगास्सुखानि च।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३२ ॥

येषां-आचार्यादीनां अर्थे-प्रयोजननिमित्तम्, आचार्यादीनां संरक्षणार्थं राज्यनिर्वाह इति नः-अस्माकं, राज्यं च भोगाः स्रक्चन्दनादयश्च सुखानि च काङ्क्षितम् अपेक्षितं, त इमे-एते, प्राणांश्च धनानि च[2] त्यक्त्वा - त्यागमङ्गीकृत्य युद्धे -युद्धार्थं अवस्थिताः वर्तमानास्सन्तः दृश्यन्ते। अतो राज्यसुखादिभिः किमर्थमिति पूर्वेणान्वयः ॥ ३२ ॥

युद्धार्थं स्थितास्ते के इत्याकाङ्क्षायाम् आह –

अचार्याः पितरः पुत्रास्तथैव च पितामहाः।
मातुराः श्वशुराः पौत्राः स्यालास्सम्बन्धिनस्तथा ॥ ३३ ॥

स्पष्टोऽर्थः।

---

1. स्वजनहिंसया प्राप्तेन राज्येन किं फलम् ? तन्मूलकैः भोगैर्वा किम् ? तदर्थकेन जीवितेन वा किम् ? अधर्मक़म् एतत्सर्वं सतां नाशास्यम् इत्यर्थः (ता).
2. प्राणधनशब्दौ तु तदाशालक्षकौ (गू).

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यदि भवानेतान्न हन्ति राज्यकामा एते पश्चात् त्वां हनिष्यन्ति इति। आकाङ्क्षायाम् आह–

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते।
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन॥ ३४॥

मधुनामकं राक्षसं सूदयतीति मधुसूदनः। हे **मधुसूदन घ्नतोऽपि**-अस्मान् हिंसतोऽपि **एतान्** धार्तराष्ट्रान् **त्रैलोक्यराज्यस्यापि** त्रय एव लोकाः त्रैलोक्यं, स्वार्थे ष्यञ्। तस्य राज्यस्यापि हेतोः **हन्तुं नेच्छामि। महीकृते**-केवलभूप्राप्तये **किं नु**-किं पुनः किमु वक्तव्यम् इत्यर्थः। जनान् अर्दयति - सुखयतीति जनार्दनः। यद्वा-जनान् अर्दयति सङ्कर्षणरूपेणेति वा जनार्दनः। हे **जनार्दन, धार्तराष्ट्रान् निहत्य, नः** अस्माकं **का प्रीतिः स्यात्**। प्रीतिर्न भवेदेव इत्यर्थः॥ ३४॥

क्रूरकर्माणः धार्तराष्ट्राः हन्तव्या एवेत्यत्राह –

पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः।
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान्
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव॥ ३५॥

हे **माधव,** आततायिनोऽपि अग्निदप्रभृतीनपि, तदाह आपस्तम्बः:-

अग्निदो गरदश्चैव शस्त्रपाती धनापहः।
क्षेत्रदारापहर्ता च षडेते ह्याततायिनः॥ इति॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतान् हत्वा अस्मान् पापमेवाश्रयेत् प्राप्नुयादित्यर्थः । अयं भावः- यद्यपि,

आततायिनमायान्तं हन्यादेवाविचारयन् ।
नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥ '

इति वचनात् आततायिवधो युक्त एव । तथापि तस्यार्थशास्त्रत्वात् धर्मशास्त्रात् दुर्बलं भवति । यथोक्तं **याज्ञवल्क्येन** –

स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः ।
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः ॥ इति ॥

(याज्ञवल्क्यस्मृतिः-व्यवहाराध्यायः २१)

तस्मात् आततायिनामपि एतेषाम् आचार्यादीनां वधे अस्माकं पापमेव भवेत्। अन्यायत्वात् । एतद्वधात् इह परत्र च सुखलेशोऽपि नास्तीत्याह - **स्वजनं**-बन्धुजनं, **हत्वा**, **कथं**-केन प्रकारेण **सुखिनः स्याम**-भवेम-न सुखिन एव इत्यर्थः । तस्मात्कारणद्वयम् । सबन्धवान् सम्बन्धिसहितान् धार्तराष्ट्रान् हन्तुं,न अर्हाः न योग्याः ॥ ३५ ॥

एते स्वजनहननदोषम् अनादृत्य यथा युद्धोद्युक्ता तथा त्वया शोकं परित्यज्य योद्धव्यम् इत्याशङ्क्य आह-यद्यप्यादि श्लोकद्वयेन–

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रदोहे च पातकम् ॥ ३६ ॥

यद्यपि लोभेन-राज्यलोभेन, **उपहतं**-नष्टविवेकं **चेतो** येषां ते **लोभोपहतचेतसः एते**-दुर्योधनादयः **कुलक्षयकृतं** कुलस्य-वंशस्य,

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्षयो-नाशः, तन्निमित्तकृतदोषं पापं च मित्रद्रोहे, मित्राणां द्रोहनिमित्तं पातकं च, न पश्यन्ति ॥ ३६ ॥

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३७ ॥

तथापि-हे जनार्दन, कुलक्षयकृतं दोषं प्रपश्यद्भिः विचारयद्भिः अस्माभिः, अस्मात् पापात् निवर्तितुं कथं न ज्ञेयम्, । अतो युद्धनिवृत्तौ एव बुद्धिः कर्तव्येत्यर्थः ॥ ३७ ॥

तद्दोषं स्पष्टयति–

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ३८ ॥

कुलक्षये-नाशे सनातनाः-शाश्वताः प्रवाहरुपेणागता इति यावत्, कुलधर्माः-वंशाचाराः प्रणश्यन्ति प्रणष्टा भवन्ति । धर्मे नष्टे सति कृत्स्नं उत - शिष्टं समस्तमपि कुलं, अधर्मः, अभिभवति-व्याप्नोति तिरस्करोति ॥ ३८ ॥

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥ ३९ ॥

दैत्यान् कर्षयतीति वा कृष्णः । कृष्णवर्णत्वाद्वा कृष्णः । 'कृषेर्वर्णे' (उणादिप्रकरणम् २८४) इति 'ण' प्रत्ययः । हे कृष्ण, अधर्माभिभवात् हेतोः कुलस्त्रियः प्रदुष्यन्ति - दुष्टा भवन्ति । वृष्णेर्गोत्रापत्यं पुमान्

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वार्ष्णेयः। हे वार्ष्णेय, स्त्रीषु दुष्टासु-स्वाचारभ्रष्टासु सतीषु वर्णसङ्करः वर्णानां ब्राह्मणादीनां सम्यक् कीर्यते-अन्योन्यं संश्लिष्यत इति सङ्करः जायते भवति ॥ ३९ ॥

एवं च सति–

सङ्करो नरकायैव कुलघ्नानां कुलस्य च।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४० ॥

सङ्करः वर्णसङ्करः कुलघ्नानां कुलं घ्नन्तीति कुलघ्नाः तेषां च, कुलस्य च, नरकायैव भवतीति शेषः। हि यस्मात् एषां सङ्कीर्णकुलानां कुलघ्नानां च, पितरः लुप्तपिण्डोदकक्रियाः सन्तः, लुप्ता हीनाः पिण्डानाम् उदकानां च, क्रियाः, कार्याणि येषां ते, पतन्ति-अधः पतन्ति ॥४०॥

उक्तदोषमुपसंहरति श्लोकद्वयेन —

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४१ ॥

एतैः वर्णसङ्करकारकैः कुलघ्नानां दोषैः शाश्वताः-परम्पराप्राप्ताः जातिधर्माः-वर्णधर्माः। आश्रमधर्मा अपि 'च' कारात् गृह्यन्ते। उत्साद्यन्ते-लुप्यन्ते ॥ ४१ ॥

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४२ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे **जनार्दन उत्सन्नकुलधर्माणां** उत्सन्नाः-लुप्ताः, कुलधर्माः-कुलाचाराः येषां तेषां, जातिधर्मादीनामप्युपलक्षणम् । **मनुष्याणां नरके नियतं**-नित्यं **वासः**-निवासः **भवति** इति **अनुशुश्रुम** वयं श्रुतवन्तः, उत्तमपुरुषबहुवचनम् ।

'प्रायश्चित्तमकुर्वाणाः पापे च निरतानराः ।
अपश्चात्तापिनः कष्टा निरयान् यान्ति दारुणान् ॥'इत्यादिवचनेभ्यः ॥४२॥

बन्धुवधाध्यवसायेन सन्तप्यमान : आह –

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४३ ॥

वयं राज्यलोभेन-राज्यविषयसुखे लोभः-धनाद्यागमे बहुधा जायमानेऽपि पुनः पुनर्वर्धमानोऽभिलाषः तेन हेतुना **स्वजनं हन्तुमुद्यता** इति यत्, एतत् **महत्पापं, कर्तुं, व्यवसिताः** अध्यवसायं कृतवन्तः, **अहो**-आश्चर्यम् । **बत** कष्टम् इत्यर्थः ॥ ४३ ॥

एवं सन्तप्तः सन् तत्कृता त्मवधम् अङ्गीकुर्वन्नाह –

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युः तन्मे क्षेमतरं भवेत् ॥ ४४ ॥

शस्त्रपाणयो धार्तराष्ट्राः **अशस्त्रं** शस्त्रवर्जितं **अप्रतीकारं**[1]-अकृतप्रतिक्रियम् 'उपसर्गस्य घञि अमनुष्ये बहुलम्' (पा.सू. ६.३.१२२)

1. अप्रतीकारम्-प्रयुक्तास्त्रेषु प्रत्यस्त्रप्रयोगः प्रतीकारःतद्रहितम् (त्र).

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इति दीर्घः । तूष्णीमुपविष्टमिति यावत् । मां हन्युः यदि हनिष्यन्ति, तत् हननं तु, मे-मम क्षेमतरं-अत्यन्तं हितं भवेत् पापानिष्पत्तेः इति भावः ॥ ४४ ॥

ततः किं कृतवान् इत्यत्र सञ्जय उवाच –

एवमुक्त्वा अर्जुनस्संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४५ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमोऽध्यायः ।

हे भारत अर्जुनः एवं उक्तप्रकारेण उक्त्वा[1] शोकसंविग्नमानसः शोकेन संविग्नं-प्रकम्पितं मानसं चित्तं यस्य सः । सशरं-शरैस्सहितं, चापं विसृज्य, संख्ये युद्धे, रथोपस्थे-रथोपरि उपाविशत्- उपविष्टः ॥ ४५ ॥

इति श्रीमत्परमहंस-परिव्राजकाचार्यब्रह्मानन्दसरस्वती-
स्वामिशिष्य रामचन्द्रानन्दसरस्वतीविरचितायां श्रीभगवद्गीताव्याख्यायां
पदयोजनासमाख्यायां अर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥

1. "धार्तराष्ट्रं रणे हन्युः तन्मे क्षमतरं भवेत्" इति एवं प्रकारं वचनम् उक्तवा (ता).

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ द्वितीयोऽध्यायः ॥

ततः किं जातम् इत्याशङ्कायां **सञ्जय उवाच –**

तं तथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

[1]कृपया आविष्टं प्राप्तं संयुक्तम् इति यावत्, **अश्रुपूर्णाकुलेक्षणम्** - अश्रुभिः-बाष्पैः पूर्णे आकुले व्याकुले ईक्षणे-नेत्रे यस्य तम् । **तथा** उक्तप्रकारेण, **विषीदन्तं**[2] शोचन्तं, तं अर्जुनं प्रति **मधुसूदनः इदं** वक्ष्यमाणं **वाक्यं, उवाच** ॥ १ ॥

श्रीभगवानुवाच–

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।[3]
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥

हे अर्जुन कुतः-कस्माद्धेतोः **त्वा**-त्वां, **विषमे** सङ्कटे **इदं कश्मलं** मोह **उपस्थितं** प्राप्तं आर्यैर्जुष्टं सेवितं न भवतीति **अनार्यजुष्टम्** । स्वर्गे साधु न भवतीति **अस्वर्ग्यं** । स्वर्गसाधन कर्मवाह्यम् इत्यर्थः **अकीर्तिकरं** च ॥ २ ॥

---

1. कृपा-"मम एते" इति व्यामोहनिमि -त्तः स्नेहविशेषः (ग).
2. स्नेहविषयीभूतस्वजनविच्छेदाशङ्कानिमित्तचित्तव्याकुलीभावः विषादः तं प्राप्नुवन्तम् (ग).
3. शोकापरपर्यायः विषमशब्द : असदृशवचनः प्रकृतमोहोत्पत्त्य सदृशदेशकालपरः सन् अस्थानवाची भवति । अत्र च ईदृशे युद्धरङ्गे सन्नद्धेषु शत्रुषु पुरतः स्थितेषु "न योत्स्यामि". इति धीः नोत्पत्तुमर्हति इति अतः अयम् अस्थाने मोहः (त्र).

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥

हे **पार्थ क्लैब्यं** कातर्यं **मा स्म गमः** न प्राप्नुहि । **त्वयि एतत्** कार्यं **नोपपद्यते**-योग्यं न भवति । परान् शत्रून् तापयति इति परन्तपः । 'द्विषत्परयोस्तापेः' (पा.सू. ३.२.३९) इति 'खच्' प्रत्ययः । हे **परन्तप क्षुद्रं** तुच्छं, **हृदयदौर्बल्यं**-मनोदुर्बलत्वं अधैर्यं **त्यक्त्वा उत्तिष्ठ** उत्थाय युध्यस्व इत्यर्थः ॥ ३ ॥

'नाहमधैर्येण युद्धात् निवृत्तोऽस्मि । किन्तु अस्मिन् युद्धे महदपराधसम्भवात्' इति अर्जुन उवाच-

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

हे **अरिसूदन पूजार्हौ**-योग्यौ **भीष्मं** प्रति **द्रोणं** प्रति **च संख्ये**-युद्धे-**इषुभिः**-शरैः **अहं कथं प्रतियोत्स्यामि** यत्र वाचापि योत्स्यामि इति वक्तुम् अनुचितं तत्र बाणैः कथं योत्स्यामि इत्याशयः ॥ ४ ॥

एवं चेत्तव जीविका कथं भवति इत्याशङ्क्याह -

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्षमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिर प्रदिग्धान् ॥ ५ ॥

महानुभावान्-महाप्रभावान् **गुरून्**-द्रोणाचार्यादीन् **अहत्वा**-वधमकृत्वा, **इह लोके भैक्षं** - भिक्षाणां समूहः, 'भिक्षादिभ्योऽण' (पा.सू.

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४.२.३८), भिक्षान्नमपि भोक्तुं श्रेयः-वरम् । गुरुद्रोहात् इहामुत्र च दुःखमेव अनुभूयत इत्याह-हत्वेति । **अर्थकामान्**, अर्थान् कामयन्त इत्यर्थकामाः तान् । अर्थकामत्वादेव दुर्योधनमुपजीवन्ति । तथाच युधिष्ठिरं प्रति भीष्मेणोक्तम्-

अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ।
इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः ॥'' इति ॥

(भीष्मपर्वः - ४३-४१)

गुरून् - हत्वा तु, **इहैव रुधिरप्रदिग्धान्** रुधिरेण रक्तेन **प्रदिग्धान्**-प्रकर्षेण लिप्तान् **भोगान् भुञ्जीय**-अश्नीय । अयं भावः-कथंतरां भोगेष्वत्यासक्तान् तान् हत्वा, तैः भुज्यमानान् तानेव भोगान् तद्रुधिरेणावसिच्य तेषु आसनेषु उपविश्य भुञ्जीयेति ॥ ५ ॥

गुरुद्रोहमङ्गीकृत्य युद्धे क्रियमाणे सति विजयापजयौ न बुध्येते इत्याह –

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषाम-स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

यत्-यस्मात्कारणात् वयं धार्तराष्ट्रानिति शेषः । **जयेम**-जेष्यामो वा, **यदि वा**, धार्तराष्ट्राः **नः**-अस्मान् **जयेयुः**-जेष्यन्ति इत्येतयोर्मध्ये **नः**-अस्माकं **कतरत्**-किं नाम **गरीयः**-गुरुतरं भविष्यति, इत्येतद्वयं, **न विद्मः** न जानीमः । अपि च विचार्यमाणे जयोऽप्यपजय इत्याह **यानेवेति** । **यान्** धार्तराष्ट्रान् **हत्वा न जिजीविषामः**- जीवितुं नेच्छामः **त एव**-एत एव **प्रमुखे**-अभिमुखे, **अवस्थिताः** वर्तमानाः ॥ ६ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अतः

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वा धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥

कार्पण्यदोषोपहतस्वभावः, कृपणस्येदं कार्पण्यम्[1] 'एतान् हत्वा कथं जीविष्यामि' इत्येतद्रूपम् । **दोषश्च** स्वकुलक्षयकृतः ताभ्यां **उपहतः**- अभिभूतः **स्वभावः** शौर्यलक्षणं यस्य सः अहम्, **धर्मसम्मूढचेताः** । 'धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः' (अमरकोषः ३.३.१३९) इत्यभिधानात् धर्मो न्यायः तस्मिन् **सम्मूढं**-अनभिज्ञं चेतो यस्य सः । युद्धं त्यक्त्वा भिक्षाटनं क्षत्रियस्य धर्मो वा अधर्मो वेति सन्दिग्धचित्तस्सन् इत्यर्थः । **त्वा** - त्वां **पृच्छामि** । अतो **मे यत् निश्चितं श्रेयो**[2] युक्तं **स्यात् तत् ब्रूहि** वद किं च **ते**-तव, **अहं शिष्यः**-शासनार्हः अतः **त्वां प्रपन्नं**-शरणागतं **मां शाधि**-शिक्षय ॥ ७ ॥

एतद्वधोद्योगजनितशोकापनोदनोपायः त्वयैव विचार्यताम् इत्यत्राह—

नहि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

यत्-कर्म **इन्द्रियाणां उच्छोषणं**-अत्यन्तशोषणकरं **मम शोकं अपनुद्यात्**-अपनयेत् तत्कर्म अहं **भूमौ**, **असपत्नं**-निष्कण्टकं **ऋद्धं राज्यं**

1. यो वा एतदक्षरं गार्गि अविदित्वा अस्मात् लोकात् प्रैति, स कृपणः । (बृ.उ.३.८.१०) इति श्रुतेः। तस्य भावः कार्पण्यम् अनात्माध्यासवत्त्वम् (गू).
2. यत् निश्चितम् एकान्तिकम् आत्यन्तिकं च श्रेयः परमपुरुषार्थभूतं फलं स्यात् तत् मे ब्रूहि (गू).

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

च तथा सुराणां-देवानां अधिपतेर्भावः आधिपत्यं-इन्द्रत्वं च अवाप्य प्राप्यापि सन् न प्रपश्यामि-न जानामीत्यर्थः ॥ ८ ॥

इत्युक्तवता अर्जुनेन किं कृतम् इति आकाङ्क्षायां सञ्जय उवाच –

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥

परन्तपः-शत्रुतापनः **गुडाकेशः**-अङ्गुष्ठतर्जन्यग्रसंयोगाद्वलयीकृतमध्यदेशं यत् तत्परिमाणाः केशा यस्य सः गुडाकेशः । 'अङ्गुष्ठतर्जनीयोगाद्या स्यादन्तर्गुडा च सा'[1] इत्यभिधानात् । अर्जुनः **हृषीकेशं** - श्रीकृष्णं **एवं** उक्तप्रकारेण **उक्त्वा** च **गोविन्दं** प्रति **न योत्स्ये**-युद्धं न करिष्यामि इति उक्त्वा च **तूष्णीं बभूव ह** ॥ ९ ॥

तदुपरि वृत्तान्तमाह –

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥

हे भारत-धृतराष्ट्र **उभयोः सेनयोः मध्ये विषीदन्तं**-शोचन्तं **तं**-अर्जुनं प्रति **हृषीकेशः प्रहसन्निव** - भक्त्या परिहासवाक्यं वदन्निव, **इदं** वक्ष्यमाणं **वचः**-वचनं **उवाच**[2] ॥ १० ॥

---

1. 'अङ्गुष्ठतर्जनीयोगो गुडानाम्नी तु मुद्रिका इति वचनात्' अङ्गुष्ठतर्जनीयोगः "गुडा" इत्युच्यते । तत्परिमाणाः अग्रकेशाः यस्य स गुडाकेशः (ता).
2. अपवर्गप्राप्तिसाधनं निष्ठाद्वयात्मकं गीताशास्त्रम् उवाच (टि) ।

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आत्मानात्मविवेकाभावात् एवं शोको भवतीति तद्विवेक प्रदर्शनार्थं 'अशोच्यान्' इत्यारभ्य 'सर्वधर्मान् परित्यज्य' इत्यन्तं शास्त्रम् उपदेष्टुम् इच्छन् श्रीभगवान् उवाच—

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः[1] ॥ १२ ॥

त्वं **अशोच्यान्**-शोचितुमयोग्यान् शोकस्याविषयभूतान्, भीष्मद्रोणादीन् बन्धून् इत्यर्थः **अन्वशोचः** 'मन्निमित्तमेते म्रियन्ते, अहं तैर्विनाभूतो राज्यसुखादिना किं करिष्यामि' इति अनुशोचितवानसि । किं च **प्रज्ञावादान्,** प्रज्ञा एषामस्तीति प्रज्ञावन्तः पण्डिताः । शाकपार्थिवादिवत् समासः । तेषां **वादान्** - शब्दांश्च 'कुतस्त्वा कश्मलम्' (भ.गी.२.२.) इत्यादिना मया बोधितोऽपि 'कथं भीष्ममहं संख्ये' (भ. गी. २.४.) इत्यादिकान् केवलं **भाषसे** न तु पण्डितोऽसि । यतः **पण्डिताः** ज्ञानिनः **गतासून्** - विगतप्राणान् मृतान् बन्धून् **अगतासून्** -

1. अत्र आद्यपादेन प्रथमाध्यायगतार्जुनोक्तानुवादः । द्वितीयपादेन तु ''कथं भीष्ममहं संख्ये'' (२.४) इत्यादिद्वितीयाध्यायगततदुक्तानुवादः । उत्तरार्धेन च ''तत्र को मोहः कः शोकः एकत्वमनुपश्यतः'' (ई.उ.७.) ''तरति शोकमात्मवित्'' (छा.उ.७.१.३) इत्यादिश्रुतिप्रसिद्धसर्वशोकमोहनिवर्तकभावस्य कृत्स्नगीताप्रतिपाद्यस्य अद्वितीयात्मत तत्त्वज्ञानस्य निर्देशः (त्र).

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जीवतश्च बन्धून् प्रति 'मयाहीना एते कथं जीविष्यन्ति'[1] 'इति नानुशोचन्ति ॥ ११ ॥

अशोच्यत्वे हेतुमाह–

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामस्सर्वे वयमतः परम् ॥[2]

यथा अहं सर्वेश्वरः इह लोके जातु-कदाचित् लीलाविग्रहस्याविर्भावे तिरोभावेऽपि न आसं इति तु नैव, अपि तु आसमेव, अनादित्वात् । त्वं च न नासीः-नाभूः इति, न अपि तु आसीरेव । इमे-दृश्यमानाः - जनाधिपाः-राजानः न आसन् इति न अपि तु आसन्नेव । मदंशत्वात्

1. ''अशोच्यान्'' आततायित्वेन अवश्यवध्यतया शोचतुमनर्हान् एव त्वम् अन्वशोचः ''दृष्ट्वा इमं स्वजनम्' (भ.गी.१.२८) इत्यादिना अनुशोचितवान् असि ।... विवेकी हि शोच्यान् अनुशोचति, त्वम् अशोच्यानुशोची मूढ इति दूषणगर्भोऽयम् अनुवादः। तत्र च ''कुतस्त्वा कश्मलम् इदं'' (भ.गी. २.२.) इत्यादिना प्रतिबोधितः हा ''मया अनुचितमाचरितम्'' इति स्वयं बुद्ध्या अवगन्तव्ये तद्विहाय प्रज्ञावतां बुद्धिमतां वादान् वचनानि ''कथं भीष्ममहं संख्ये' (भ.गी.२.४) इत्यादीनि भाषसे केवलम्, न तु वस्तुतः प्राज्ञोऽसि इति अयमपि दूषणगर्भोऽनुवादः । ''वादांश्च'' इति 'च'-कारेण प्रज्ञावादान् कुर्वन् प्राज्ञमर्यादयापि नावतिष्ठसे, यतः ''पृच्छामि त्वां धर्मसंमूढचेताः शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्'' (भ.गी.२.७) इति भाषसे, न च शिष्यमर्यादयापि तिष्ठसि, यतः ''न योत्स्यामि'' (भ.गी.२.९) इति पुनः स्वातन्त्र्येण भाषसे तथा च मौढ्यं प्राज्ञत्वं पुनः शिष्यत्वं स्वातन्त्र्यं चेति एतत् परस्परविरुद्धं त्वयि दृश्यते इति अपहासकारणोक्तिः (त्र).
2. को नाम शोचनीयः पदार्थः ? किम् आत्मा, किं वा देहः ? नाद्यः तस्य नित्यत्वेन मरणासंभवात् इति अभिप्रेत्य आत्मनित्यत्वं साधयति ''नत्वेवाहं'' इत्यादिषड्भिः (त्र).

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सर्वे वयं अतः- अस्माद्देहविनाशात् परं-उत्तरकालेऽपि, न भविष्यामो न-न स्याम इति न, स्थास्याम एव। त्रिष्वपि कालेषु आत्मस्वरूपेण नित्या इत्यर्थः। सर्वे वयम् इति देहभेदानुवृत्त्या बहुवचनम्, नात्मभेदाभिप्रायेण इति ज्ञेयम् ॥ १२ ॥

ननु सर्वज्ञस्य तव जननादिराहित्यं सत्यमेव। जीवानां तु जन्ममरणे प्रसिद्धे, तत्राह–

[1]देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिः धीरस्तत्र न मुह्यति ॥ १३ ॥

देहिनः-देहवत आत्मनः यथा-येन प्रकारेण अप्रयत्नेनेत्यर्थः। अस्मिन् देहे-स्थूलदेहे कुमारस्य भावः कौमारं कुमारावस्था, यूनो भावः यौवनं-यौवनावस्था, जरा-वृद्धता जीर्णावस्था। तदुक्तम् –

पञ्चसंवत्सरो बालः कुमारो द्वादशाब्दकः।
युवाब्दैः पञ्चविंशत्या वृद्धस्सप्ततिवार्षिकः ॥ इति ॥

एता अवस्थास्तु (स्व) स्थूल शरीरनिबन्धना एव न तु आत्मनः। पूर्वावस्थानाशेन अवस्थान्तरोत्पत्तावपि "स एव अहम्" इति प्रत्यभिज्ञानात्। तथैव एतद्देहनाशे लिङ्गशरीरनिबन्धना देहान्तरप्राप्तिरपि। न तु तावदात्मनो नाशः। जातमात्रस्य पूर्वसंस्कारेण स्तन्यपानादौ प्रवृत्तिदर्शनात्। अतो धीरः-प्राज्ञः तत्र-देहनाशोत्पत्तिविषये न मुह्यति-

1. देहस्यैव ते जन्ममरणे, न तु आत्मनः इति सदृष्टान्तम् उपपादयति "देहिनोऽस्मिन्" इति (ब्र).

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मोहं न प्राप्नति आत्मनः स्थिरत्वबुद्ध्या आत्मा नष्टः, पुष्ट इति न शोचति इत्यर्थः[1]॥ १३ ॥

ननु देहानुद्दिश्य न शोचामि, किन्तु देहवियोगादिदुःखमहं न सहे[2] इत्याकाङ्क्षायाम् आह–

[2]मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्याः तांस्तितिक्षस्व भारत ॥ (14)

हे **कौन्तेय, मात्रास्पर्शाः** मीयन्ते आभिः शब्दादय इति **मात्राः**- श्रोत्रादीनीन्द्रियाणि । तासां **स्पर्शाः**-श्रोत्रादिभिः स्पृश्यन्त इति **स्पर्शाः**- - शब्दादिविषयाः **शोतोष्णसुखदुःखदाः** शीतं च उष्णं च शीतोष्णे । ते च ते सुख दुःखेच ते ददतीति तथा भवन्ति ।[3] **आगमः**- संश्लेषश्च **अपायो** विश्लेषश्च तौ एषां स्त इति **आगमापायिनः**। अत एव **अनित्याः**- अस्थिरा भवन्ति । भरतस्य-शाकुन्तलेयस्य गोत्रापत्यं भारतः । हे **भारत,**

1. ''न जायते म्रियते वा विपश्चित्'' (क.उ. २.१८) ''जीवापेतं वा व शरीरं म्रियते न जीवो म्रियते'' (छा.उ.८.११.३) इति श्रुतिवाक्यैः अधिगतात्मतत्वः पण्डितः धीरः ''मत्वा धीरो न शोचति'' (क.उ.१.२.२२) इत्यादिश्रुतिप्रसिद्धः । स च धीरः तत्र देहनाशोत्पत्योः न मुह्यति,आत्मैव मृतो जातश्च इति न मोहमापद्यते इत्यर्थः. (व्र)
2. ननु गतानाम् अगतानां न शोचामि, किन्तु तद्वियोगादिदुःखभाजमात्मानमेव इति चेत् - तत्राह मात्रास्पर्शा इति (श्री).
लिङ्गशरीर विवेकाय आह - मात्रास्पर्शास्तु इति (ग्).
3. (शब्दादिविषयाः) अन्तःकरणस्यैव शीतोष्णादिद्वारा सुखदुःखदाः, न तु नित्यस्य विभोः आत्मनः । तस्य निर्गुणत्वात् निर्विकारत्वाच्च । न हि नित्यस्य अनित्यधर्माश्रयत्वं संभवति (गू).

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अतः तान् मात्रास्पर्शान् तितिक्षस्व सहस्व । संयोगवियोगयोः क्षणिकत्वात् धीरो भव इत्यर्थः[1] ॥ १४ ॥

तत्क्षमा किमर्थम् इति अत आह–

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

हे पुरुषर्षभ-पुरुषश्रेष्ठ एते-मात्रास्पर्शाः समे सुखदुःखे यस्य तं समदुःखसुखं[2] धीरं[3] धैर्यवन्तं, यं पुरुषं न व्यथयन्ति-न बाधन्ते, स पुरुषः अमृतत्वाय-अमृतभावाय मोक्षायेति यावत् । कल्पते-समर्थो भवति अर्हति इत्यर्थः ॥ १५ ॥

यत्त्वात्मनो नित्यत्वं देहस्य स्वाभाविकं नाशित्वं च अशोच्यत्व निमित्तमुक्तं तदुपपादयितुम् आरभते-

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥

असतः अविद्यमानस्य शीतोष्णादेः सकारणस्य देहस्य भावः- सद्भावः न विद्यते-नास्ति । सतश्च आत्मनः अभावः असद्भावः न विद्यते । तत्त्वदर्शिभिः-वस्तुयाथार्थ्यदर्शिभिः उभयोः-अनयोः सदसतोः अपि, अन्तः-

1. दुःखस्य आत्मनि मिथ्यात्वात् न तन्निमित्तकोऽपि आत्मनो शोकः युक्तः(व्र).
2. सुखं यथा शोककरं न भवति, तथा दुःखमपि, यथा च दुःखं हर्षकरं न भवति तथा सुखमपि इत्येवं सुखदुःखयोः साम्यम् (व्र).
3. दुःखादीनाम् आत्मनि मिथ्यात्वनिश्चयः धीः तद्वान् धीरः (व्र).

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

निर्णयः दृष्टः-ज्ञातः। देहस्य-अचिद्वस्तुनः, असत्त्वमेव स्वरूप, आत्मनः-चैतन्यस्य सत्त्वमेव स्वरूपमिति निर्णयो दृष्ट इत्यर्थः[1] ॥

आत्मनस्तु अविनाशित्वं कथम् अवगम्यत इति अत्राह–

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति॥ १७॥

येन-आत्मस्वरूपेण **इदं** - आगमापायधर्मकं देहादि ततं साक्षित्वेन व्याप्तम्, तत्तु[2]-आत्मस्वरूपं न विनष्टुं शीलम् अस्य अस्तीति अविनाशि, तत् जानीहि। तत्र हेतुं दर्शयति **कश्चित् अव्ययस्य**-शाश्वतस्य, **अस्य**-आत्मस्वरूपस्य **विनाशं कर्तुं नार्हति॥ १७॥**

आत्मतत्वमविनाशि, देहानां तु विनाशित्वं स्वाभाविकमित्याह –

[3]**अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।**
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥ १८॥

नित्यस्य-सर्वदैकरूपस्य, अत एव, **अनाशिनः**-नाशरहितस्य **अप्रमेयस्य**-प्रमाणाद्यगोचरस्य, **शरीरिणः** आत्मनः **इमे**-सुखदुः

1 असतः (निःस्वरूपस्य) उत्पत्तिः नाशोऽपि न विद्यते। सतः नाशः उत्पत्तिरपि न विद्यतो... तथा च सुखदुःखादेः प्रपञ्चस्य अत्यन्तासत्वे शशशृङ्गादेरिव तस्य उत्पत्तिः नाशश्च न घटते सत्वे तु आत्मवत् नाशः जन्म च न घटते, इति उत्पत्तिविनाश शीलस्य प्रपञ्चस्य सत्त्वेन असत्त्वेन च विचारासहत्वरूपं मिथ्यात्वं सिध्यति इत्यर्थः. (ब्र).

2. (तत्तु इत्यत्र) ''तु'' शब्दः असतो व्यावृत्यर्थः (भा).

3. नमु स्फुरणरूपस्य सतः कथम् अविनाशित्वम्? तस्य देहधर्मत्वात् देहस्य च, अनुक्षणविनाशात्, इति भूतचैतन्यवादिनः। तान् निराकुर्वन् 'नासतो विद्यते भावः' इत्येतत् विवृणोति अन्तवन्त इति (गू).

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

खादिधर्मका: देहा: 'दिह उपचये' इति धातो: उत्पन्नत्वेन उपचयरूपा: अन्तवन्त:-नाशवन्त इति तत्त्वदर्शिभि: उक्ता: । उपचयात्मकत्वात् घटादिवत् विनाशस्वभावा: इत्यर्थ: । यस्मादेव आत्मनो न विनाश:, न च सुखदु:- खादिसम्बन्ध: तस्मात् त्वं मोहजम् इमं शोकं त्यक्त्वा युध्यस्व । स्वधर्मं मा त्याक्षी: इत्यर्थ: । न ह्यत्र युद्धकर्तव्यता विधीयते । युद्धे प्रवृत्त एव ह्यसौ शोकमोहप्रतिबद्ध: तूष्णीमास्त इति, प्रतिबन्धापनयनमात्रं भगवता क्रियते । तस्मात् ''युध्यस्व'' इति अनुवादमात्रं न विधि: इति भाव: ॥१८॥

देहेषु हन्यमानेषु सत्सु आत्मा न हन्यते। तदेवं हन्तृहन्यमानयोर्जडत्वात् आत्मनस्तु निर्विकारत्वाच्च मा विषाद इत्याह –

[1]य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

य:-पुरुष:-एनं-आत्मानं, हन्तारं, हिंसन्तं वेत्ति, यश्च एनम् आत्मानं हतं मन्यते-अवबुध्यते भ्रान्तत्वात् तौ उभौ न विजानीत: नावबुध्येते । अत्र हेतु: अयमात्मा न हन्ति-न हिनस्ति, असङ्गत्वात् । किं च न हन्यते नित्यत्वाच्चेति भाव: ॥ १९ ॥

आत्मनस्तु षड्भावविकारराहित्यं दर्शयति –

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूय: ।
अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥

1 देहातिरिक्तात्मासिद्धे: देहनिमित्त: आत्मनिमित्तो वा शोक: इति विकल्पोऽनुपपन्न: इति..... चार्वाकस्य शङ्काम् आशङ्क्य तत्परिहाराय कठवल्ल्युपनिषद्गतं मन्त्रयुग्ममानिनाय भगवान् वासुदेव: (ब्र).

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न जायत इति अजः। **नित्यः**- सर्वदा एकरूपः। **शाश्वतः**- शश्वद्भवः। **पुराणः** पुरा अपि नवः, सर्वदा अपूर्ववत् अनुभाव्यत इत्यर्थः। **अयम्** - आत्मा **कदाचिदपि न जायते वा**, न जायते च, **न म्रियते** च, **अयं** आत्मा, **भूत्वा** उत्पद्य, **भूयः**- पुनः, **न भविता** - न भवति, अस्तित्वं न भजते। किन्तु प्रागेव स्वतस्सद्रूपः। अतः, **शरीरे हन्यमानेऽपि न हन्यते**। जीवापेतं वा व किल इदं म्रियते न जीवो म्रियते (छा.उ.६.११.३) इति श्रुतेः। अनेन-जायते, अस्ति, वर्धते, परिणमते, अपक्षीयते, विनश्यति इत्येवं यास्कादिभिरुक्ताः षड्भावविकारा निरस्ता भवन्ति। यथा - **न जायत** इत्यनेन जन्मप्रतिषेधः- **न म्रियत** इत्यनेन नाशप्रतिषेधः **नायं भूत्वा भवितेति** जन्मान्तरास्तित्वप्रतिषेधः। अत एव अज इति हेतुः। **नित्य** इति वृद्धिप्रतिषेधः। **शाश्वत** इत्यपक्षयप्रतिषेधः, **पुराण** इति विपरिणामप्रतिषेधः ॥ २० ॥

तस्मादेवं पूर्वोक्तं हन्तृत्वहन्यमानत्वराहित्यं सिद्धमेव इत्याह—

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ २१ ॥

हे पार्थ, नित्यं - सर्वदैकरूपं, वृद्धिशून्यमित्यर्थः। **अव्ययं**- अपक्षयरहितं, **अजं** - जननरहितं, **अविनाशिनं** - विनाशरहितं, **एनम्** आत्मानं, **यो वेद** वेत्ति, **स पुरुषः, कं, कथं हन्ति**, एवम्भूतस्य हनने साधनाभावात्, तथा, **कं घातयति** कथं वा तत्प्रयोजको भवति। एतावता कर्तरि त्वयि कारके मय्यपि दोषो नास्ति इत्युक्तम्॥ २१ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आत्मनो विनाशरहितत्वं प्रतिज्ञातम् तत् किमिव इति, अत्राह—

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥ २२ ॥

यथा नरो - मनुजः, जीर्णानि- शिथिलानि, वासांसि - वस्त्राणि, विहाय - विसृज्य, नवानि - कल्याणानि, अपराणि - वस्त्राणि, गृह्णाति, तथा देही - जीवः जीर्णानि शरीराणि विहाय, नवानि अन्यानि शरीराणि, संयाति - प्राप्नोति । देहनाशे कर्मवशात् नवीनानां शरीराणाम् अवश्यम्भावित्वात् न शोकः कार्य इत्यर्थः ॥ २२ ॥

पुनरपि अविकारित्वं सुखबोधाय व्यञ्जयन् दृढयति –

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥

शस्त्राणि- आयुधानि, 'शस्त्रमायुधम्' इत्यभिधानात्। एनं - आत्मानं, न छिन्दन्ति - निरवयवत्वात् द्विधा न कुर्वन्ति। तथा पावकः अग्निः, एनं, न दहति । आपः एनं, न क्लेदयन्ति - आर्द्रीभूतं न कुर्वन्ति । मारुतः एनं, न शोषयति - शोषं न प्रापयति ॥ २३ ॥

अत्र कारणानि दर्शयति 'अच्छेद्य' इत्यादिना सार्धश्लोकेन –

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।

अयं आत्मा, **अच्छेद्यः**- शस्त्रादिभिः छेत्तुमशक्यः लिङ्गरहितत्वात् । **अयं** - आत्मा, **अदाह्यः** - दग्धुमशक्यः अमूर्तत्वात् । **अयं** आत्मा **अक्लेद्यः** - क्लेदितुमशक्यः, विदेहत्वात् । **अयं** - आत्मा, **अशोष्यः** - शोषं नेतुमशक्यः एव च, अद्रवत्वात् । यतः छेदनाद्यनर्हः **अयं** आत्मा, **नित्यः**- नाशरहितः, **सर्वगतः**- सर्वव्यापकः, **स्थाणुः**- स्थिरस्वभावः, **अचलः**- अप्रकम्प्यः, **सनातनः**- अनादिः किं च- **अयं** - आत्मा, **अव्यक्तः**- चक्षुराद्यगोचरः, 'न चक्षुषा पश्यति कश्चनैनम् (श्वे.उ.४.२०), इति श्रुतेः । **अयं** - आत्मा, **अचिन्त्यः** मनसाप्यगोचरः । 'यन्मनसा न मनुत' (के.उ.७) इति श्रुतेः । **अयं** **अविकार्यः**- विकारानर्हः । उच्यत इति नित्यत्वादौ अभियुक्तोक्तिं प्रमाणयति । उक्तार्थमुपसंहरति –

तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

तस्मात् - कारणात्, **एवं** उक्तप्रकारेण, **एनं** - आत्मानं, **विदित्वा**- ज्ञात्वा, **अनुशोचितुं** - विषादाय **न अर्हसि** ॥ २४ & २५ ॥

विपक्षे देहमेवात्मानमङ्गीकुर्वतापि शोको न कार्य इत्याह –

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥

हे महाबाहो - हे अर्जुन ! **त्वं, अथ च** - यद्यपि, **नित्यजातं, नित्यं मृतं**, देहमेव, **एनं** - आत्मानं, **मन्यसे** न देहातिरिक्तमुक्तलक्षणम्, **तथापि, एवं** - अतिमात्रं, **शोचितुं नार्हसि** । विपरिणामस्वभावस्य देहस्य

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्पत्तिविनाशयो: अवर्जनीयत्वात् इति भाव: ॥ २६ ॥

कुत इत्याशङ्क्याह–

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

हि - यस्मात्, जातस्य- उत्पन्नस्य, प्रारब्धकर्मणिक्षीणे, मृत्यु:- विनाश:, ध्रुव:- निश्चय:। तस्य प्राग्वासनया जन्म - जननं, ध्रुवम् तस्मात् कारणात्, अपरिहार्ये परिहर्तुमशक्ये, अवश्यम्भाविनीत्यर्थ:। अर्थे - जन्म-मरणलक्षणप्रयोजनविषये त्वं - विद्वान्, शोचितुं, नार्हसि ॥ २७ ॥

अपि च-शरीराणां सहजे जन्ममरणे समालोच्य शोकस्यावकाशो नास्तीत्याह–

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

हे भारत, अव्यक्तादीनि, अव्यक्तं नाम प्रधानतत्त्वं तदेव आदि: पूर्वरूपं येषां तानि अव्यक्तादीनि भूतानि स्थावरजङ्गमरूपाणि शरीराणि, व्यक्तमध्यानि- तथाव्यक्तं - अभिव्यक्तं परिदृश्यमानं, मध्यं - जन्म मरणान्तरालस्थितलक्षणं येषां तानि, अव्यक्तनिधनानि, अव्यक्ते अव्यक्ततत्वे, का - कीदृशी, परिदेवना - शोकनिमित्तो विलाप: सुप्तोत्थितस्य स्वप्नदृष्टेषु वस्तुषु इव शोको नोपयुज्यत इति भाव: ॥ २८ ॥

श्रवणमननादिसद्भावेऽपि नित्यब्रह्मानन्दावाप्ति: दुर्लभा इत्याह -

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्य: ।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आश्चर्यवच्चैनमन्य: शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्॥ २९॥

कश्चित् महता तपसा क्षीणपाप: उपचितपुण्यपुञ्ज: कोऽपि पुरुष: **एनं** - आत्मानं, **आश्चर्यवत्**, - स्वेतरसमस्तवस्तुविजातीयतया, अनन्तेषु जन्तुषु आश्चर्यवदवस्थितं, **पश्यति** । किन्तु तत्त्वतो न पर्यालोचयतीत्यर्थ: । **तथैव** तथाविध: **अन्यश्च, एनं** - आत्मानं, **आश्चर्यवत्**, परस्मै वदति न तु तत्त्वत इत्यर्थ: । **अन्य:, एनं** - आत्मानम्, **आश्चर्यवत् शृणोति** न तु तत्त्वत: । **कश्चित्, एनं** - आत्मानं, श्रुत्वा अपि समुच्चयार्थ: । श्रुत्वा दृष्ट्वा उक्त्वापि **न वेदैव** - असम्भावनाविपरीतभावनाभिभूतोजन:-सत्यज्ञानानन्दस्वरूपमलौकिकमपरोक्षमात्मानं न जानातीत्यर्थ: । अकाम: स तु पश्यति न तं पश्यति कश्चन इति । तदुक्तं योगवासिष्ठे –

'अहो सुचित्रं मायेयं तथा विश्वविमोहिनी ।
सर्वाङ्गप्रोतमप्येनं ययाऽऽत्मानं न बुध्यते ॥' ३.७.३ इति ॥ २९ ॥

अथेदानीं प्रकरणार्थ उपसंह्रियते–

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥

हे भारत, सर्वस्य - सर्वप्राणिजातस्य, सुरासुरमनुष्यादे: इत्यर्थ:। **देहे** शरीरे, जातावेकवचनम्। वध्यमाने सतीति शेष:। **अयं देही** - आत्मा, **अवध्य:** - हन्तुमशक्य: । **तस्मात्** कारणात्, **त्वं, सर्वाणि** - भीष्मादीनि, **भूतानि**- शरीराणि, उद्दिश्य, **शोचितुं नार्हसि** ॥ ३० ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

युद्धे कृते भीष्मद्रोणादिवधः प्रसज्यत इति भिया वेपमानस्य अर्जुनस्य धैर्यमुत्पादयन् आह–

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥

अपि च - स्वधर्मं क्षत्रियस्य धर्मं, अवेक्ष्य - विचार्य विकम्पितुं - विचलितुं, नार्हसि । तथाहि - क्षत्रियस्य धर्म्यात्-धर्मादनपेतात् । धर्मसंयुक्तादित्यर्थः । युद्धात् अन्यत् - परं, श्रेयः शुभं, न विद्यते - नास्ति। 'विद' सत्तायामिति धातोः कर्तरि 'श्यन्' - अनेन न च श्रेयोऽनुपश्यामि' (भ.गी.१.३१) इति वाक्यस्योत्तरं दत्तमिति चानुसन्धेयम् ॥ ३१ ॥

"स्वजनं हि कथं हत्वा सुखिनः स्याम" (भ. गी. १.३७)

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ ३२ ॥

हे पार्थ, क्षत्रिया अपावृतं - उद्घाटितं निरावरणं, स्वर्गद्वारं - स्वर्गद्वारभूतं, तत्प्रापकत्वादित्यर्थः । यदृच्छया- अप्रार्थनया च, उपपन्नं प्राप्तं, ईदृशं युद्धं, लभन्ते प्राप्नुवन्ति । ते सुखिनः - भाग्यवन्तः ॥ ३२ ॥

अन्यथा बाधकमाह–

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अथ - मद्वाक्यश्रवणानन्तरं, त्वं धर्म्यं, धर्मादनपेतं, इमं - प्रारब्धं, सङ्ग्रामं - युद्धं न करिष्यसि चेत्, ततः तदकरणानन्तरं स्वधर्मं स्वधर्मफलं निरतिशयसुखमित्यर्थः। कीर्तिं - विजयेन निरतिशयं यशश्च, हित्वा- त्यक्त्वा, पापं - दुर्गतिं, अवाप्स्यसि। तथा च स्मृतिः—

'विहितस्याननुष्ठानान्नरः पतनमृच्छति'

(या.स्मृ.३.२१९) इति ॥ ३३ ॥

सम्प्रति अयुध्यमानस्य अपप्रथा च भवति इत्याह —

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥

अपि च, भूतानि - प्राणिनः, **अव्ययां** - शाश्वतीं, **ते** - तव, **अकीर्तिं**- 'धैर्याभावादर्जुनो युद्धान्निवृत्त' इत्येवं रूपां अपप्रथां, **कथयिष्यन्ति** - आख्यास्यन्ति। तथाहि-**सम्भावितस्य** - शौर्यधैर्यादि-गुणैः प्रशस्तस्य, **अकीर्तिः, मरणात्** - मृत्योरपि **अतिरिच्यते** अधिका भवति। एवंविधाया अकीर्तेः मृत्युरपि श्रेयानित्यर्थः ॥ ३४ ॥

बन्धुस्नेहात् कारुण्याच्च युद्धान्निवृत्तस्य शूरस्य मम अकीर्तिः कथमागमिष्यति इत्यत्राह—

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥

येषां दुर्योधनादीनां महारथानां, बहुगुणत्वेन पूर्वं मतः **बहुमतः** अभूः ते **महारथाः** दुर्योधनादयः, **त्वां, भयात्** - कर्णादिभ्यो भयात्, तृतीयार्थे

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पञ्चमी। रणात् - युद्धात्, उपरतं - निवृत्तं, (मंस्यन्ते - मन्यन्ते - चिन्तयिष्यन्ति) न तु कृपया। ततश्च पूर्वं बहुमतो भूत्वा युद्धाकरणेन पश्चात्, लाघवं लघुभावम् अगौरवं, यास्यसि - प्राप्स्यसि शूराणां - शत्रुभयादृते बन्धुस्नेहादिना युद्धादुपरतिर्नोपपद्यते ॥ ३५ ॥

किं च -

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥

तव सामर्थ्यं - प्रभावं, निन्दन्तः, 'शूराणामस्माकं सन्निधौ कथं पार्थः क्षणमपि स्थातुं शक्नुयात् अस्मत्सन्निधानादन्यत्र ह्यस्य सामर्थ्यम्' इति दूषयन्तः, तव, अहिताः शत्रवः धार्तराष्ट्रः बहून्, अवाच्यवादान्, शूरानुद्दिश्य वक्तुमयोग्याः अवाच्याः - 'क्लीबोऽयं दुर्बलोऽयं कातरोऽयम्' इत्यादिका वचनानर्हा अवाच्याः, वादाः - शब्दाः, तान् वदिष्यन्ति - वक्ष्यन्ति ॥ ततः, दुःखतरं - अधिकदुःखं, किं नु । किमपि नास्तीत्यर्थः ॥ ३६ ॥

त्वया कर्णादिभिर्युद्धे क्रियमाणे जयो वा स्वर्गो वा सिध्यतीत्याह—

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥

हे कौन्तेय, हतो वा युद्धे शत्रुभिर्निहतो यदि, स्वर्गं, प्राप्स्यसि । अथवा, जित्वा - कर्णादीन् शत्रून् विजित्य, महीं - भूमिं भूजातभोगान् इति यावत्। भोक्ष्यसे - अनुभविष्यसि । उभयथापि ते लाभ एव

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इत्यभिप्राय:। तस्मात् - कारणात् युद्धाय कृतनिश्चय: सन्, 'जेष्यामि शत्रून् मरिष्यामि वा इति निश्चयं कृत्वेत्यर्थ:। उत्तिष्ठ। अनेन 'न चैतद्विद्म' (भ.गी.२.६) इत्यस्य उत्तरं दत्तमिति ज्ञेयम् ॥ ३७ ॥

पापमेवाश्रयेदस्मान् हत्वा एतानाततायिन:
(भ.गी. १.३५) इत्यस्योत्तरमाह -

सुखदु:खे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

सुखदु:खे समे - हर्षविषादरहिते कृत्वा, लाभालाभौ, तथा सुख-दु:खयोर्हेतुभूतौ लाभालाभावपि समौ कृत्वा, जयाजयौ तथा लाभालाभ-हेतुभूतौ जयपराजयावपि समौ कृत्वा, तत: तदनन्तरं, युद्धाय, युज्यस्व - सन्नद्धो भव । एवं - उक्तप्रकारेण चेत्, पापं, न अवाप्स्यसि ॥ ३८ ॥

एवमात्मज्ञानोपदेशेऽपि अजानत: पार्थस्य ज्ञानसाधनभूतं कर्मयोगं वक्तुमारभते –

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९ ॥

हे पार्थ, एषा - उक्तलक्षणा । सम्यक्, ख्यायते प्रकाश्यते वस्तुतत्वम् अनया इति संख्या - सम्यग्ज्ञानं, तत्र प्रकाशमानमात्मतत्वं सांख्यं, तस्मिन्, कर्तव्या, बुद्धि: । ते - तुभ्यं, अभिहिता - 'न त्वेवाहं जातु नासम्' (भ.गी २.१२) इत्यारभ्य 'तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि' (भ.गी.२.३०) इत्यन्तेन ग्रन्थेन प्रोक्ता। एवमुक्तायामपि

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चित्तशुद्धिं विना अपरोक्षज्ञानाभावात् चित्तशुद्ध्यर्थं, योगे कर्मयोगे तु, बुद्धिं शृणु, यया बुद्ध्या युक्त:, परमेश्वरार्पितकर्मयोगेन शुद्धान्त:करण: सन् तदनुग्रहलब्धात्मसाक्षात्कारेण, कर्मणां बन्ध: कर्मबन्ध:- संसार: तं प्रहास्यसि - प्रकर्षेण त्यक्ष्यसि ॥ ३९ ॥

ननु कृष्यादिवत् कर्मणां कदाचित् विघ्नबाहुल्येन फलव्यभिचारात् यत्किञ्चिन्मन्त्राद्यङ्गवैगुण्येन च प्रत्यवायसम्भवात् कुत: कर्मयोगेन कर्मबन्धप्रहाणम् तत्राह–

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

इह - निष्कामकर्मयोगे, अभिक्रमनाश:- प्रारम्भनाश:, फलसाधनभूतनाश: प्रारम्भस्यासमाप्तस्य विच्छिन्नस्यापि निष्फलत्वं, नास्ति । किञ्चिदारब्धस्य विच्छेदे प्रत्यवायो न विद्यते, ईश्वरोद्देशेन विघ्नवैगुण्याद्यसम्भवात् । किञ्च अस्य धर्मस्य, स्वल्पमपि उपक्रममात्रमपि, कृतं, महत: अधिकात्, भयात् - संसारभयात्, त्रायते - रक्षति । न तु काम्यकर्मवत् किञ्चिद्वैगुण्यादिना नैष्फल्यमस्येत्यर्थ: ॥ ४० ॥

काम्यकर्मविषयाया बुद्धेर्मोक्षसाधनभूतकर्मविषयां बुद्धिं विशिनष्टि –

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

हे कुरुनन्दन - कुरुवंशानन्दकर, इह - शास्त्रविहितकर्मणि, व्यवसायात्मिका, व्यवसाय्यात्मत इति व्यवसाय:। 'ब्रह्मज्ञानेनैव

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भवाम्बुधिं तरिष्यामि' इति निश्चयः व्यवसायः स एवात्मा स्वरूपं यस्याः सा बुद्धिः, एका - मोक्षफलाय मुख्या भवतीति शेषः। यथाशक्ति नित्यनैमित्तिके च कर्मणि किञ्चिदङ्गवैगुण्येऽपि क्रियमाणे परमेश्वरोद्देशेन वैगुण्योपशमात्। अव्यवसायिनां - पूर्वोक्तनिश्चयरहितानां बहिर्मुखानां कामिनामित्यर्थः। बुद्धयो हि - बुद्धयस्तु, अनन्ताश्च - आयुरारोग्यैश्वर्य-धनधान्यपशुपुत्रस्वर्गाद्यनन्तमनोरथत्वात् अपरिमिताः। तत्रापि बहुशाखाश्च, बह्व्यः शाखाः-कर्मफलगुणफलादिप्रकारविशेषाय भवन्ति। अतः मुमुक्षूणां नित्यं नैमित्तिकं च फलानि अनपेक्ष्य स्ववर्णा-श्रमोचितकाम्यकर्म च ब्रह्मार्पणबुद्ध्या कार्यम् इति भावः ॥ ४१ ॥

ननु लोके जना निष्कामाः सन्तः किमर्थं निश्चयात्मिकां बुद्धिं न कुर्वन्ति इत्यत्राह 'यामिमाम्' इत्यादिश्लोकत्रयेण –

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥

हे पार्थ, वेदवादरताः वेदेश्रुतौ, वादः-'अक्षयगूँ हवै चातुर्मास्ययाजिनस्सुकृतं भवति' (श.ब्रा. २.५.४.१) 'अपामसोमममृता अभूम' इत्याद्या अर्थवादाः, तेष्वेव, रताः आसक्ताः, अत एव, अन्यत् - स्वर्गफलादन्यत्,। नास्तीति, वादिनः - वादशीलाः अविपश्चितः - अपण्डिताः, पुष्पितां - सञ्जातपुष्पां कुसुमितविषलतादिवत् ईषद्रम्यां, इमां वाचं - स्वर्गादिफलप्रतिपादिनीं गिरं, फलश्रुतिमिति यावत्, प्रवदन्ति। तया वाचा, अपहृतचेतसां, व्यवसायात्मिका बुद्धिर्न विधीयते इत्युत्तरश्लोकेनान्वयः ॥ ४२ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किं च –

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

कामात्मानः- कामप्रवणमनसः, अत एव **स्वर्गपराः**, स्वर्गः परः परमपुरुषार्थो येषां ते अविपश्चितः, **जन्मकर्मफलप्रदां** - स्वर्गानुभवान्ते जन्म कर्माणि च तान्येव फलानि प्रददातीति प्रदां, **भोगैश्वर्यगतिं प्रति**, भोगसुखं चैश्वर्यं प्राभवं च तयोर्गतिं प्राप्तिं, **क्रियाविशेषबहुलां** - 'वायव्यगँ श्वेतमालभेत भूतिकाम' (तै.सं.२.१.१). इत्याद्युक्तभोगैश्वर्यादिसाधनक्रियाविशेषाः बहुलाः - प्रचुरा यस्याः तां वाचं प्रवदन्ति। तया अपहृतचेतसां निश्चयात्मिका बुद्धिः न विधीयत इति सम्बन्धः ॥ ४३ ॥

किं च–

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

भोगैश्वर्यप्रसक्तानां - भोगे च ऐश्वर्ये च, **प्रसक्तानां** - तत्पराणां, **तया** - पूर्वोक्तया वाचा, **अपहृतचेतसां**, अपहृतम् आकृष्टं चेतो येषां तेषां, आच्छादितविवेकप्रज्ञानामित्यर्थः । **समाधौ** - चित्तैकाग्र्ये, **व्यवसायात्मिका** निश्चयात्मिका, **बुद्धिः**, न विधीयते। कर्मकर्तरिप्रयोगः। नोत्पद्यते इत्यस्यार्थः । अतः काम्यकर्मसु मुमुक्षुणा सङ्गो न कर्तव्य इति भावः ॥ ४४ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवम् अत्यल्पफलानि पुनर्जन्म प्रसवानि कर्माणि मातापितृसहस्रेभ्यो वत्सलतया आत्मोज्जीवनेन प्रवृत्ता वेदा: किमर्थं वदन्ति ? कथं वापि वेदोदितं कर्म त्याज्यात्मतयोच्यत ? इति अत आह–

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥

हे अर्जुन, वेदा: त्रैगुण्यविषया: त्रय एव गुणास्त्रैगुण्यं, स्वार्थे ष्यञ् । सत्वरजस्तमांसि। सत्वरजस्तम: प्रचुरा: पुरुषा इत्यर्थ:। तेषां स्वविषया: तदनुरूपफलबोधका वेदा:, त्रिगुणात्मकानां सकामानां वत्सलतया प्राचुर्येण स्वर्गादिसाधनमेव बोधयन्ति। न तथा मोक्षमार्गम् इत्याशय: । अत: त्वं, **निर्द्वन्द्व:-** निर्गतं द्वन्द्वं शीतोष्णसुखदु:खरूपं यस्मात् स:। **नित्यसत्वस्थ:** नित्यं सत्त्वे रजस्तमोवर्जिते शुद्धसत्त्वे तिष्ठतीति नित्यसत्वस्थ: **निर्योगक्षेम:** अप्राप्तस्य प्राप्ति: योग: च प्राप्तस्य रक्षणं क्षेमश्च योगक्षेम: निर्गतो योगक्षेमो यस्मात् स:। **आत्मवान् -** मनस्वी सन्, आत्मान्वेषणपर इत्यर्थ: । निर्गतं त्रैगुण्यं यस्मात् स: **निस्त्रैगुण्यो भव** । इदानीं सत्वप्रचुरत्वं तदेव वर्धयन् अन्योन्यसङ्कीर्णगुणत्रयप्रचुरो न भवेत् इति भाव: ॥ ४५ ॥

ननु फलाकाङ्क्षां विना निष्कामतया किं भवेत् इत्याशंङ्क्याह –

यावानर्थ उदपाने सर्वत: संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानत: ॥ ४६ ॥

उदकं पीयतेऽस्मिन्निति उदपानं कूप:। कूप उदपानम् (१.१०.२६) इति अमर: । तस्मिन् स्वल्पजले एकत्र स्नानपानादि

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

बहुविधप्रयोजनानुपपत्तेः तत्तत्स्वल्पजलाधार परिभ्रमणायासेन पृथक्, यावान् - यादृशस्नानपानादिः अर्थः- प्रयोजनं भवति, तावान्- तादृशस्सर्वोऽप्यर्थः, सर्वतः- अभितः, सम्प्लुतोदके, सम्प्लुतान्युदकानि यस्मिन् तस्मिन् महाह्रदे, एकत्रैव यथा भवति, एवं सर्वेषु वेदेषु, यावान्, तत्र कर्मफलरूपो यादृशोऽर्थः तावान् तादृशः सर्वोऽप्यर्थः विजानतः - व्यवसायात्मकबुद्धियुक्तस्य, ब्राह्मणस्य - ब्रह्मनिष्ठस्य, च भवत्येव। ब्रह्मानन्दे क्षुद्रानन्दानामन्तर्भूतत्वात्। तथा श्रुतिरपि एषोऽस्य परम आनन्दः। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" (बृ.उ. ४.३.३२) तस्मात् निस्त्रैगुण्यत्वं सम्यगिति भावः ॥ ४६ ॥

अतः शुद्धसत्वस्य मुमुक्षोः एतावदेव उपादेयम् इत्याह–

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ ४७ ॥

ते - जिज्ञासोः तव, नित्यनैमित्तिकादि कर्मण्येव, अधिकारः, अस्तु, फलेषु, बन्धहेतुषु, तत्तत्कर्मफलेषु, अधिकारः, - कामः, कदाचन, मास्तु। ननु कर्मकर्तुः तत्फलं भवेदेव, भुञ्जानस्य तृप्तिवत् इत्याकाङ्क्षायाम् आह- कर्मफलं हेतुः बन्धकारणं यस्य सः कर्मफलहेतुः मा भूः। काम्यमानस्यैव स्वर्गादेः नियोज्यविशेषणत्वेन फलत्वात् अकामितं फलं न स्यात् इति भावः। तदुक्तं विष्णुपुराणे–

'तत्कर्म यन्न बन्धाय सा विद्या या मुक्तये।
आयासायापरं कर्म विद्याऽन्या शिल्पनैपुणम् ॥ (३.७.४) इति।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अत एव कर्मणि कृते तत्फलं बन्धकं भवेदिति भयात् अकर्मणि कर्मोपरमेऽपि ते - तव सङ्गः- आसक्तिः, मास्तु ॥ ४७ ॥

एतदेव स्फुटीकरोति –

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥

हे धनञ्जय, योगः- परमेश्वरैकपरता, तत्रस्थः, कर्माणि कुरु। तथा, सङ्गं - राज्यबन्धुप्रभृतिषु अभिनिवेशनं कर्तृत्वाभिनिवेशनं, (च) त्यक्त्वा, केवलमीश्वराश्रयेणैव कुरु। तत्फलस्य ज्ञानस्यापि सिद्ध्यसिद्ध्योः समो भूत्वा केवलमीश्वरार्पणेनैव कुरु। यत एवम्भूतं समत्वमेव योग उच्यते। सिद्ध्यसिद्ध्योः समत्वं समतारूपं चित्तसमाधानं, योगः- योग इत्युच्यते। अत्र योगस्थः - एवंविधयोगे तिष्ठतीति योगस्थः सन्, समः - विजयादिसिद्ध्यसिद्ध्योस्समो भूत्वा, सङ्गं - राज्यबन्धु प्रभृतिष्वभिनिवेशं, त्यक्त्वा च, कर्माणि-युद्धादीनि कुरु॥ ४८ ॥

किमर्थमिदमसकृदुच्यत इत्यत आह–

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

हे धनञ्जय, बुद्ध्या - व्यवसायात्मिकया बुद्ध्या, कृतो योगो बुद्धियोगः तस्मात् बुद्धियोगात्, कर्म - अन्यत्काम्यं कर्म, दूरेण, अवरं- अश्रेष्ठं, निकृष्टमिति यावत्। हि यस्मात् फलं हेतुर्येषां ते फलहेतवः - सकामा नराः, कृपणाः - क्षुद्राः संसारिण इति यावत्। तथा च श्रुतिः-

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

'यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात् प्रैति स कृपण (बृ.उ. ३.८.१०) इति। तस्मात् बुद्धौ - ज्ञानविषये, शरणं-आश्रयं कर्मयोगं, अन्विच्छ- प्रार्थयस्व। परमार्थज्ञानशरणो भव इत्यर्थः ॥ ४९ ॥

योगयुक्तमेव स्तौति—

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

बुद्धियुक्तः - व्यवसायात्मिकया बुद्ध्या सहितः इह अस्मिन् लोके, उभे - द्वे - सुकृतदुष्कृते - पुण्यपापे, जहाति - त्यजति । न प्राप्नोतीत्यर्थः। तस्मात् कारणात् योगाय - व्यवसायात्मकबुद्धियोगाय, युज्यस्व- घटस्व। तथाहि कर्मसु कौशलं बन्धकानामपि तेषां मोक्षपरत्वसम्पादनचातुर्यं योगो भवति इति शेषः ॥ ५० ॥

कर्मणां फलत्यागमनुवदति—

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१ ॥

बुद्धियुक्ताः- व्यवसायात्मकबुद्धियुक्ताः, मनीषिणः पण्डिताः : कर्मजं, कर्मकरणाज्जायत इति कर्मजं, फलं त्यक्त्वा, ब्रह्मार्पणं कृत्वा, जन्मबन्धविनिर्मुक्ताः, जन्मैव बन्धः तेन विनिर्मुक्ताः सन्तः, अनामयं - सर्वोपद्रवरहितं, पदं - शाश्वतं मोक्षं, गच्छन्ति हि ॥ ५१ ॥

'तादृशं स्थानं कदा यास्यामि' इत्याकाङ्क्षायामाह—

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

'यदा' इति श्लोकद्वयेन–

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥

यदा - यस्मिन् समये, **ते** - उक्तप्रकारेण कर्मणि वर्तमानस्य तव, **बुद्धिः, मोहकलिलं,** मोहो देहाभिमानः तद्रूपं च तत्कलिलं गहनं च, 'कलिलं गहनं समे'' अमरकोषः (३.१.८५) इति अभिधानात् तत्, **व्यतितरिष्यति-** विशेषेण अतिक्रमिष्यति, **तस्मिन् समये, श्रोतव्य-** स्यार्थस्य **श्रुत**स्यार्थस्य **च निर्वेदं,** - वैराग्यं, **गन्तासि-** प्राप्स्यसि। ब्रह्मनिष्ठत्वात् श्रोतव्यश्रुतार्थयोरनुपादेयत्वेन जिज्ञासां न करिष्यसीति भावः ॥ ५२ ॥

किं च -

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥

श्रूयन्ते आभिः बहुतरलौकिकवैदिकार्था इति **श्रुतयः**– श्रवणानि, ताभिः, **विप्रतिपन्ना** - पूर्वं विक्षिप्ता, **ते** - तव, **बुद्धिः, निश्चला** - इतः परं लौल्यहिता सती विषयान्तरैरनाकृष्टा इति यावत्, समाधीयते चित्तमस्मिन्निति समाधिः ऐकात्म्यम् । 'समाधिस्समतावस्था जीवात्म-परमात्मनोः' (योगतत्त्वोपनिषत्, १०७) इति योगशास्त्रवचनात् । तस्मिन् । **अचला** - अभ्यासपाटवेन स्थिरा, **यदा स्थास्यति, तदा योगं** - योगफलं, अपरोक्षब्रह्मज्ञानं, **अवाप्स्यसि** ॥ ५३ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उक्तलक्षणलक्षितस्य ब्रह्मनिष्ठस्य लक्षणं विविदिषुः अर्जुन उवाच–

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥

हे केशव, **समाधिस्थस्य** - उक्तलक्षण समाधौ स्थितस्य, अत एव, **स्थितप्रज्ञस्य** - ब्रह्मैवास्मि इति निश्चयबुद्धेः पुरुषस्य, भाष्यतेऽनयेति **भाषा** - वाचकशब्दः लक्षणमिति भावः। **का** - कीदृशी ? केन लक्षणेन स्थितप्रज्ञ इत्युच्यते? तथा ब्रह्मणि स्थिता धीर्यस्य स **स्थितधीः**, स्वयं, **किं** - कथं। किमित्यव्ययम्। **प्रभाषेत** **किं** केन प्रकारेण, **आसीत्** - उपविशेत्। **किं** केन प्रकारेण, **व्रजेत** - गच्छेत् इति प्रश्नार्थः ॥ ५४ ॥

एवमर्जुनेन कृतप्रश्नः सन् योगभूमिकारूढस्य लक्षणानि यावदध्याय - परिसमाप्तिः तावत्पर्यन्तं विवक्षुः तत्र प्रथमस्य प्रश्नस्योत्तरं श्रीभगवानुवाच –

प्रजहाति यदा कामान् सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

हे **पार्थ** ! **यदा**, यः, **आत्मना** - स्वेनैव, **आत्मनि**, सन्तुष्टः सन्, **मनोगतान्** - मनः प्राप्तान्, मनसि प्रविष्टान्, **सर्वान् कामान्** - तुच्छमनोरथान्, **प्रजहाति** - प्रकर्षेण त्यजति, **तदा** सः, **स्थितप्रज्ञः** स्थिता - आत्मानात्मविवेकजा, प्रज्ञा यस्य स, इत्युच्यते। त्यक्त-पुत्रवित्तलोकेषण आत्माराम आत्मरतिः स्थितप्रज्ञ इत्यर्थः ॥ ५५ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किं प्रभाषेत इत्यस्योत्तरमाह द्वाभ्याम् ।

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

दुःखेषु - आध्यात्मिकादिषु सत्सु, अनुद्विग्नमनाः- अक्षुभितमनाः, सुखेषु विगतस्पृहः - वीतरागभयक्रोधः वीताः विगताः रागः प्रीतिश्च भयं, क्रोधो - रोषश्च यस्मात्सः, मुनिः एवंविधो मननशीलः, स्थितधीः- स्थितप्रज्ञ, इत्युच्यते ॥ ५६ ॥

किं च-

यः सर्वत्रानभिस्नेहः तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

यः सर्वत्र - सर्वस्मिन् प्रयोजने, अनभिस्नेहः- उदासीनः, तत्तत् शुभाशुभं, शुभं - मङ्गलं, अशुभं - अमङ्गलं, च, द्वन्द्वैकवद्भावः प्राप्य, नाभिनन्दति - शुभं प्राप्य, न हृष्यतीत्यन्वयः । न द्वेष्टि - अशुभं प्राप्य न निन्दतीति सम्बन्धः । किन्तु केवलं उदासीन एव, भाषते । तस्य, प्रज्ञा- बुद्धिः, प्रतिष्ठिता-स्थिरतरा ॥ ५७ ॥

किं च-

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

यदा च, अयं - योगी, इन्द्रियार्थेभ्यः - शब्दादिविषयेभ्यः, इन्द्रियाणि- श्रोत्रादीनि, कूर्मः सर्वशः- सर्वतः अङ्गानि इव -

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

करचरणादीन् इव, संहरते - प्रत्याहरति, तदा तस्य - योगिनः, प्रज्ञा प्रतिष्ठिता इत्यन्वयः। अयं भावः - यदा इन्द्रियाणि विषयादीन् स्प्रष्टुमुद्युक्तानि तदा, कूर्मो भयादङ्गानीव, विषयेभ्यः प्रतिसंहृत्य मनः आत्मन्यवस्थापयति सः स्थितप्रज्ञ इति।

"मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज' (अ.गी. १)
इत्युक्तविषयनिवृत्तिमात्रेण" ॥ ५८ ॥

ननु जडानां रोगार्तानाम् उपवासकृशानां च विषयनिवृत्तिदर्शनात् कथं स्थितप्रज्ञता इत्याशङ्क्य आह–

विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

निराहारस्य- निर्गत आहारः इन्द्रियैः विषयाणामाहरणं ग्रहणं यस्मात् तस्य, इन्द्रियैः विषयग्रहणमकुर्वत इत्यर्थः। **देहिनः** - देहाभिमानिनः, अज्ञस्य, **विषयाः** शब्दादयः, **रसवर्जं,** रसो रागोऽभिलाषो वर्जं यथा तथा, **विनिवर्तन्ते-** अपगच्छन्ति। विषयानुभवो निवर्तत इति तात्पर्यम्। **परं** - परमात्मानं, **दृष्ट्वा,** वर्तमानस्य अस्य स्थितप्रज्ञस्य तु, **रसः-** रागोऽपि, **निवर्तते** - स्वयमेवापगच्छतीति भावः। यद्वा, **निराहारस्य** - भोजनरहितस्य उपवासरतस्य **देहिनः विषयाः,** प्रायशो **विनिवर्तन्ते।** रोगार्तस्य तात्कालिकभोगाभावात्। **परं तु रसवर्जं,** रसापेक्षा तु न निवर्तत इत्यर्थः। शिष्टं स्पष्टम् ॥ ५९ ॥

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षता आदौ इन्द्रियाणि स्ववशे स्थापयितव्यानि यस्मात् तदनवस्थापने दोषमाह –

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

हे कौन्तेय, प्रमथितुं - विलोडयितुं शीलमेषामस्तीति प्रमाथीनि, इन्द्रियाणि, यततः - ब्रह्मप्राप्तौ यत्नं कुर्वतः विपश्चितः विवेकिनः, पुरुषस्य मनोऽपि, प्रसभं - बलात्कारेण, हरन्ति - अपकर्षन्ति हि ॥ ६० ॥

अत एव-

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

युक्तः योगी, तानि सर्वाणि - दुर्जयानीन्द्रियाणि, संयम्य - नियम्य, मत्परः- चिद्रूपे मय्यासक्तस्सन्, आसीत । अनेन 'किमासीतेत्यस्योत्तरं दत्तमिति ज्ञेयम् । एतदेवानुवदति । तथाहि - यस्य, इन्द्रियाणि, वशे- अधीनत्वे, वर्तन्ते, तस्य - पुंसः, प्रज्ञा बुद्धिः, प्रतिष्ठिता - ब्रह्मणि स्थिरतरा ॥ ६१ ॥

इन्द्रियजये सत्यपि मनोजयं विना विनाशकारणमलं स्यादित्याह - "ध्यायत" इति श्लोकद्वयेन –

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

समीचीनमिति बुद्ध्या, विषयान् - शब्दादीन्, ध्यायतः चिन्तयतः, पुंसः तेषु - विषयेषु, सङ्गः आसक्तिः, उपजायते - भवति। सङ्गात् कामः, तेष्वधिकः सञ्जायते संभवति। कामो नाम सङ्गस्य विपाकदशा, पुरुषो यां दशामापन्नो विषयान् भुक्त्वा अलंबुद्ध्या स्थातुं न शक्नोति स कामः केनचित् प्रतिहतात् कामात्, क्रोधः, अभिजायते-भवति ॥ ६२ ॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

क्रोधात्, संमोहः - कृत्याकृत्यविवेकशून्यता, भवति। **संमोहात् स्मृतिविभ्रमः, स्मृतेः** शास्त्रगुरूपदिष्टार्थस्य, **विभ्रमः** भ्रंशः **स्मृतिभ्रंशात्** - विस्मृतेः, **बुद्धिनाशः** - व्यवसायात्मकबुद्धेर्नाशः, भवति। **बुद्धिनाशात्, प्रणश्यति** - प्रकर्षेण नश्यति। पुनरपि संसारकूपे पतितो भवतीत्यर्थः ॥ ६३ ॥

विषयेन्द्रियाणामविनाभावादिन्द्रियजयो दुर्लभः। तस्मात् स्थितप्रज्ञता केनोपायेन भवेत् इत्याकाङ्क्षायामाह रागद्वेषेति द्वाभ्याम्-

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

रागद्वेषवियुक्तैः- रागद्वेषाभ्यां विवर्जितैः, अत एव **आत्मवश्यैः**, आत्मनो मनसो, वश्यैः- वशवर्तिभिः, **इन्द्रियैः विषयान्, चरन्** अभ्यवहरन्नपि, **विधेयात्मा**, विधेयोऽधीनः आत्मा - मनो यस्य स पुरुषः **प्रसादं**- शान्तिं, इन्द्रियोपरतिमिति यावत्। **अधिगच्छति**- अधिकतरं व्रजति। अनेन किं व्रजेत इत्यस्योत्तरं दत्तम् ॥ ६४ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसोह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

अस्य - योगिनः, प्रसादे सति, सर्वदुःखानां - प्रकृतिसंसर्गयुक्त-सर्वदुःखानां, हानिः- नाशः, उपजायते- उत्पद्यते, तदेवानुवदति। तथाहि प्रसन्नचेतसः- स्वच्छान्तःकरणस्य पुरुषस्य, आशु - शीघ्रं, बुद्धिः- व्यवसायात्मिका, पर्यवतिष्ठते - समन्तादवतिष्ठते ॥ ६५ ॥

इन्द्रियजयस्य स्थितप्रज्ञतासाधनत्वमन्वयमुखेन प्रतिपाद्य व्यतिरेकमुखेन प्रतिपादयति -

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६ ॥

अयुक्तस्य - अविजितेन्द्रियस्य, बुद्धिः- वियुक्तात्मविषया बुद्धिः, नास्ति । किं च, तस्याः प्रतिष्ठिता वार्ता, कुत इत्याह - न चायुक्त-स्येति । अयुक्तस्य, भावना - आत्मस्वरूपाभिनिवेशः नास्ति । भावनया हि बुद्धिः आत्मनि प्रतिष्ठिता भवति इति भावः । अभावयतः ब्रह्मभाव-नामकुर्वाणस्य, शान्तिः- उपरमः, नास्ति । अशान्तस्य - शान्तिरहितस्य, सुखं - ब्रह्मानन्दनिरतिशयसुखं, कुतः- कुतो भवेत् ॥ ६६ ॥

पुनरप्युक्तेन प्रकारेण इन्द्रियनियमनमकुर्वतोऽनर्थमाह–

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इन्द्रियाणां चरतां - विषयेषु वर्तमानानां सतां, यत् मनः, पुरुषेण अनुविधीयते - अनुवर्तते, न तु नियम्यते। हि - यस्मात्, तत् - मनः, अस्य - पुंसः, प्रज्ञां - आत्मानात्मविवेकज्ञानं, अम्भसि - जले, नावं, वायुः - प्रतिकूलपवन इव, हरति - अपकर्षति। विषयप्रवणं करोतीति भावः ॥ ६७ ॥

एवमिन्द्रियनिग्रहं पौनः पुन्येन प्रतिपाद्य उपसंहरति–

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

हे महाबाहो तस्मात् - कारणात् यस्य, इन्द्रियाणि, सर्वशः, इन्द्रियार्थेभ्यः विषयेभ्यः, निगृहीतानि नियमितानि, तस्य - पुंसः, प्रज्ञा, आत्मनि, प्रतिष्ठिता - स्थिरा भवति ॥ ६८ ॥

एवं नियतेन्द्रियस्य प्रसन्नमनसः सिद्धावस्थामाह–

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

या - आत्मविषया बुद्धिः सर्वभूतानां, निशा - अतद्बुद्धीनामगोचरत्वात् रात्रिरिवाप्रकाशमाना, तस्यां आत्मविषयायां बुद्धौ, संयम इन्द्रियनिग्रहः सोऽस्यास्तीति संयमी - योगी, जागर्ति- प्रबुध्यते। आत्मानमवलोकयन् आस्त इत्यर्थः। यस्यां - शब्दादिविषयायां बुद्धौ, भूतानि - सर्वाणि भूतानि जाग्रति प्रबुद्धानि भवन्ति, सा-शब्दादिविषया बुद्धिः, आत्मानं, पश्यतो मुनेः, निशा-अविद्यास्वरूपत्वात् निशेव अप्रकाशमाना भवतीत्यर्थः ॥ ६९ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विदुषः त्यक्तेषणस्य स्थितप्रज्ञस्यैव मोक्षप्राप्तिः नान्यस्य। एतमर्थं प्रतिपादयिष्यन् आह–

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ ७० ॥

आपः - प्रवाहजलानि, **आपूर्यमाणं** - स्वैरेव जलैः पूर्णं, अचलवत् प्रतिष्ठा स्थितिर्यस्य तं, एकरूपमित्यर्थः, यद्वा, **आपः** - अन्यजलानि, **आपूर्यमाणं** - नानानदीभिरापूर्यमाणमपि, **अचलप्रतिष्ठं**- अनतिक्रान्तमर्यादं, **समुद्रं, यद्वत्** यथा, **प्रविशन्ति**, आसामपां प्रवेशेऽप्यप्रवेशे च समुद्रो न कश्चन विशेषमापद्यत इति भावः। **तद्वत्** तथा, **सर्वे कामाः** - शब्दादिविषयाः **यं** - अविक्रियं संयमिनं, **प्रविशन्ति** - सर्वं आत्मन्येव प्रलीयन्ते। न स्वात्मवशं कुर्वन्तीत्यर्थः। **स** - संयमी **शान्तिं** - चित्तोपरतिं, केवलं ब्रह्मैक्यं आप्नोति। अयं भावः - शब्दादिषु इन्द्रियगोचरताम् आपन्नेषु अनापन्नेषु च स्वात्मावलोकनतृप्त्यैव विकारं नाप्नोति स जीवन्मुक्त इति। **कामान्**, स्रक्चन्दनादि भोगान् कामयितुं शीलमस्यास्तीति **कामकामी** अजितेन्द्रियः शान्तिं नाप्नोतीति सम्बन्धः ॥ ७० ॥

यस्मादेवं तस्मात्–

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ ७१ ॥

यः पुमान्, सर्वान् कामान्, काम्यन्त इति कामाः शब्दादयः तान्, **विहाय** - विसृज्य, अनपेक्ष्येत्यर्थः। **निस्स्पृहः** - अप्राप्यवस्तुषु

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

काङ्क्षारहितस्सन् निरहङ्कार:, निर्गतोऽहङ्कारो देहे आत्माभिमानो यस्मात् स:। अत एव निर्मम:- निर्गतो ममकार: 'पुत्रमित्रादयो मदीया' इत्यध्यासो यस्मात् स: चरति-जीवनमात्रचेष्टाशेष: पर्यटतीत्यर्थ: स:-पुमान्, शान्तिं कैवल्यं, अधिगच्छति ॥ ७१ ॥

सैषा ज्ञाननिष्ठा स्तूयते—

एषा ब्राह्मी स्थिति: पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोऽध्याय: ॥

हे पार्थ, ब्रह्मणि भवा ब्राह्मी, एषा - यथोक्ता, स्थिति:-निष्ठा, एनां - ब्रह्मनिष्ठां, प्राप्य, न विमुह्यति-मोहं न प्राप्नोति । पुनर्जननमरण-प्रवाहे न पततीत्यर्थ: । यत:, अस्यां - ब्रह्मनिष्ठायां, अन्तकाले-देहावसानसमये, स्थित्वापि, ब्रह्मनिर्वाणं-ब्रह्मकैवल्यं, ऋच्छति-गच्छति । 'अपि' शब्दात् बाल्यमारभ्य श्रुतवेदान्तस्य निश्श्रेयसप्राप्तिर्भव-तीति किमाश्चर्यमिति द्योत्यते ॥ ७२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीस्वामिशिष्यरामचन्द्र-सरस्वतीविरचितायां भगवद्गीताव्याख्यायांपदयोजनासमाख्यायां सांख्ययोगो नाम द्वितीयोऽध्याय: ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ तृतीयोऽध्यायः ॥

सांख्ये बुद्धिः योगे बुद्धि : इति प्रवृत्तिनिवृत्तिभूते द्वे बुद्धी भगवता निर्दिष्टे। तत्र प्रजहाति यदा कामान् (भ.गी. २.५५) इत्यादिना अध्यायपरिसमाप्ति सांख्यबुद्ध्याश्रितानां कर्मसंन्यासः कर्तव्य इत्युक्त्वा 'एषा' ब्राह्मी स्थितिः' (भ.गी.२.७२) इति तन्निष्ठतैव कृतार्थता उक्ता।

अर्जुनाय तु योगबुद्धिमाश्रित्य 'कर्मण्येवाधिकारस्ते' (भ.गी.२.४७) "मा ते सङ्गोऽस्त्वकर्मणि" 'इत्युक्त्वा अत एव श्रेयः प्राप्तिं नोक्तवान्। तदेवालक्ष्य पर्याकुलीभूतबुद्धिः अर्जुन उवाच –

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥

जनं - जननोपलक्षितं जीवस्य संसारमर्दयति हिनस्ति इति जनादर्नः। तस्य सम्बुद्धिः हे जनार्दन, बुध्यतेऽनयेति बुद्धिः ज्ञानं, कर्मणस्सकाशात्, ज्यायसी - गुरुतरा इति, ते - तव, मता - अभिमता चेत्, तत् - तस्मात्कारणात्, किं - किमर्थं, घोरे क्रूरे, हिंसालक्षण इति यावत्। कर्मणि, मां, नियोजयसि प्रवर्तयसि ॥ १ ॥

ननु 'धर्म्याद्धि युद्धात्' (भ.गी.२.३१) इत्यादिना कर्मणोऽपि श्रैष्ठ्यमुक्तम्, (न केवलं) ज्ञानस्य इति अत आह–

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

व्यामिश्रेण -क्वचित्कर्मप्रशंसा क्वचित् ज्ञानप्रशंसेत्येवं सन्देहोत्-पादकम्, **इव** (यद्वाक्यं) तेन वाक्येन, **मे** - मम, **बुद्धिं, मोहयसि इव** - भ्रान्तिं गमयसीव। मन्दबुद्धेर्मम व्यामोहापनयनाय प्रवृत्तः त्वं मां कथं, मोहयसि। अतः तथा प्रतिभासीति ब्रवीमि इति भावः। **अहं येन** - कर्मणा वा अन्यतरेण वा **श्रेयः**, मोक्षं, **आप्नुयां**, ज्ञानकर्मणोरन्यत्, **एकं** - तत् **निश्चित्य**, ज्ञानं, वा कर्म वा अर्जुनस्य (तव) इदमेव योग्यं बुद्धिशक्त्यवस्थानुरूपं इति निश्चित्य, **वद** ॥ २ ॥

प्रश्नानुरूपं वचनं श्रीभगवानुवाच–

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥

हे **अनघ** - पापरहित, **पुरा** - पूर्वं सृष्टिकाले, **अस्मिन् लोके, मया,** प्रजाः सृष्ट्वा वेदार्थसम्प्रदायं कृत्वा सर्वज्ञेनेश्वरेण, **सांख्यानां,** आत्मानात्मविवेकवतां, **ज्ञानयोगेन,** ज्ञानमेव योगः, तेन च **योगिनां** - चित्तशुद्ध्युपायभूतकर्मयुक्तानां, **कर्मयोगेन** - कर्मणां योगः तेन, **द्विविधा** - द्विप्रकारा, **निष्ठा** - स्थितिः, **प्रोक्ता** ॥ ३ ॥

'बन्धकारणे कर्मण्येव मां नियोजयसि' इति विषण्णमानसं 'कर्म नारभे' इत्येवं मन्वानम् अर्जुनम् आलक्ष्य कर्मनिष्ठायाः ज्ञाननिष्ठाहेतुत्वं प्रतिपादयन् आह –

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पुरुषः कर्मणां - यज्ञादिकर्मणां, अनारम्भात् - अननुष्ठानात्, नैष्कर्म्यं - निष्कर्मभावं, निष्क्रियात्मस्वरूपेणैवावस्थानमिति यावत्। नाश्नुते - न प्राप्नोति। सत्कर्मानुष्ठानात् दुरितक्षयः तस्माज्ज्ञानं, तदर्थं कर्म कर्तव्यमित्यर्थः तथा च स्मृतिः–

ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्यकर्मणः।
यथाऽऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनि' ॥ इति।

'विविदिषन्ति यज्ञेन' (बृ.उ.४.४.२२) इत्यादि श्रुतिश्च नैष्कर्म्यार्थिनः किं कर्मारम्भेणेति प्राप्ते सति। अत आह **सन्न्यसनात्** - ज्ञानरहितकर्मसन्न्यासमात्रात्, **एव, सिद्धिं** - नैष्कर्म्यलक्षणज्ञानयोगनिष्ठां, **न समधिगच्छति** न प्राप्नोति ॥ ४ ॥

साक्षात् कर्म येन केनापि दुस्त्यजमित्याह–

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

हि - यस्मात् कारणात्, **कश्चित्**, ज्ञानी अज्ञानी वा पुरुषः, **अकर्मकृत्** - स, **जातु** - कस्यांचिदवस्थायां, **क्षणमपि** - क्षणमात्रमपि, **न तिष्ठति**। तथाहि **प्रकृतिजैः** स्वभावतो जातैः **गुणैः** रागद्वेषादिभिः, **अवशः**स्सन्, अस्वतन्त्रस्सन्, **सर्वः**- किञ्चित्करोमीत्यनवसितोऽपि जनः, **कर्म** प्रति, **कार्यते** - प्रवर्त्यते ॥ ५ ॥

अनात्मज्ञः चोदितं कर्म नारभते यदि, तदसत् इत्याह–

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

य:, कर्मेन्द्रियाणि वागादीनि, संयम्य - निरुध्य, मनसा - पारमार्थिकचिन्ताव्याजेन, इन्द्रियार्थान् - विषयान्, स्मरन् - चिन्तयन्, आस्ते - तिष्ठति, विमूढात्मा, विमूढो - विवेकशून्य आत्मा - मनो यस्य स मिथ्याचार इत्युच्यते ॥ ६ ॥

मिथ्याचाराद्विलक्षणो (कर्म कर्ता) गरीयानित्याह-.

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियै: कर्मयोगमसक्त: स विशिष्यते ॥ ७ ॥

हे अर्जुन: यस्तु, इन्द्रियाणि - ज्ञानेन्द्रियाणि, मनसा नियम्य - संयम्य, कर्मेन्द्रियै: वागादिभि:, कर्मयोगं, कर्मैव योग उपाय: तं, असक्त:- फलाकाङ्क्षारहित: सन् आरभते - अनुतिष्ठति, स- पुरुष:, विशिष्यते - मिथ्याचाराद्विशिष्टो भवति । चित्तशुद्ध्या ज्ञानवान् भवतीति भाव: ॥ ७ ॥

यत एवमत:-

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मण: ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मण: ॥ ८ ॥

हे अर्जुन:, त्वं, नियतं - नित्यं सन्ध्यावन्दनादिकर्म, कुरु, हि - यस्मात्कारणात्, अकर्मण: अकरणात्सकाशात् अनारम्भादित्यर्थ: । कर्म, ज्याय: - अधिकतरम् अपि च, अकर्मण:, सर्वकर्मरहितस्य ते - तव, शरीरयात्रा - शरीरस्थिति:, न प्रसिध्येत् - प्रकर्षेण सिद्धिं न गच्छेत् ॥ ८ ॥

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ननु द्रव्यार्जनादिकर्मणोऽहङ्कारममकारादिसर्वेन्द्रियव्याकुलतागर्भत्वेनास्य पुरुषस्य कर्मवासनया बन्धकं भविष्यति इत्याशङ्कायामाह—

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥

हे कौन्तेय, 'यज्ञो वै विष्णु': इति श्रुतेः यज्ञस्य - विष्णोः, अर्थ - आराधनं प्रयोजनं तस्मात् यज्ञार्थात् कर्मणोऽन्यत्र स्वार्थं, क्रियमाणे कर्मणीत्यर्थः। अयं कर्मकृत्, लोको जनः - कर्मबन्धनः, कर्मैव बन्धनं यस्य सः भवति। न तु यज्ञार्थादित्यर्थः । अतः तदर्थं - यज्ञार्थं, मुक्तसङ्गः- त्यक्तकर्मफलसङ्गस्सन्, कर्म, समाचर- प्रवर्तय ॥ ९ ॥

ब्रह्मवाक्येनापि कर्म श्रेयस्करमित्याह सहयज्ञा इत्यादिश्लोकचतुष्टयेन –

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ १० ॥

प्रजापतिः - ब्रह्मा, पुरा, यज्ञेन सह वर्तन्त इति सहयज्ञाः प्रजाः - त्रयो वर्णा इत्यर्थः । ताः । सृष्ट्वा उवाच - वक्ष्यमाणप्रकारेणोक्तवान् । किमिति, अनेन यज्ञेन, प्रसविष्यध्वं, प्रसवो वृद्धिरुत्पत्तिः, तां, कुरुध्वं। एष यज्ञः, वः- युष्माकं, इष्टान्-अभिप्रेतान्, कामान् फलविशेषान् दोग्धीति इष्टकामधुक्, अस्तु - भवतु ॥ १० ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्कथमिति अत्र आह–

देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥

हे जनाः अनेन - यज्ञेन, देवादीन्, इन्द्रादीन्, भावयत - वर्धयत, ते देवाः वः- युष्मान्, भावयन्तु - वृष्ट्यादिना आप्याययन्तु परस्परं देवाश्च यूयं च, अन्योन्यं भावयन्तः सन्तः परं - उत्कृष्टं, श्रेयः शुभं, क्रमेण ब्रह्मज्ञानप्राप्तिमित्यर्थः। स्वर्गं वा अवाप्स्यथ - प्राप्स्यथ ॥ ११ ॥

किं च –

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो भुङ्क्ते स्तेन एव सः ॥ १२ ॥

यज्ञभाविताः - यज्ञवर्धिताः, यज्ञैस्तोषिता इत्यर्थः। देवाः, वः - युष्मभ्यं, इष्टान् - अभिप्रेतान्, भोगान् - स्त्रीपशुपुत्रादीन्, दास्यन्ते हि - वितरिष्यन्ति हि। यः, तैः- देवैः दत्तान् - मृष्टान्नादिभोगान्, एभ्यः देवेभ्यः, अप्रदाय - अदत्त्वा, - भुङ्क्ते, सः स्तेनः - चोर एव, देवादिद्रव्यापहारीत्यर्थः ॥ १२ ॥

ये देवानिष्ट्वा भुञ्जानाः त एव साधवो नान्य, इत्याह –

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ १३ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यज्ञशिष्टं - वैश्वदेवादियज्ञावशिष्टं अमृताख्यं अशनं अशितुं शीलमेषामस्ति इति **यज्ञशिष्टाशिनः सन्तः** साधवः, **सर्वकिल्बिषैः** खण्डिन्यादि पञ्चसूनकृतैः ।

प्रमादकृतहिंसादिजनितैश्च पापैः पञ्चसूनाश्च स्मृतावुक्ताः ॥

'खण्डिनी पेषणी चुल्ली उदकुम्भी च मार्जनी ।
पञ्चसूना गृहस्थस्य ताभिस्स्वर्गं न विन्दति ॥'

इति । **मुच्यन्ते ये तु, आत्मकारणात्** - स्वोदरपूरणार्थमित्यर्थः। **पचन्ति** - पाकं निर्वर्तयन्ति, न तु वैश्वदेवाद्यर्थं **पापाः**- पापात्मानः **ते, अघं**- पापमेव, **भुञ्जते** ॥ १३ ॥

एवं ब्रह्मणोक्तमर्थं प्रतिपाद्य जगच्चक्रप्रवृत्तिकारणत्वादपि कर्मणः कर्तव्यतामाह 'अन्नात्' इत्यादित्रिभिः श्लोकैः—

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

अन्नात् - भुक्तात् रेतोलोहित परिणतात्, **भूतानि** प्राणिनः, **भवन्ति**- जायन्ते । 'अन्नाद्भूतानि जायन्त' (तै.उ.२.२) इति श्रुतेः । **पर्जन्यात्** - वर्षाधिदैवतात्, लक्षणया वर्षात्, **अन्नस्य सम्भवः** उत्पत्तिः **यज्ञात्** **पर्जन्यो भवति** ।

'अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥' (मै. उ. ६. ३७)

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इति स्मृतेः । स च पर्जन्यः, यज्ञाद्भवति, स च यज्ञः कर्मसमुद्भवः कर्मणः- ऋत्विग्यजमानव्यापाररूपात्, समुद्भवः समुत्पन्नः ॥ १४ ॥

तथैव –

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥

कर्म - पूर्वोक्तं - **ब्रह्मोद्भवं**, ब्रह्म - वेदः उद्भवो यस्य तत् । वेदस्तत्वं तपो ब्रह्म (अमरकोषः ३.११४) इत्यभिधानात् **विद्धि**- जानीहि । **ब्रह्म** - स च वेदः, **अक्षरः** परमात्मा समुद्भवो यस्य तत्, **अक्षरसमुद्भवं विद्धि।** 'अस्य महतो भूतस्य निःश्वसितमेवैतदृग्वेदो यजुर्वेदस्सामवेद' (बृ.उ.२.४.१०) इति श्रुतेः । यस्मात् कारणात् परमात्माख्यात् अक्षरात् पुरुषात् निश्श्वासवत् अप्रयत्नेन, (प्रवृत्तं) **तस्मात्**कारणात्, **ब्रह्म** सर्वार्थप्रकाशत्वात्, **सर्वगतं** सत्, **यज्ञे, नित्यं** - सदा, **प्रतिष्ठितं** - यज्ञविधिप्रधानत्वाद्वर्तत इत्यर्थः ॥ १५ ॥

एवं सर्वस्य यज्ञमूलत्वं दर्शयित्वा तदकरणे प्रत्यवायमाह –

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥

हे पार्थ, यः, एवं - उक्तप्रकारेण, **प्रवर्तितं** - परमेश्वरेण प्रवर्तितं, **चक्रं** - वेदयज्ञादिकं जगच्चक्रं, **इह** अस्मिन् लोके, **न अनुवर्तयति** - न अनुतिष्ठति । स्वार्थे 'णिच्' सः **अघायुः** अघं - पापं, आयुः - जीवनं यस्य सः इन्द्रियैः आरामः - आरमणं, विषयेषु क्रीडनं यस्य स **इन्द्रियारामः**, न त्वात्मारामः, अयज्ञशिष्टाशनवर्धितदेहमनस्त्वेनोद्रिक्त-

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रजस्तमस्कः आत्मावलोकनविमुखतया विषयभोगैकरतिः भवतीति भावः। अत एव मोघं - वृथा, जीवति। 'न कर्मणामनारम्भात्' (भ.गी. ३.४) इत्येतदन्तेन ग्रन्थेन ब्रह्मनिष्ठा योग्यताप्राप्तेः प्रागनात्मज्ञेन ब्रह्मज्ञानार्थं कर्म कर्तव्यमिति भगवदाशयः ॥ १६ ॥

जीवन्मुक्तस्य वर्णाश्रमोचितकर्मगन्धोऽपि नास्तीत्याह 'यस्तु' इति द्वाभ्याम् –

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते ॥ १७ ॥

यो मानवस्तु ब्रह्मनिष्ठः, आत्मनि रतिः, प्रीतिर्यस्य सः आत्मरतिरेव न विषयेषु । आत्मनैव तृप्तः, आत्मतृप्तश्च न त्वन्नपानादिना । आत्मन्येव च, सन्तुष्टः - सन्तोषितश्च, न तु स्रक्चन्दनगीतवादित्रनृत्तादौ भवेत् । तस्य, कार्यं - करणीयं, न विद्यते - किमपि नास्तीत्यर्थः ॥ १७ ॥

किं च–

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

तस्य - ब्रह्मनिष्ठस्य, इह - लोके, कृतेन कर्मणा, अर्थः- प्रयोजनं पुण्यं, नास्ति । अकृतेन - कर्माकरणेन, कश्चन-कोऽपि प्रत्यवायो नास्ति । ज्ञानाग्निदग्धकर्मत्वात् अस्य ब्रह्मनिष्ठस्य। किञ्च, सर्वाणि भूतानि ब्रह्मादिस्तावरान्तानि, तेषु सर्वेषु कोऽपि अर्थव्यपाश्रय- प्रयोजनसंबन्धः नास्ति। कश्चित् भूतविशेषमाश्रित्य क्रियासाध्योऽर्थः नास्ति इति वाक्यार्थः ।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भजनादिकं कार्यम्। ज्ञानोत्पत्त्यनन्तरं सिद्धस्य विघ्नासम्भवाच्चिकीर्षा कापि नास्तीति भावः । विघ्नसद्भावे - 'तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः' (बृ. उ.१.४.१०) इति श्रुतेः।

दोग्ध्री धेनुर्यथा वन्ध्या दुःखदा गृहमेधिनाम् ।
तथैव ज्ञानवान्विप्रो देवानां दुःखदो भवेत् ॥"

इति स्मरणाच्च। विघ्नराहित्ये तु - "तस्य ह न देवाश्च नाभूत्या ईशते आत्मा ह्येषाँ्स भवति (बृ. उ.१.४.१०) इति श्रुतेः । अस्यार्थः- 'चने' त्यव्ययं अप्यर्थे। देवा अपि अस्यात्मतत्वज्ञस्य, अभूत्यै - ब्रह्म-भावप्रतिबन्धाय, नेशते - न शक्नुवन्ति। इति ॥ १८ ॥

एवमारूढस्यैव कर्मपरित्यागः। आरुरुक्षुणा त्वया कर्म कर्तव्यमित्याह—

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥ १९ ॥

तस्मात् - कारणात्, त्वं, असक्तः - फलसङ्गवर्जितस्सन्, सततं - नित्यं, कार्यं - कर्तव्यं, कर्म समाचर सम्यगाचर, हि - यस्मात्कारणात्, असक्तः कर्म आचरन् परमेश्वरार्थं कर्म कुर्वन्नित्यर्थः । पूरुषः - पुरुषः परं मोक्षं, आप्नोति, विशुद्धान्तःकरणज्ञानद्वारेणेत्यर्थः ॥ १९ ॥

ज्ञानयोगाधिकारिणोऽपि कर्मयोग एव आत्मदर्शने श्रेयानिति शिष्टाचारं दर्शयति—

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ २० ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जनको वै देह आदिर्येषां जनकादयो - राजर्षयः कर्मणैव, संसिद्धिं चित्तशुद्धिद्वारा सम्यग्ज्ञानं, आस्थिताः- प्राप्ताः हि पूर्वैः यद्यपि अनात्मज्ञैरेव कर्तव्यं कृत्यं, तद्वदात्मज्ञेन कृतकृत्येन किं कर्तव्यमस्तीति मन्यसे, तथापि प्रारब्धकर्माधीनस्त्वं, लोकसङ्ग्रहं, लोकस्य - जनस्य, सङ्ग्रहः - कुमार्गप्रवृत्तिनिवारणं, तदेव प्रयोजनं सम्पश्यन्, कर्तुं - कर्म कर्तुं, अर्हसि ॥ २० ॥

लोकसङ्ग्रहः किमर्थमित्याशङ्क्यायामाह—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

श्रेष्ठः - ब्रह्मनिष्ठः यद्यत् कर्म, आचरति करोति, इतरः, पामरो जनः तत्तत् - कर्मैव, आचरति। किं च स - श्रेष्ठः यत् - लौकिकं वैदिकं वा प्रमाणं - मर्यादां, कुरुते- करोति, लोकः - पामरजनः, तत्- प्रमाणं अनुवर्तते - अनुसरति, तदेव प्रमाणीकरोतीत्यर्थः। अतो लोकरक्षणार्थं शिष्टतया प्रथितेन स्ववर्णाश्रमोचितं कर्म सकलं सर्वदा अनुष्ठेयम् । अन्यथा लोकनाशजनितं पापं ज्ञानयोगादप्येनं प्रच्यावयेदिति भावः ॥ २१ ॥

अवाप्तसमस्तकामोऽप्यहं लोकरक्षणार्थं कर्म करोमि इत्याह—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे पार्थ, मे - मम, कर्तव्यं - कर्म, किञ्चन नास्ति। त्रिषु लोकेषु- भुवनेषु, अनवाप्तं - अप्राप्तं सत् प्राप्तव्यं - अवाप्तव्यं, नास्ति। तथापि, कर्मणि, वर्ते वर्तमानोऽस्मि, कर्म करोम्येवेत्यर्थः ॥ २२ ॥

ननु त्वया कर्मण्यकृते कस्य किं भवेत् इत्यत्राह –

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

हे पार्थ अहं जातु कदाचित्, अतन्द्रितः अप्रमत्तस्सन्, कर्मणि, यदि, न वर्तेयं, कर्म नानुष्ठेयं चेदित्यर्थः। मनुष्याः सर्वशः सर्वप्रकारैः, मम वर्त्म-मार्गं, अनुवर्तन्ते। आर्षत्वाद्भविष्यदर्थे लट्। अनुवर्तेरन् ॥ २३ ॥

तथा चेत् को दोष इत्यत्राह–

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

अहं कर्म, न कुर्यां चेत्, इमे लोका उत्सीदेयुः । लोकस्थित निमित्तककर्माभावात् विनश्येयुः । किञ्च, सङ्करस्य - वर्णसङ्करस्य, कर्ता स्यां - भवेयम्, तेन कारणेन इमाः, प्रजाः, उपहन्यां - उपहतिं कुर्याम् - लोकानुग्रहार्थं प्रवृत्तस्य ईश्वरस्य लोकोपहननम् अननुरूपं स्यात् । अतः सर्वनियामकेन मया कर्म क्रियत इति भावः ॥ २४ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अतः प्राकृतवत् ब्रह्मनिष्ठेनापि लोकानुग्रहार्थं कर्म कर्तव्यमित्युपसंहरति –

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥ २५ ॥

हे भारत, **अविद्वांसः**, अनात्मज्ञाः, **कर्मणि सक्ताः** अस्मिन्, कर्मणि क्रियमाणे फलमेतद्भविष्यतीति तत्पराः, **यथा** – येन प्रकारेण, **कर्म, कुर्वन्ति, लोकसङ्ग्रहं**, लोकस्य सङ्ग्रहः - उन्मार्गप्रवृत्तिनिवारणं तं, **चिकीर्षुः** - कर्तुमिच्छुः, **विद्वान्** - आत्मज्ञः, **असक्तस्सन्**, कर्मफला-सङ्गवर्जितस्सन्, **तथा** तेन प्रकारेण, **कुर्यात्** ॥ २५ ॥

ननु सर्वेषामनायासात्मज्ञानोपदेशेनैव कृतार्थत्वात् किमायासहेतुकर्म-नियोगेन इति, अत आह–

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥

विद्वान् - ज्ञानी, **कर्मसङ्गिनां** - कर्मण्यसङ्गवतां, **अज्ञानां** - अविवेकिनां, **बुद्धिभेदं** - कर्तव्यं कर्म भोक्तव्यं चास्य कर्मणः फलमिति निश्चितायाः बुद्धेर्भेदःचालनं, तं, **न जनयेत्** - नोत्पादयेत् । तर्हि किं कर्तव्यमिति चेत्, **युक्तः** सावधानो भूत्वा, **समाचरन्** सन्, **सर्वकर्माणि, जोषयेत्** - कारयेत् इत्यर्थः । अयं भावः - अज्ञानां बुद्धिभेदे सति अविश्वासात् कर्म नाचरन्ति । अतः तत्वज्ञानं नोत्पद्यते । तस्मात् उद्भ्रंशो भवेदिति ॥ २६ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यद्यपि कर्म पण्डितपामरसाधारणं तथापि कर्तृत्वतारतम्यमाह 'प्रकृतेः' इति श्लोकद्वयेन–

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥ २७ ॥

अहङ्कारविमूढात्मा, प्रकृतेः गुणैः प्रकृतिकार्यैः अहङ्कारविमूढात्मा, कार्यकारणसंघातः आत्मप्रत्ययोऽहङ्कारः, तेन, विविधं - नानाविधं, मूढ आत्मा अन्तःकरणं यस्य स पुरुषः प्रकृतेः - सत्वरजस्तमसां साम्यावस्था प्रकृतिः प्रधानमित्यर्थः । तस्या गुणैः - विकारैः कार्यकारणरूपैरिन्द्रियै-रित्यर्थः । सर्वशः - सर्वप्रकारेण, क्रियमाणानि लौकिकानि शास्त्रीयाणि यानि कर्माणि तानि, करोतीति कर्ता अहमिति मन्यते । अहमेव करोमीति मन्यत इत्यर्थः ॥ २७ ॥

ज्ञानी तु न तादृश इत्याह–

तत्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८ ॥

हे महाबाहो, गुणकर्मविभागयोः गुणाः - सत्त्वादयः, क्रियन्त इति कर्माणि च तेषां विभागौ विभजने, तयोः "नाहं गुणात्मकः" इति गुणेभ्य आत्मनो विभागः 'न मे कर्माणि इति कर्मभ्योऽप्यात्मनो विभाग' इत्याशयः । तत्त्वं याथार्थ्यं वेत्तीति तत्ववित् । गुणाः करणात्मकाः गुणेषु विषयात्मकेषु वर्तन्ते नाहमिति मत्वा, न सज्जते - सक्तिं न करोति ॥ २८ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

'न बुद्धिभेदं जनयेत्' इत्युक्तमुपसंहरति—

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥ २९ ॥

ये **प्रकृतेः** - प्रधानस्य, **गुणसंमूढाः गुणैः** - सत्त्वरजस्तमोभिः - संमूढास्सन्तः, **गुणकर्मसु**, गुणाः इन्द्रियाणि, **कर्माणि** - तत्कर्माणि च, तेषु, **सज्जन्ते** - सक्ताः भवन्ति **मन्दान्** - मन्दप्रज्ञान्, अत एव, अकृत्स्नं स्वल्पं कर्मफलमात्रं विन्दन्तीति **अकृत्स्नविदः तान्** अज्ञान्, **कृत्स्नवित्** - आत्मवित्, **न विचालयेत्** । बुद्धिभेदकरणमेव चालनं, तन्न कुर्यादित्यर्थः ॥ २९ ॥

कर्माधिकारिणा मुमुक्षुणा त्वया वक्ष्यमाणप्रकारेण कर्म कर्तव्यमित्याह—

मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा ।
निराशीनिर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

सर्वाणि कर्माणि, मयि - सर्वज्ञे परमेश्वरे, **संन्यस्य** निक्षिप्य, **अध्यात्मचेतसा** - विवेकबुद्ध्या, **निराशीः** - निष्कामः **निर्ममः**, निर्गतो ममकारो यस्य स, **भूत्वा**, **विगतज्वरः**, विगतसन्तापस्सन्, **युध्यस्व** ।

अस्मिन्नर्थे श्रुतिरपि—

'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत् ॥ ३० ॥

(बृ.उ.४.४.१२)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवं मदुक्तं सर्वपुरुषार्थसाधकमित्याह–

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥

श्रद्धावन्तः - मद्वाक्ये विवासवन्तः, अनसूयन्तः - परमगुरौ मय्यसूयां न कुर्वन्तः ये - मानवाः, मे - मम, इदं उक्तलक्षणं, मतं अभिप्रायं अनुतिष्ठन्ति - अनुवर्तन्ते, तेऽपि कर्मभिः पुण्यपापैः मुच्यन्ते- मुक्ता भवन्ति। ज्ञानिनो मुक्ता एव। ज्ञानरहिता अप्येवमाचरन्तः क्रमेण मुक्ता भवन्ती इति 'अपि' शब्दस्य तात्पर्यम् ॥ ३१ ॥

मदुक्ताकरणे प्रत्यवायो भवेदित्याह –

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥

ये तु, एतत् - मम मतं, अभ्यसूयन्तः - असूयांकुर्वन्तः, नानुतिष्ठन्ति - नानुवर्तन्ते, अचेतसः - अविवेकिनः अत एव सर्व-ज्ञानविमूढान्, सर्वेषु ज्ञानेषु विविधं मूढाः तान्, तान् नष्टान् - नाशं गतान्, विद्धि ॥ ३२ ॥

ननु सर्वे कस्मात् कारणात् त्वन्मतं स्वधर्मं च नानुतिष्ठन्तः परधर्म-मनुतिष्ठन्ति। त्वच्छासनातिक्रमदोषात् कथं न बिभ्यति च इत्यत आह –

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ज्ञानवानपि - सर्वजनश्च, स्वस्याः - स्वकीयायाः, वर्तमान-जन्माद्यभिव्यक्तपूर्वकृतधर्माधर्मादिसंस्कारः प्रकृतिः। तस्याः सदृशं अनुरूपं, चेष्टते प्रवर्तते। किमुत मूर्खः। यस्मात् भूतानि - सर्वे प्राणिनः, प्रकृतिं यान्ति - अनुवर्तन्ते, एवं सति निग्रहः - इन्द्रियनिग्रहः - यद्वा शासनं, किं करिष्यति, न किमपीत्यर्थः। मम वा अन्यस्य वा प्रकृति-दुर्निग्रहेति वाक्यशेषः ॥ ३३ ॥

ननु प्रकृतिः दुरतिक्रमा चेत् शास्त्रानर्थक्यं स्यादित्यत आह–

इन्द्रियस्येन्द्रिस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

रागद्वेषौ, इष्टार्थे रागः, अनिष्टार्थे द्वेषः तौ, इन्द्रियस्येन्द्रियस्य-सर्वेन्द्रियाणामित्यर्थः। अर्थे - शब्दादिविषये, व्यवस्थितौ- अवश्यम्-भाविनौ, अतः तयोः- रागद्वेषयोः वशं- अधीनत्वं, न आगच्छेत्, न प्राप्नुयात् हि यस्मात्कारणात्, तौ - रागद्वैषौ, अस्य पुरुषस्य परिपन्थिनौ - श्रेयोमार्गस्य विघ्नकर्तृत्वात् शात्रवौ। लोके पुरुषस्य प्रकृतिः रागद्वेषपुरस्सरैव स्वकार्ये प्रवर्तयति। तदा स्वधर्मपरित्यागः परधर्मानुष्ठानं च भवति। ततः प्रागेव शास्त्रदृष्ट्या अन्तश्शत्रुभूतरागद्वेषौ नियम्य स्वधर्मे प्रवर्तितव्यमिति भावः ॥ ३४ ॥

महासङ्कटे प्राप्तेऽपि स्वधर्म एव श्रेयानित्याह–

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

स्वनुष्ठितात् - सम्यगाचरितात्, परधर्मात्, परस्य धर्मः तस्मात्, स्वव्यतिरिक्तवर्णाश्रमाचारादित्यर्थः । विगुणोऽपि - वीतगुणोऽपि, स्वधर्म एव श्रेयान् - श्रेष्ठः । स्वधर्मे स्थितस्येति शेषः । निधनं - मरणमपि, श्रेयः परं, परधर्मे स्थितस्य जीवितादिति भावः । परधर्मस्तु, भयं - नरकपतनादिभीतिं आवहतीति प्रापयतीति भयावहः ॥ ३५ ॥

यत्, 'ध्यायतो विषयान् '(भ.गी.२.६२) इति 'तौ ह्यस्य परिपन्थिनौ' (भ.गी.३.३४) इति चोक्तम् तत् विशेषेणावधार्य तन्निश्चितार्थं जिज्ञासुः अर्जुन उवाच –

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

वृष्णेर्गोत्रापत्यं वार्ष्णेयः । हे वार्ष्णेय - कृष्ण, अथ अनन्तरं, अयं पूरुषः, अनिच्छन्नपि - पापं कर्तुमवाञ्छन्नपि, बलात् - राज्ञा बलात्कारान्नियोजितो भृत्य इव, केन हेतुना, प्रयुक्तः- प्रेरितः सन्, पापं- दुष्कर्म, चरति - आचरति ॥ ३६ ॥

यं हेतुं पृच्छसि तं हेतुं सावधानः शृण्विति ।

श्री भगवानुवाच–

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

एषः - त्वया पृष्टो हेतुः रजोगुणात् समुद्भवतीति रजोगुणसमुद्भवः कामः काम एव । क्रोधोऽपि एष एव । काम एव केनचित् प्रतिहतः सन्

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्रोधरूपेण परिणमत इति भावः । किञ्च एष कामः दुष्पूरत्वात् महदशनं यस्य सः महाशनः अत एव महापाप्मा सुतरां पापस्वरूपः । कामेन प्रेरितो जन्तुः पापं करोति । तस्मात्कामस्य पापस्वरूपत्वम् । एनं - कामं, इह - मोक्षमार्गे, वैरिणं - शत्रुं, विद्धि । तस्मात् मुमुक्षुणा वक्ष्यमाणप्रकारेण कामो जेतव्य इति भावः ॥ ३७ ॥

दृष्टान्तैः कामस्यावरणत्वं विवृणोति –

धूमेनाव्रियते वह्निर्यथाऽदर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

यथा धूमेन सहजेन, वह्निः, आव्रियते - आच्छाद्यते, यथा मलेन मालिन्येन, आदर्शः - मुकुरश्च, आव्रियते, यथा उल्बेन गर्भः, वेष्टनचर्मणा जरायुणेति यावत् । आवृतः आच्छादितः, तथा तेन - कामेन, इदं - ज्ञानं, आवृतम् - आच्छादितम् ॥ ३८ ॥

कामेनावृतमिदंशब्दवाच्यं यत्तत्किमित्याशङ्कायामाह–

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

हे कौन्तेय, दुष्पूरेण दुःखेन पूरणमस्येति दुष्पूरः, तेन अनलेन न विद्यते अलं - पर्याप्तिर्यस्य, तेन कामरूपेण, काम इच्छैव रूपं यस्य तेन, ज्ञानिनः, नित्यवैरिणा - नित्यशत्रुणा, ज्ञानी हि 'कामेनाहमनर्थेप्रयुक्त' इति पूर्वमेव जानाति । अतो दुःखी च नित्यमेव भवति । तेनासौ कामो

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

ज्ञानिनो नित्यवैरी। मूर्खस्तु कामं 'तृष्णाकाले मित्रमिव पश्यति'। तत्कार्ये दु:खे प्राप्ते 'तृष्णया ह्यहं दु:खित्वमापादित' इति पश्चाज्जानाति। न पूर्वमेव। तस्मान्मूर्खस्य नित्यवैरी न भवतीत्याशय:। इदं ज्ञानं, आवृतं - आच्छादितम् ॥ ३९ ॥

'किमधिष्ठाय पुन: कामो ज्ञानस्यावरणत्वेन सर्वलोकस्य वैरी' इत्यपेक्षायां ज्ञाते शत्रोरधिष्ठाने सुखेन शत्रुनिबर्हणं कर्तुं शक्यमित्याह इन्द्रियाणीति श्लोकद्वयेन–

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

इन्द्रियाणि मनश्च बुद्धिश्च, अस्य - कामस्य, अधिष्ठानं, आश्रय इत्युच्यते, एष:- काम:, एतै: - इन्द्रियादिभि:, ज्ञानं, आवृत्य - आच्छाद्य- देहिनं - शरीरिणं, विमोहयति - विविधं मोहं - नयति ॥ ४० ॥

यत एवम्–

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥

हे भरतर्षभ, त्वं, तस्मात् कारणात्, आदौ - विमोहात्पूर्वमेव, इन्द्रियाणि, नियम्य, ज्ञानविज्ञाननाशनं, शास्त्रत आचार्यतश्च आत्मादीनामवबोधो ज्ञानं, विशेषत: तदनुभवो विज्ञानं, तयो: श्रेय: प्राप्तिहेत्वो: नाशनं - नाशकरं, पाप्मानं - पापरूपं, एनं - कामं, प्रजहिहि - परित्यज ॥ ४१ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इन्द्रियाण्यादौ नियम्य कामं प्रजहिहीत्युक्तम् । तत्र किमाश्रयः कामं जह्यात् इत्यत्राह–

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥

पण्डिताः इन्द्रियाणि श्रोत्रादीनि पञ्च बाह्यपरिच्छिन्नस्थूल देहमपेक्ष्य सौक्ष्म्यान्तरस्थत्वव्यापित्वापेक्षया, पराणि - प्रकृष्टानि, आहुः - वदन्ति । तथा मनः - सङ्कल्पविकल्पात्मकं, इन्द्रियेभ्यः, परं प्रकृष्टम् । तथा, निश्चयात्मिका बुद्धिस्तु, मनसः परा, तथा यस्सर्वदृश्येभ्यो बुध्यन्तेभ्योऽभ्यन्तरः । यं देहिनमिन्द्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं सः बुद्धेः परतः साक्षित्वेनावस्थितः स परमात्मा ॥ ४२ ॥

उक्तार्थमुपसंहरति–

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मब्रह्मयोगो नाम तृतीयोऽध्यायः ॥

हे महाबाहो, एवं बुद्धेः, परं - आत्मानं, बुद्ध्वा ज्ञात्वा, आत्मना स्वेनैव, आत्मानं संस्तभ्य - सम्यक्, स्तम्भनं कृत्वा,

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

सम्यक् समाधायेत्यर्थः। दुरासदं, दुःखेनासादनं, प्राप्तिर्यस्य तं, दुर्विज्ञेयानेकविशेषमित्यर्थः। कामरूपं शत्रुं, जहि - मारय ॥ ४३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीशिष्य रामचन्द्रा नन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां कर्मब्रह्मयोगो नाम तृतीयोऽध्यायः ॥

॥ चतुर्थोऽध्यायः ॥

अध्यायद्वयेनोक्तसकलवेदार्थसारभूतयोगमुत्तरत्र विवक्षुः तमेव वंशकथनेन स्तुवन् 'इमम्' इत्यादिश्लोकत्रयेण श्रीभगवानुवाच–

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्॥ १ ॥

अहं, अव्ययफलत्वात् अव्ययं, मोक्षप्रदमिति भावः। इमं - अध्यायद्वयेनोक्तं, योगं - उपायं, विवस्वते सूर्याय, प्रोक्तवानस्मि। स च, विवस्वान्, मनवे स्वपुत्राय वैवस्वताय, प्राह - प्रोक्तवान्। स च मनुः इक्ष्वाकवे - स्वपुत्राय, आदिराजाय, अब्रवीत्॥ १ ॥

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परन्तप॥ २ ॥

हे परन्तप - शत्रुतापन, राजानश्च ते ऋषयो निमिप्रमुखा राजर्षय एव, परम्पराप्राप्तं - परम्परालब्धं, इमं - योगं, विदुः। महता- दीर्घेण,

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कालेन, इह - लोके स: - योग: नष्ट: विच्छिन्नसम्प्रदाय: प्रवृत्त: । तस्मात् इदानीन्तना: इमं योगं न जानन्ति इति भाव: ॥ २ ॥

स एवायं मया तेऽद्य योग: प्रोक्त: पुरातन: ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

मया, अद्य, पुरातन: सनातन:, स एवायं योग:, मे भक्त : सखा च - सुहृत्, असि - भवसि - इति, ते - तुभ्यं, प्रोक्त: । हि - यस्मात्, उत्तमं । एतत् - ज्ञानं, रहस्यं गोपनीयम् भवति ॥ ३ ॥

भगवता विप्रतिषिद्धमुक्तमिति कस्यचिद्बुद्धिर्मा भूदिति तत्परिहारार्थं चोद्यमिव कुर्वन् ।

अर्जुन उवाच –

अपरं भवतो जन्म परं जन्म विवस्वत: ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

भवत:- एव जन्म अपरं - अर्वाग्वसुदेवगृहे, विवस्वत: - आदित्यस्य जन्म - उत्पत्तिस्तु, परं - पूर्व सर्गादौ । त्वं आदाविमं योगं प्रोक्तवानसीति यत्, एतत् अविरुद्धार्थतया कथं विजानीयाम् ॥ ४ ॥

या वासुदेवेऽनीश्वरासर्वज्ञाशङ्का मूर्खाणां तां परिहरन् श्रीभगवानुवाच –

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥

हे अर्जुन ! मे तव च, बहूनि जन्मानि, व्यतीतानि अतिक्रान्तानि । सर्वाणि - तानि जन्मानि, अहं, वेद, नित्यशुद्धबुद्धमुक्तस्व-

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

भावत्वादनावरणज्ञानशक्तित्वाच्च जानामि । त्वं न वेत्थ, धर्माधर्मादि-प्रतिबद्धज्ञानशक्तित्वान्न जानीषे। अतो रूपान्तरेण सूर्यायोपदिष्टमिति भावः ॥ ५ ॥

तर्हि सर्वेश्वरस्य तव धर्माधर्माभावेऽपि कथं जन्मेत्यत्राह –

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥

अहं, अजोऽपि - जन्मरहितोऽपि **सन्**, तथा, **अव्ययः**- अक्षीणः, **आत्मा** - ज्ञानशक्तिस्वभावो यस्य सः अव्ययात्मापि **सन्**, **भूतानां** - ब्रह्मादिस्तम्बपर्यन्तानां, **ईश्वरः** - ईशनशीलोऽपि **सन्** **स्वां** - स्वकीयां, वैष्णवीमिति यावत् । **प्रकृतिं** त्रिगुणात्मिकां मायां, **अधिष्ठाय** - वशीकृत्य, **आत्ममायया** - आत्मनो मायया, न परमार्थतो लोकवत्, **सम्भवामि** देहवान् इव जात इव, भवामि ॥ ६ ॥

तच्च जन्म कदा किमर्थमित्यत्राह–

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥

हे **भारत**, **यदा यदा** - यस्मिन् काले, **धर्मस्य** - वेदोदितस्य वर्णाश्रमव्यवस्थया व्यवस्थितस्य कर्तव्यस्य धर्मस्य इत्यर्थः । **ग्लानिः** हानिः, **भवति**, **यदा**, **अधर्मस्य** - पापस्य, **अभ्युत्थानं**, उद्भवः च भवति, **तदा** - तस्मिन् काले, **अहं** - आत्मानं, मायया **सृजामि** लीलया अवतरामि इत्यर्थः ॥ ७ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्किमर्थमित्यत्राह–

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ ८ ॥

साधूनां - सन्मार्गस्थानां, परित्राणाय - परिरक्षणाय च, दुष्कृतं कुर्वन्तीति दुष्कृत: तेषां, पापकारिणां, विनाशाय च । किं च- धर्मस्य सम्यक्स्थापनं तदर्थं धर्मसंस्थापनार्थाय, युगेयुगे - प्रतियुगं, सम्भवामि- अवतरामि । कृतत्रेतादिनियमो नास्तीत्यर्थ: ॥ ८ ॥

तज्जन्मकर्मज्ञाने फलमाह–

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वत: ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

हे अर्जुन ! य:, दिव्यं - अप्राकृतं ऐश्वरं मे मायारूपं, जन्म तथा, साधुपरित्राणादि कर्म, एवं - यथोक्तं, तत्त्वत:- तत्त्वेन, यथावत्, वेत्ति- जानाति, स: पुरुष: देह: इमं देहं, त्यक्त्वा, पुनर्जन्म - पुनरुत्पत्तिं, नैति - न प्राप्नोति । किं तु मामेव, एति - प्राप्नोति ॥ ९ ॥

तव जन्मकर्मज्ञानेन कथं मोक्ष: स्यादिति चेत् एष मोक्षमार्गो नेदानीं प्रवृत्त: किन्तु पूर्वमप्यस्तीत्याह–

वीतरागभयक्रोधा मन्मया मामुपाश्रिता: ।
बहवो ज्ञानतपसा पूता मद्भावमागता: ॥ १० ॥

वीता:, विगता: रागश्च भयं च क्रोधश्च येभ्यस्ते वीतरागभयक्रोधा: मन्मया:- मत्स्वरूपा:, तद्रूपे मयट् । ईश्वराभेददर्शिन इत्यर्थ: । मां

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

परमेश्वरमेव, उपाश्रिता: - केवलज्ञाननिष्ठा इत्यर्थ: । बहव:- सत्पुरुषा:, ज्ञानतपसा - परमात्मज्ञानमेव तप:, तेन पूता: - शुद्धास्सन्त:, मद्भावं - ईश्वरभावं मोक्षं, आगता: - समनुप्राप्ता: । ज्ञानतप: पूतत्वादेव इतरतपोनिरपेक्षज्ञाननिष्ठा इति तात्पर्यम् ॥ १० ॥

ननु त्वमात्मज्ञानं सर्वेभ्य: किमर्थं न ददासि तस्मात्त्वय्यपि पक्षपातोऽस्ति इत्यत आह–

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्या: पार्थ सर्वश: ॥ ११ ॥

हे पार्थ, यथा - येन प्रकारेण यत्फलार्थितया ये मां प्रपद्यन्ते- भजन्ति - अहं, तान् - फलार्थिन:, तथैव तत्फलदानेन, भजामि- अनुगृह्णामि । यत:, फलार्थिनो मनुष्या: सर्वश: सर्वप्रकारै: मम- ईश्वरस्य, वर्त्म - भजनमार्गं, अनुवर्तन्ते । लोके जना; यं यं कामयित्वा यद्रूपं मां भजन्ति तं तं कामं तद्रूपेण ददामि । तत: सर्वात्मके मयि पक्षपातो नास्तीति भाव: ॥ ११ ॥

एवं त्वयि सर्वार्थान् दातुं समर्थे सति सर्वे जना: मुमुक्षव: सन्त: कस्मात्त्वामेव न प्रपद्यन्त इत्यत्राह–

काङ्क्षन्त: कर्मणां सिद्धिं यजन्त इह देवता: ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

कर्मणां सिद्धिं - फलनिष्पत्तिं, काङ्क्षन्त: - प्रार्थयन्त: जना: इह - अस्मिन् लोके, देवता: - इन्द्राद्या:, यजन्ते - भजन्ते । हि - यस्मात्, मानुषे लोके, कर्मणो जाता कर्मजा - पुत्रपश्वन्नाद्या, सिद्धि: क्षिप्रं शीघ्रं

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भवति । 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम् (ब.उ. १.४.१०) इति श्रुते: । अज्ञा: स्वात्मत्वेन देवतामविभाव्य फलकाङ्क्षया स्वेतरदैवतानि कर्मभूमौ भजन्तीति भाव: ॥ १२ ॥

ननु सर्वे मनुष्या: केन हेतुना भगवन्मार्गमेव नियमेन नानुवर्तन्त इत्यत्राह–

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागश: ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

मया - सर्वज्ञेन, चत्वार एव वर्णा: **चातुर्वर्ण्यं गुणकर्मविभागश:** **गुणानां** - सत्त्वरजस्तमसां, कर्मणां शमदमादीनां **विभागश:** पृथक्करणं न विभागस्तु, तत्र सत्त्वगुणप्रधानो ब्राह्मण: । तस्य शमदमतपस्सत्यादीनि कर्माणि, सत्त्वमिश्ररजोगुण प्रधान: क्षत्रिय: । तस्य शौर्यतेजोधृत्यादीनि कर्माणि । तमोमिश्ररजोगुणप्रधानो वैश्य: । तस्य कृष्यादीनि । रजोमिश्रतमोगुणप्रधानश्शूद्र: । तस्य शुश्रूषैव कर्मेति स्पष्टमुत्पादितम् । तच्चेदं चातुर्वर्ण्यं अन्येषु लोकेषु नास्ति । अतो मानुषे लोक एवेति विशेषणम् ।

नन्वेवं सति चातुर्वर्ण्यस्य सर्गादे: कर्मण: कर्तृत्वात् फलेन युज्यसे । अत: त्वं नित्यमुक्तश्च नित्येश्वरश्च न भवसि इत्याशङ्क्याह - **तस्येति** । मायाबलेन तस्य कर्मण: कर्तारमपि सन्तं मां परमार्थेन अकर्तारम्, अत एव **अव्ययं** - नाशरहितं, **विद्धि** - जानीहि । विचित्रशक्तिमत्त्वात् सर्वे जना मामेवानुवर्तन्त इति भाव: ॥ १३ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

पुनरप्यकर्तृत्वं तत्परिज्ञानफलं चाह -

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

विचित्रसृष्ट्यादीनि तानि कर्माणि, न मां लिम्पति अहङ्काराभावात् आसक्तं न कुर्वन्ति । मे कर्मफले कर्मणां फले स्पृहा, तृष्णा च नास्ति, अवाप्तकामत्वात् । संसारिणां तु अहं कर्तेत्यभिमानश्च कर्मसु स्पृहा च तान् तत्फलेषु लिम्पन्ति। तदभावान्न मां कर्माणि लिम्पन्तीति भावः । इत्येवं योऽन्योऽपि माम् आत्मत्वेन "नाहं कर्ता न मे कर्मफले स्पृहा' इत्यभिजानाति फलसङ्गहेतुभिः कर्मभिर्न बध्यते - मुच्यत इत्यर्थः । मत्स्वरूपं जानन्नेव मुक्तः, किमुत अहमिति भगवदाशय : ॥ १४ ॥

'ये यथा मां प्रपद्यन्त' इति चतुर्भिः श्लोकैः प्रासङ्गिकमीश्वरस्य वैषम्यं परिहृत्य पूर्वोक्तमेव कर्मयोगं प्रपञ्चयितुम् अनुस्मारयति–

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

निरहङ्कारेण कृतं बन्धकं न भवति इति एवं ज्ञात्वा पूर्वैः अतिक्रान्तैः मुमुक्षुभिरपि, कर्म कृतम् । तस्मात् - कारणात्, त्वं, पूर्वैः - जनकादिभिः, कृतं, पूर्वतरं - पुरातनं, कर्मैव, कुरु । अज्ञेन तत्त्वशुद्ध्यर्थं तत्त्वविदा च लोकसङ्ग्रहार्थं कर्म कर्तव्यमिति भावः ॥ १५ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वक्ष्यमाणस्य कर्मणो दुर्विज्ञेयतामाह–

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

कर्म, किं - कीदृशं वा, अकर्म किं - कीदृशं वा, इति, अत्र - अस्मिन् कर्माकर्मज्ञानविषये, कवयः- मेधाविनोऽपि, मोहिता मोहं गताः। अतः ते, तत् कर्म अकर्म च, प्रवक्ष्यामि, यत् - तत्कर्म अकर्म च , ज्ञात्वा अशुभात् - संसारात्, मोक्ष्यसे - मुक्तो भविष्यसि। अयं भावः- कर्म नाम देहादिचेष्टा, लोकप्रसिद्धम् अकर्म च तदक्रिया तूष्णीमासनम्। तत्र किं बोद्धव्यम् ? इत्येतत् त्वया न मन्तव्यम् । तद्वक्ष्यामि शृण्विति ॥ १६ ॥

केन हेतुना कवयो मुह्यन्ति इत्यत्राह–

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥

कर्मणः शास्त्रविहितकर्मणः तत्त्वं, बोद्धव्यम् अस्तीति शेषः । तथा, विकर्मणः - प्रतिषिद्धकर्मणोऽपि, तत्त्वं बोद्धव्यम् अस्ति । अकर्मणः- कर्मराहित्यस्य तूष्णीम्भावस्य च, तत्त्वं, बोद्धव्यम् अस्ति। हि - यस्मात्, 'कर्मणाम्' इत्युपलक्षणार्थम् । कर्माकर्मविकर्मणामित्यर्थः । गतिः - याथार्थ्यं, तत्त्वमिति यावत् । गहना विषया दुर्विज्ञेया ॥ १७ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

-0. In Public Domain. Digitization by eGangotri. Funding MI

ननु कर्मादिर्बोद्धव्यं तत्त्वं वक्ष्यामीति प्रतिज्ञातं यत् तद्वक्तव्यमित्यत्राह –

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

यः क्रियत इति कर्म व्यापारमात्रं, तस्मिन्, कर्मणि, अकर्म कर्माभावं पश्येत्, देहेन्द्रियव्यापारसद्भावेऽपि साक्षिणः स्वस्याकर्तृत्वं पश्येत्, स कृतकृत्य इत्यर्थः । यः अकर्मणि - कर्माभावे ब्रह्मणि ज्ञाते कर्म सर्वं कृत्यं कृतमिति यः पश्येत्, स च कृतार्थः तदुक्तम्–

स्नातं तेन समस्ततीर्थनिचये, दत्तं महीमण्डलं
विप्रेभ्य : पितृदेवतास्सुरगणास्सर्वेऽपि सन्तर्पिताः ।
जप्ता मन्त्रसहस्रकोटिरमुना तप्तं च तीव्रं तपो
यस्य ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्यं मनः ।।'

(ल.यो.वा ६.१७.३४)इति ।

सः मनुष्येषु, बुद्धिमान् - निश्चयात्मकबुद्धियुक्तः । तमेव स्तौति स, युक्तः - योगी, च, कृत्स्नकर्मकृत् - समस्तकर्मकृच्च ।

इममेव श्लोकं केचित् एवं व्याचक्षते । कथम् - नित्यानां किल कर्मणां ईश्वरार्थेनानुष्ठीयमानानां बन्धकाभावात् तान्यकर्माणीत्युच्यन्ते । तेषां चाकरणमकर्म। तस्य प्रत्यवायफलत्वात् कर्मेत्युच्यते । तत्र नित्ये कर्मण्यकर्म यः पश्येत् फलाभावात् तथा अकर्मणि नित्यानामकरणे, कर्म नरकादि प्रत्यवायफलं प्रयच्छतीति यः पश्येत्' इति । एतदसत् । 'यज्ज्ञात्वा मोक्ष्यसेऽशुभात्' इति भगवद्वचनेन एवं ज्ञानात् शुभात् मोक्षणानुपपत्तेः । तस्माद्यथाकृतार्थ एव समीचीनः ।

ruvayoor Campus Palm-Leaf Manuscript Collection, Thrissu

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किं च - 'अशोच्यानन्वशोच' इत्यारभ्य 'सर्वधर्मान् परित्यज्य' इत्यन्तेन ग्रन्थेन नैष्कर्म्यमेव प्रतिपादितम् । नत्वन्यत् । उपक्रमोपसंहारयोर्बलीयस्त्वात् ॥ १८ ॥

तदेतत्कर्मणि अकर्मादिदर्शनं स्तूयते–

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९ ॥

यस्य - यथोक्तदर्शिनः **सर्वे** - यावन्तः, समारभ्यन्त इति **समारम्भाः** कर्माणि, **कामसङ्कल्पवर्जिताः**, कामैः तत्कारणैः सङ्कल्पैश्च वर्जिताः भवन्तीति शेषः। मुधैव चेष्टामात्रा अनुष्ठीयन्त इति भावः । **बुधाः** - ब्रह्मविदः - **ज्ञानाग्निदग्धकर्माणं**, कर्मादौ अकर्मादिदर्शनं ज्ञानं, तदेवाग्निः तेन दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तम् । **तं**, परमार्थतः, **पण्डितं**, **आहुः** ॥ १९ ॥

एतदेव विवृणोति–

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥ २० ॥

यः, **कर्मफलासङ्गं**, कर्मफले, आसङ्गः - कर्तृत्वाभिमानः तं, **त्यक्त्वा**, **नित्यतृप्तः** - यथोक्तेन ज्ञानामृतेन निरन्तरं तृप्तः, विषयेषु निराकाङ्क्ष इत्यर्थः । **निराश्रयः** सन्, यमाश्रित्य पुरुषार्थं सिसाधयिष्यति स आश्रयः । निर्गत आश्रयो यस्मात्सः दृष्टादृष्टेष्टफलसाधनरहित इत्यर्थः । तेन एवम्भूतेन प्रयोजनाभावात् ससाधनं कर्म त्यक्तव्यमेवेति प्राप्ते ततो निर्गमनासम्भवात् लोकसङ्ग्रहचिकीर्षया शिष्टविगर्हणपरिजिहीर्षया वा

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

-0. In Public Domain. Digitization by eGangotri. Funding MI

पूर्ववत् कर्मण्यभिप्रवृत्तोऽपि स निष्क्रियात्मदर्शनसम्पन्नत्वात् किञ्चिदपि न करोत्येव ॥ २० ॥

यः पुनः ससाधनं कर्म सन्न्यस्य ब्रह्मनिष्ठस्सन् शरीरयात्रामात्रचेष्टो वर्तते स मुक्त इत्येतमर्थं दर्शयितुमाह–

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

निर्गता आशिषः कामना यस्मात् निराशीः । यतचित्तात्मा, यतौ चित्तं च कार्यकरणसंघात् आत्मा च तौ येन सः । त्यक्तसर्वपरिग्रहः त्यक्तः सर्वः परिग्रहो येन सः प्राकृतवस्तुनि ममतारहित इत्यर्थः । केवलं, शारीरं- शरीरस्थितिमात्रं कर्तृत्वाभिनिवेशरहितः कर्म, कुर्वन् जनः, किल्बिषं - बन्धरूपं पापं, नाप्नोति । संसारान्मुक्तो भविष्यतीत्यर्थः ॥ २१ ॥

पूर्वश्लोकार्थमेव पुनरपि विवृणोति–

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समस्सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥

यदृच्छालाभसन्तुष्टः, अप्रार्थितोपनतो लाभो यदृच्छालाभः तेन सन्तुष्टः - सञ्जातालम्प्रत्ययः, द्वन्द्वातीतः - शीतोष्णादिद्वन्द्वान्यतीतः, अविषण्णचित्त इत्यर्थः । विमत्सरः विगतमत्सरः, निर्वैरबुद्धिरिति यावत् । यदृच्छालाभस्य सिद्धौ चासिद्धौ च, समः-तुल्यः, पुमान्, कर्मेति शेषः । कृत्वापि, न निबध्यते संसारं न प्रतिपद्यत इत्यन्वयः ॥ २२ ॥

ruvayoor Campus Palm-Leaf Manuscript Collection, Thrissu

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यस्यैवं कर्माभावो दर्शित: तस्यैवं भवतीत्याह–

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतस: ।
यज्ञायाचरत: कर्म समग्रं प्रविलीयते ॥ २३ ॥

गतसङ्गस्य- सर्वतो निवृत्तासक्ते: मुक्तस्य - निवृत्तधर्माधर्मादि अबन्धनस्य, ज्ञान एवावस्थितं चेतो यस्य तस्य, ज्ञानावस्थितचेतस:, यज्ञाय - यज्ञपरिपालनार्थं, आचरत:- लोकसङ्ग्रहार्थं कर्म कुर्वत: समग्रं- सकलं कर्म, प्रविलीयते लीनं भवति, विनश्यतीत्यर्थ: । अधिगत-परमार्थेन लोकसङ्ग्रहार्थं कर्म कृतमपि अकृतमेवेत्याशय: ॥ २३ ॥

जीवन्मुक्तेन कृतं कर्माप्यकृतमेवेत्युक्त्वा सम्प्रति सर्वस्य सपरिकरस्य कर्मणो ब्रह्मस्वरूपतामाह–

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

ब्रह्मवित् अनेनार्पयति हवि : अग्नौ इत्यर्पणम् । स्रुक् स्रुवादि तत् ब्रह्मैवेति पश्यति । यथा शुक्तिकायां रजताभावं पश्यति इति भाव: । तथा यत्, हवि:- हविर्बुद्ध्या गृह्यमाणमाज्यादिकं तद्ब्रह्मैव । ब्रह्मैवाग्निस्तस्मिन्, ब्रह्माग्नौ ब्रह्मणा कर्त्रा ब्रह्मैव कर्म कर्तेत्यर्थ: । तेन हुतं हवनक्रिया ब्रह्मैव, । ब्रह्मकर्मसमाधिना ब्रह्मैव तस्मिन् समाधि: चित्तैकाग्र्यं यस्य तेन, तेन गन्तव्यं फलं ब्रह्मैव न फलान्तरम् । एवं लोकसङ्ग्रहं चिकीर्षुणापि क्रियमाणं कर्म परमार्थत: अकर्म ब्रह्मबुध्युपमृदित्वात् । तस्मात् ब्रह्मैवेदं सर्वं इति जानत: कर्माभाव: कारकबुद्ध्यभावादित्यर्थ: ॥ २४ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

-0. In Public Domain. Digitization by eGangotri. Funding MI

तत्राधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थमेव दैवमेवापर इत्यादिभिरष्टभिः श्लोकैरन्ये यज्ञा उपक्षिप्यन्ते–

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति॥ २५॥

अपरे - केचिद्योगिनः, कर्मिणः, **दैवं**, इज्यन्तेऽनेन देवा इति दैवः यज्ञः यज्ञमेव, **पर्युपासते** - आसक्त्याकुर्वन्ति, न तु ब्रह्मार्पणबुद्ध्या, **अपरे** केचिज्ज्ञान योगिनः **यज्ञेन** - हविस्स्रुवादि यज्ञसाधनेनैव, **यज्ञं** यज्ञ आत्मा आत्मनामसु यज्ञशब्दपाठात्[38]। तं, परमार्थतः परं ब्रह्मैव सन्तं बुद्ध्याद्युपाधियुक्तं अध्यस्तसर्वोपाधिकं आहुतिरूपं, **ब्रह्माग्नौ**-ब्रह्म च तदग्निस्तस्मिन्, **उपजुह्वति** - प्रक्षिपन्ति। 'सत्यं ज्ञान-मनन्तं ब्रह्म' (तै. उ. २.९.९). 'विज्ञानमानन्दं ब्रह्म' (बृ.उ.३.९.२८) 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ.उ.३.४.२) 'य आत्मा सर्वान्तर' (बृ.उ.३.४.१) इत्यादिनोक्तम् अशनायापिपासादि सर्वसंसार धर्मवर्जितं नेति (बृ.उ.२.२.३.६) निरस्ताशेषविशेषं यद्ब्रह्म तत्स्वरूपेणैव सोपधिकस्यात्मनो यद्दर्शनं तस्मिन् तं होमं कुर्वन्ति। ब्रह्मात्मैकत्व-दर्शननिष्ठा इत्यर्थः।[३९] अयमेव ज्ञानयज्ञः॥ २५॥

अथ च–

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति॥ २६॥

38. यज्ञशब्दस्यात्मनामसु यास्केन पठितत्वात् (ब्र.)

39. धर्मोऽपि इह (अध्यात्मशास्त्रे मुमुक्षोः पापम् उच्यते (शं.भा.)

ruvayoor Campus Palm-Leaf Manuscript Collection, Thrissu

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अन्ये - केचिन्नैष्ठिकब्रह्मचारिण:, श्रोत्रादीनीन्द्रियाणि, संयमा एवाग्नय: तेषु संयमाग्निषु, प्रतीन्द्रियं संयमो भिद्यत इति बहुवचनम्। जुह्वति - इन्द्रियसंयमनं कुर्वन्तीत्यर्थ: ।[40] अन्ये गृहस्था: शब्दादीन् विषयान्, इन्द्रियाग्निषु - श्रोत्रादीनीन्द्रियाण्येव अग्नयस्तेषु, जुह्वति - विषयभोग-समयेऽप्यनासक्तास्सन्त:, श्रोत्रादिभिरविरुद्धविषयग्रहणं हि मन्यन्त इति भाव:[41] ॥ २६ ॥

अपि च–

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७॥

अपरे - केचिद्ध्याननिष्ठा: सर्वाणि इन्द्रियकर्माणि, इन्द्रियाणां - श्रोत्रादीनां, वागादीनां च कर्माणि, क्रमेण शब्दादीनि वचनानि च, प्राणकर्माणि, प्राणानां प्राणापानव्यानोदानसमान नागकूर्मकृकरदेवदत्त धनञ्जयभेदाद्दशानां कर्माणि । प्राणस्य बहिर्गमनं, अपानस्याधोनयनं, व्यानस्याकुञ्चनप्रसारणा-दिव्यानयनं, उदानस्योर्ध्वनयनं, समानस्याशितपीतादीनां समुन्नयनम् ॥

40. ज्ञानस्य स्वप्रमेयावरणाज्ञानापाकरणे सामर्थ्यस्य लोके दृष्टत्वात् अविक्रिय ब्रह्मात्मज्ञानमपि तदज्ञानं निवर्तयत् तजन्यकर्तृत्वभ्रमं कर्मबीजभूतं निवर्तयति, तन्निवृत्तौ च कर्माणि न स्थातुं पारयन्ति न तु साक्षात् कर्मणां निवर्तकं 'ज्ञानम् अज्ञानस्यैव निवर्तकम्' इति व्याप्ते: । (आ)

41. कारणनिवर्तनेन निवर्तयति (आ)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

-0. In Public Domain. Digitization by eGangotri. Funding MI

उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः ।
कृकरस्तु क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे ॥

न जहाति मृतं वापि सर्वव्यापी धनञ्जयः । (योगचूडामण्युपनिषत् २५,२६,) इत्येवं रूपाणि ज्ञानदीपिते, ज्ञानेन- स्नेहेन, दीपिते - प्रदीप्ते - आत्मसंयमयोगाग्नौ, आत्मनि संयम एव योगाग्निः तस्मिन्, जुह्वति - प्रक्षिपन्ति । विवेकज्ञानेनोज्ज्वलीभावमापादिते, संयमाग्नौ, सर्वाणि प्राणेन्द्रिय-कर्माणि, विलापयन्तीत्यर्थः [42] ॥ २७ ॥

किञ्च -

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयस्संशितव्रताः ॥ २८ ॥

संशितानि - तीक्ष्णीकृतानि, अच्छिन्नानि व्रतानि यैस्ते,। अपरे केचित् यतयः यतनशीलाः, जितेन्द्रियाः । ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते (अमरकोषः ७.४३) इत्यमरः । अपरे - केचित्, द्रव्यं - तीर्थेषु द्रव्यविनियोग एव यज्ञा येषान्ते द्रव्ययज्ञाः तपः- कृच्छ्रचान्द्रायणादि, यज्ञा - येषां ते तपोयज्ञाः। अपरे, योगः - प्राणायामप्रत्याहारलक्षणा यज्ञा येषां ते योगयज्ञाः तथा स्वाध्यायज्ञानयज्ञाः स्वाध्यायो - यथाविधि वेदपठनं, ज्ञानं - शास्त्रार्थपरिज्ञानं, च ते यज्ञा येषां ते स्वाध्यायज्ञानयज्ञाः। केचित् स्वाध्याय-यज्ञाः केचित् ज्ञानयज्ञा इति भावः ॥ २८ ॥

42. समबुद्धित्वादीत्यादिशब्देन ज्ञानोपायभूतं क्षमादिः आदीयते (आ).

ruvayoor Campus Palm-Leaf Manuscript Collection, Thrissu

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किञ्च -

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥

अपाने - अपानवृत्तौ, **प्राणं** - प्राणवृत्तिं, **जुह्वति** - प्रक्षिपन्ति। पूरककाले प्राणम् अपानेनैकीकुर्वन्तीत्यर्थः। **प्राणायामपरायणाः**- पूरककुम्भकरेचक भेदत्रिविधप्राणायामतत्पराः, **अपरे** केचित्, ततः, **प्राणापानगती** - मुखनासिकाभ्यां वायोर्निर्गमनं प्राणस्य गतिः। तद्विपर्ययेणाधो गमनं अपानस्य गतिः। ते **रुद्ध्वा**, कुम्भककाले प्राणापानगतिनिरोधो भवतीत्यर्थः। रेचककाले अपानं प्राणे जुह्वति। एवं प्राणायामं कृतवन्तः प्राणायामयज्ञा इति भावः ॥ २९ ॥

किञ्च—

अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥

अपरे - केचित्, **नियताहाराः** सन्तः, नियतः, परिमितः आहारो येषां ते, **प्राणान्** - वायुविशेषान्, **प्राणेषु** वशीकृतवायुषु, **जुह्वति** - धारणाबलेन तत्र तत्र जितवायुविशेषेषु अन्ये वायुविशेषाः, प्रविष्टा इव भवन्तीत्याशयः। अयं प्राणयज्ञः। यज्ञविदां फलमाह - **एते** - पूर्वोक्तास्सर्वेऽपि **यज्ञविदः** यज्ञान्, विदन्ति जानन्ति लभन्ते इति वा यज्ञविदः, **यज्ञैः**- यथोक्तैः **क्षपितं** - नाशितं, कल्मषं येषां ते यज्ञक्षपितकल्मषास्सन्तः, सनातनं ब्रह्म यान्तीत्यु-त्तरेणान्वयः ॥ ३० ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

-0. In Public Domain. Digitization by eGangotri. Funding MI

किञ्च–

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥

यज्ञानां शिष्टं च तदमृतं भुञ्जत इति यज्ञशिष्टामृतभुजः, यथोक्तान्, यज्ञान् कृत्वा तच्छिष्टं यथाविधिचोदितं, अमृताख्यम् अन्नं भुञ्जाना इत्यर्थः। सनातनं -चिरन्तनं, ब्रह्म यान्ति, ब्रह्मज्ञानद्वारेण आप्नुवन्ति। यज्ञाकरणादुभयलोक भ्रंशमाह– नायं लोक इति। हे कुरुसत्तम - कुरुश्रेष्ठ, न विद्यते यथोक्तयज्ञानां कोऽपि यज्ञो यस्य तस्य अयज्ञस्य अयं, सर्वप्राणिसाधारणलोकोऽपि नास्ति, अन्यो विशिष्टसाधनसाध्यः, परलोकः कुतः। नायं लोकः इत्यनेन इह लोक उपादेयस्त्रिवर्गो नास्तीति व्यज्यते। कुतोऽन्य इत्यनेन मोक्षमार्गो दूरापास्त एव। तस्माद्यज्ञा अवश्यं करणीया इति भावः ॥ ३१ ॥

ज्ञानयज्ञप्रसङ्गात् आनुषङ्गिकयज्ञप्रस्तावं कृत्वा उपसंहरति–

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्मजान्विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

एवं - उक्तप्रकारेण, बहुविधप्रकारा यज्ञाः, ब्रह्मणः- वेदस्य मुखे वितताः विस्तीर्णाः, तद्यथा - मोक्षसाधनैः वाचि हि प्राणं जुह्वति इत्यादिना साक्षात् वेदोदिता इत्यर्थः। सर्वान् तान् - यथोक्तान्, कर्मजान् कायिकवाचिकमानसकर्मोद्भवान्, विद्धि, अत एवं ज्ञात्वा, विमोक्ष्यसे अशुभादिति शेषः। न मे व्यापारा एते, निर्व्यापारोऽहम् उदासीन इति ज्ञात्वा संसारबन्धान्मुक्तो भविष्यसि इत्यर्थः ॥ ३२ ॥

ruvayoor Campus Palm-Leaf Manuscript Collection, Thrissu

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ननु द्रव्यादियज्ञेषु बहुषु सत्स्वपि ज्ञानयज्ञेन किं प्रयोजनम् इत्याशङ्क्याह—

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

हे परन्तप, द्रव्यमयात् - द्रव्यप्रधानात्। द्रव्यसाधनसाध्यादित्यर्थः। यज्ञात् ज्ञानमयो यज्ञः ज्ञानयज्ञः,श्रेयान् श्रेष्ठतरः फलस्यारम्भको न भवतीत्यर्थः । हे पार्थ ! यतः सर्वं कर्म अखिलं - अनश्वरं सत्, सफलं सत्, ज्ञाने - ब्रह्मज्ञाने, परिसमाप्यते - अन्तर्भवतीत्यर्थः। सर्वं तदभिसमेति यत्किञ्चित्प्रजास्साधु कुर्वन्ति यस्तद्वेद यत्स वेद' (छा. उ. ४.२.४) इति श्रुतेः ॥ ३३ ॥

तज्ज्ञानं केनोपायेन लभ्यत इत्यत्राह -

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

तत्त्वं द्रष्टुं शीलं एषां अस्तीति तत्त्वदर्शिनः ज्ञानिनः, ते - तुभ्यं, यद्, ज्ञानं, उपदेक्ष्यन्ति - कथयिष्यन्ति, तद् ज्ञानं, प्रणिपातेन - गुरूनुपगम्य प्रकर्षेण नीचैः पतनं प्रणिपातः, तेन - दीर्घनमस्कारेणेत्यर्थः। परिप्रश्नेन - कथं बन्धः कथं मोक्ष इत्यादिना । सेवया परिचिर्यया च, विद्धि जानीहि । प्राप्नुहीत्यर्थः ॥ ३४ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

इत: परं सार्धश्लोकत्रयेण ज्ञानस्य फलमाह-

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

हे पाण्डव ! यद् - ज्ञानिभि: उपदिष्टं ज्ञानं **ज्ञात्वा**- अभिगम्य **पुन:** **एवं** 'यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यता: (भ.गी.१.४४) इत्युक्तप्रकारं, **मोहं,** **न** **यास्यसि**-न प्राप्स्यसि। किञ्च- **येन** - ज्ञानेन **अशेषेण** - निश्शेषेण, **भूतानि**-ब्रह्मादिस्तम्बपर्यन्तानि, **आत्मनि** - स्वात्मन्येव, अभेदेन, **द्रक्ष्यसि।** **अथो** अनन्तरं, आत्मानं, **मयि** - परमेश्वरे सर्वोपनिषत्प्रसिद्धे चाभेदेन द्रक्ष्य सीत्यर्थ:। निरञ्जन: परमं साम्यमुपैति (मु.उ.३.१.३) इति श्रुते: ॥ ३५ ॥

किञ्चैतज्ज्ञानस्य माहात्म्यमाह–

अपि चेदसि पापेभ्य: सर्वेभ्य: पापकृत्तम:।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ३६ ॥

सर्वेभ्य: **पापेभ्य:** - पापकर्तृभ्य:, **पापकृत्तम:,** अतिशयेन पापकृत्, **असि** **चेत्** - भवसि यदि, तथापि त्वं, **ज्ञानप्लवेन,** ज्ञानमेव प्लव: उडुपं, **तेनैव,** **सर्वं** **वृजिनं** - पापार्णवं, **सन्तरिष्यसि** - सम्यक् तरिष्यसि ॥ ३६ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

समुद्रदृष्टान्तेन केवलं पापस्यातिक्रमणमेव। ज्ञानेन तु पापस्य समूलनाशो भवतीत्याह—

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा॥ ३७॥

हे **अर्जुन**, **समिद्धः** - सम्यग्दीप्तः, **अग्निः**, **एधांसि** - काष्ठानि, **यथा भस्मसात्कुरुते**, **तथा**, **ज्ञानाग्निः**, ज्ञानमेव अग्निः **सर्वकर्माणि** - प्रारब्धफलव्यतिरिक्तानि, **भस्मसात्कुरुते** - निर्बीजीकरोति इत्यर्थः। न हि साक्षात् ज्ञानाग्निरेव कर्माणीन्धनवत् भस्मीकर्तुं शक्नोति। किन्तु सम्यग्दर्शनं सर्वकर्मणां निर्बीजत्वे कारणमित्यभिप्रायः। येन कर्मणा शरीरमारब्धं तत् प्रवृत्तफलत्वात् उपभोगेनैव क्षीयते। 'तस्य तावदेव चिरम्' (छा.उ.६.१४.१) इत्यादिश्रुतेः। अतः यान्यप्रवृत्तफलानि ज्ञानोत्पत्तेः प्राक्कृतानि ज्ञानसहभावीनी च अतीतानेकजन्मकृतानि च तानि सर्वाणि कर्माणि ज्ञानं भस्मसात् कुरुत इति भावः ॥ ३७ ॥

यत एवमतः—

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।

इह - तपोयोगयागादिषु मध्ये, **ज्ञानेन**, **सदृशं** - तुल्यं **पवित्रं** पावनं वस्तु, **न विद्यते** नास्ति, येन नितान्तं, ज्ञानप्राप्तिर्भवति। तमुपायमाह - तत्स्वयमिति सार्धश्लोकेन—

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

स्वयं साधकः, स्वयमेव, कालेन - महता चिरतरेण कालेन, योगसंसिद्धः, योगेन - कर्मयोगेन समाधियोगेन च, संसिद्धः - संस्कृतो योग्यतामापन्नस्सन्, आत्मनि, ज्ञानं, विन्दति- लभते ॥ ३८ ॥

अपि च–

श्रद्धावान् लभते ज्ञानं तत्परस्संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९ ॥

श्रद्धावान् - आचार्योपदिष्टेऽर्थे श्रद्धालुः, तत्परः गुरूपासनादावासक्तः संयतेन्द्रियः, संयतानि - विषयेभ्यो, निवर्तितानि, इन्द्रियाणि येन स पुरुषः, ज्ञानं, लभते - प्राप्नोति, ज्ञानलाभात् किं स्यात् इति अत आह - ज्ञानमिति। ज्ञानं, लब्ध्वा - प्राप्य, परां - मोक्षाख्यां, शान्तिं उपरतिं, अचिरेण - क्षिप्रमेव, अधिगच्छति ॥ ३९ ॥

अस्मिन्नर्थे संशयो न कार्य इत्याह–

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

गुरूपदिष्टार्थं न जानातीति अज्ञः अश्रद्दधानश्च, कथञ्चिद् ज्ञाने जातेऽपि अविश्वसन् संशयात्मा, जातायामपि श्रद्धायां 'मम इदं' सिध्येद्वा' 'न वा' इति संशय आत्मनि मनसि यस्य स च, विनश्यति - स्वार्थाद्भ्रश्यति। एतेषु

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
Acc.No. 384188
Acc.Date 2-4-25

त्रिष्वपि विशेषणेषु संशयात्मन: अयं लोको नास्ति धनार्जनविवाहाद्यसिद्धे:। पर: - परलोकश्च, नास्ति धर्मस्यानिष्पत्ते: सुखं च नास्ति संशयेनैव भोगस्यासम्भवात् ॥ ४० ॥

ज्ञानकर्मभेदेन पूर्वोक्तां ब्रह्मनिष्ठामुपसंहरति यावदध्यायपरिसमाप्ति–

योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम्।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥ ४१ ॥

हे धनञ्जय, योगेन - परमार्थदर्शनयोगेने, संन्यस्तानि कर्माणि धर्माधर्माख्यानि येन तं। ज्ञानेन सञ्छिन्न: संशयो "ब्रह्मास्मीति न वा" इति सन्देहो यस्य तम् आत्मवन्तं, उपदिष्टार्थे दृढमनस्कं अप्रमत्तमिति यावत्। कर्माणि - गुणचेष्टारूपेण दृष्टानि, न निबध्नन्ति-अनिष्टादिरूपं फलं नारभन्ते। ज्ञानाग्निदग्धकर्मत्वात् ॥ ४१ ॥

ज्ञानकर्मानुष्ठानविषयसंशयश्चेत् किं कर्तव्यम् इत्यत्राह–

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मन:।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विज्ञानामृतयोगो नाम चतुर्थोऽध्याय: ॥

हे भारत, तस्मात्, कारणात्, ज्ञानासिना, शोकमोहादिदोषहरं सम्यग्दर्शनं, तदेव, असि: - खड्ग: तेन, अज्ञानसम्भूतं - अविवेकजातं,

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

हृत्स्थं - मनस्थितं, एनं, आत्मन:, स्वस्य तवेत्यर्थ:। संशयं, छित्त्वा, योगं - आत्मज्ञानोपायं कर्मानुष्ठानं, आतिष्ठ - कुर्वित्यर्थ:। उत्तिष्ट च - इदानीं प्रकृताय युद्धाय उत्तिष्ठेति भाव: ॥ ४२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य ब्रह्मानन्दसरस्वतीस्वामिशिष्य रामचन्द्रानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजना-समाख्यायां विज्ञानामृतयोगो नाम चतुर्थोऽध्याय: ॥

॥ पञ्चमोऽध्याय: ॥

पूर्वस्मिन्नध्याये भगवता 'ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुत (भ.गी. ४.३६) इत्यादिना सर्वकर्मसन्न्यासमुक्त्वा 'छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ' (भ.गी.४.४२) इति पुन: कर्मयोग उक्ते सति तत उभयो: कर्मानुष्ठान-कर्मसंन्यासयो: स्थितिगतिवत् परस्परविरोधात् एकेन एकस्मिन् काले सहकर्तुमशक्यत्वात् तयोरन्यतरकर्तव्यताप्राप्तौ सत्याम् एतयो: कर्मानुष्ठान-कर्मसंन्यासयो: यत्प्रशंस्यतरं तत्कर्तव्यं नेतरदित्येवं मन्यमान: प्रशस्यतरबुभुत्सया अर्जुन उवाच–

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्॥ १ ॥

हे कृष्ण ! कर्मणां - शास्त्रीयाणां अनुष्ठानविशेषाणां - संन्यासं - परित्यागं च, पुन:- भूय:, योगं। शास्त्रीयाणां कर्मणामवश्यकर्तव्य मनुष्ठानं

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

च, शंससि एतयोः - कर्मसंन्यासकर्मानुष्ठानयोर्मध्ये, एकं - अन्यतरत्, श्रेयः - श्रेष्ठं, तत्, मे, सुनिश्चितं- सुष्ठु तवाभिप्रेतमिदमिति निश्चितं यथा तथा, ब्रूहि - वद ॥ १ ॥

एतन्निर्णयाय स्वाभिप्रायमाचक्षाणः श्रीभगवानुवाच -

संन्यासः कर्मयोगश्च निश्श्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासान्कर्मयोगो विशिष्यते ॥ २ ॥

संन्यासः - कर्मणां परित्यागः, कर्मयोगः - कर्मानुष्ठानं च उभौ ज्ञानोत्पत्तिनिमित्तत्वेन, निश्श्रेयसं मोक्षं कुरुत इति निश्श्रेयसकरौ। तयोः - कर्मसंन्यासकर्मयोगयोर्मध्ये, केवलात्, कर्मसंन्यासात्, कर्मयोगो विशिष्यते- विशिष्टो भवति ॥ २ ॥

ननु कर्मयोगं कस्मात् स्तौषि इत्यत्राह -

ज्ञेयस्य नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

हे महाबाहो यः - कर्मयोगी, दुःखं, तत्साधनं च किञ्चिदपि, न द्वेष्टि- न काङ्क्षति सुखं तत्साधनं च किञ्चिन्न वाञ्छति, सः, नित्यसंन्यासी। त्वं कर्मानुष्ठानकालेऽपि संन्यासीति, ज्ञेयः - ज्ञातव्यः हि - यस्मात्, निर्गतानि द्वन्द्वानि रागद्वेषादीनि यस्मात्सः, निर्द्वन्द्वः। सुखं - अनायासं यथा तथा, बन्धात् प्रमुच्यते ॥ ३ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

ननु भिन्नपुरुषानुष्ठेययोः कर्मसंन्यासकर्मयोगयोः फलेऽपि विरोधो युक्तः। तेनोभयोर्निश्रेयसकरत्वं नास्त्येवेत्यत्राह—

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितस्सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥

बालाः- अज्ञाः, **सांख्यः** कर्मसंन्यासः **योगः** - कर्मयोगश्च तौ, संन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ इह सांख्ययोगशब्द वाच्यौ **पृथक्** - विरुद्धभिन्नफलौ, **प्रवदन्ति। पण्डिताः**- ज्ञानिनस्तु, **न प्रवदन्ति** । अविरुद्धमेकफलं तत्फलमिच्छन्ति इत्यर्थः। **उभयोः** सांख्ययोग-योर्मध्ये, **एकं**, अन्यं, **सम्यक्**, यथावत् **आस्थिता** - आश्रितवानपि, **उभयोः** - तयोः, **फलं** - मोक्षं, **विन्दते**- प्राप्नोति ॥ ४ ॥

कथमेकस्यानुष्ठानादुभयोः फलं विन्दत इति अत आह—

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

सांख्यैः कर्मसन्न्यासिभिः ज्ञाननिष्ठैरिति यावत्। **यत्स्थानं** निश्चयः सांख्यं साक्षात्प्राप्यते **योगैः** कर्मयोगिभिरपि 'अर्श आदित्वादच्' (पा.सू ५.२.-२२७) तत्स्थानं ज्ञानप्राप्तिद्वारा **गम्यते।** अतः **यः सांख्यं च योगं च** फलैकत्वात् अभिन्नं **पश्यति स पश्यति** सम्यग्ज्ञानादित्यर्थः ॥ ५ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ननु सांख्ययोगयो: फले समानेऽपि साक्षान्मोक्षकरं सांख्यं विहाय किं योगेन इत्यत्र आह -

संन्यासस्तु महाबाहो दु:खमाप्तुमयोगत: ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ६ ॥

योगेन विना सार्वविभक्तिकस्तसि:। आप्तुं दु:खं दु:खहेतु चित्तशुद्धिं विना ज्ञानाभावात् न शक्यत इति भाव:। योगयुक्त: योगेन फलनिरपेक्षेण परमेश्वर-समर्पितरूपेण वैदिकेन कर्मयोगेन युक्त: मुनि: - परमेश्वरस्वरूपं मन्यत इति मुनि: न चिरेण क्षिप्रं ब्रह्म - अपरोक्षब्रह्मविज्ञानं अधिगच्छति - प्राप्नोति। अत: चित्तशुद्धे: प्राक् योग एव संन्यासाद्विशिष्यत इति पूर्वोक्तं सिद्धम् ॥ ६ ॥

कर्मयोगादिक्रमेण ब्रह्माधिगमे सत्यपि तदुपरि तेन न कर्मणा बन्ध: स्यात् इत्याशङ्क्याह -

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रिय: ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

योगेन युक्त: योगयुक्त: अत एव विशुद्धात्मा शुद्धचित्त: विजितात्मा जितदेह: विजितेन्द्रिय: च सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादिस्तम्ब-पर्यन्तानां भूतानां आत्मभूत: आत्मा प्रत्यक्चेतन: यस्य स: आत्मज्ञानीत्यर्थ:। कुर्वन्नपि - लोकसंग्रहार्थं स्वाभाविकं कर्म कुर्वन् न लिप्यते लिप्तो न भवति। कर्मभि: न बध्यत इत्यर्थ: ॥ ७ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

न चासौ परमार्थत: करोतीत्याह–

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्।

आत्मन: याथात्म्यं वेत्ति इति तत्त्ववित् किञ्चिन्न करोत्येव इति युक्त: समाहित: सन् मन्येत - चिन्तयेत् कदा कथं वा तत्त्वमवधारयन् मन्येत इत्युच्यते - पश्यन्ति इति सार्धश्लोकेन

पश्यन् शृण्वन्स्पृशञ्जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥ ८॥

यस्तु कर्मयोगक्रमेण ज्ञानी - जात: स: पश्यन् दर्शनं कुर्वन्। अयं च चक्षुरिन्द्रियव्यापार: शृण्वन् - श्रवणं कुर्वन् - अयं श्रोत्रेन्द्रियव्यपार: स्पृशन् - स्पर्शं कुर्वन् - अयं त्वगिन्द्रिय व्यापार: जिघ्रन् - जिघ्रणं कुर्वन् अयं घ्राणेन्द्रियव्यापार: अश्नन् - भुञ्जान: अयं जिह्वेन्द्रियव्यापार: गच्छन् गमनं कुर्वन् अयं देहेन्द्रियव्यापार: स्वपन् - शयान: अयं अन्त: करणव्यापार: । श्वसन् - निश्वासं कुर्वन्, अयं प्राणव्यापार: ॥ ८॥

प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥ ९॥

प्रलपन् - प्रवदन्, अयं वागिन्द्रियव्यापार: विसृजन् - अयं पाय्विन्द्रियव्यापार: उपस्थेन्द्रिय व्यापारोऽपि। गृह्णन् - आदानं कुर्वन् अयं प्राणेन्द्रिय व्यापार: । उन्मिषन्- उन्मीलयन्, निमिषन्नपि निमीलयन्नपि । उन्मेषनिमेषौ कूर्मारव्यस्य उपप्राणस्य व्यापारौ। एवं श्रोत्रादीनि इन्द्रियाणि इन्द्रियार्थेषु शब्दादिविषयेषु वर्तन्त इति धारयन् 'नाहं कर्ता' इति बुद्ध्या निश्चिन्वन् मन्येत इति पूर्वेण संबन्ध: ॥ ९॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मृगतृष्णिकायां उदकबुद्ध्या पानाय प्रवृत्त: 'नेदमुदकं' इति जानन् पुन: न पिपासति तद्वत् ब्रह्मवित् शुभाशुभकर्मभि: न लिप्यत इत्याह -

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति य:।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥

य: कर्माणि सर्वाणि ब्रह्मणि- परमात्मनि आधाय - **निधाय सङ्गं** - आसक्तिं त्यक्त्वा कर्माणि करोति स: **अम्भसा** - जलेन पद्मपत्रमिव पापेन न लिप्यते। कर्तृत्वाभिनिवेशाभावात् न बध्यत इति भाव: ॥ १० ॥

एतदेव भङ्ग्यन्तरेण विवृणोति -

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिन: कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ ११ ॥

योगिन: कर्मयोगिन: **आत्मशुद्धये** चित्तशुद्ध्ये **सङ्गं** - फलासक्तिं त्यक्त्वा **कायेन** - केवलेन देहेन यज्ञादिकं **मनसा** - केवलेन मनसा ध्यानादिकं **बुद्ध्या** - केवलया बुद्ध्या तत्त्वनिश्चयादि **केवलै: इन्द्रियै:**- कर्माभिनिवेशरहितै: श्रवणकीर्तनलक्षणं इत्येवं विधं कर्म कुर्वन्ति ॥ ११ ॥

यस्मात् तत्रैवाधिकार: तस्मात् तदेव कुरु इत्याह -

युक्त: कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्त: कामकारेण फले सक्तो न निबध्यते ॥ १२ ॥

युक्त: परमेश्वराय कर्माणि न मम फलाय इत्येवं समाहित: सन् **कर्मफलं त्यक्त्वा नैष्ठिकीं** - निष्ठायां भवाम् **शान्तिं** - मोक्षाख्यां

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

आप्नोति - चित्तशुद्धि-ज्ञानप्राप्ति-सर्वकर्मसन्न्यासज्ञाननिष्ठाक्रमेण इति वाक्यशेषः । अयुक्तस्तु - असमाहितस्तु कामकारेण कामस्य कारः करणं तेन प्रेरितया इत्यर्थः। फले - कर्मफले - सक्तः - "इदं कर्म कृत्वा एतत्फलं प्राप्नुवानी' ति सक्तः - आसक्तितः - निबध्यते - नितरां बद्धो भवति । न संसारान्मुक्तो भवतीत्यर्थः ॥ १२ ॥

एवं अपरमार्थदर्शनक्रमेण मोक्षोपायमुक्त्वा परमार्थदर्शनलक्षणमाह—

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥

वशी - जितेन्द्रियः । मनसा विवेकबुद्ध्या - सर्वकर्माणि नित्यनैमित्तिक काम्यादीनि । नवद्वारे - नवद्वाराणि - रन्ध्ररूपाणि यस्य तस्मिन् । नवद्वाराणि तावत् ऊर्ध्वप्रदेश आत्मनः उपलब्धिद्वाराणि सप्त। तानि नेत्रे, श्रोत्रे घ्राणे, वक्त्रे च। अधो द्वे पायूपस्थरूपे इति । पुरे - पुरवदहंभाव शून्ये देहे देही अवतिष्ठते । अहंकाराभावादेव स्वयं तेन देहेन नैव कुर्वन् ममकाराभावाच्च न कारयन् इति अविशुद्धचित्तात् व्यावृत्तिः उक्ता । अविशुद्धचित्तो हि संन्यस्य पुनः करोति कारयति च ॥ १३ ॥

साक्षादात्मनः स्वभावमाह द्वाभ्यां—

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

प्रभुः - आत्मा लोकस्य जनस्य कर्तृत्वं न सृजति । कर्माणि च न सृज्यते - नोत्पादयति । कर्मफलसंयोगं कर्मणां फलानि तेषां संयोगं सङ्गं च न सृजति किन्तु स्वभावः अविद्यालक्षणप्रकृतिः मायेत्यर्थः। प्रवर्तते ॥ १४ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उक्तार्थमनुवदति–

नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥ १५॥

विभुः व्यापकः आत्मा - कस्यचिदर्थस्य पापं नादत्ते न गृह्णाति सुकृतं - भक्तस्य (पापं) प्रयुक्तं सुकृतं च नादत्ते - न गृह्णाति। तर्हि भक्ताः किमर्थं पूजादिलक्षणं यागदानहोमादि च सुकृतं प्रयुञ्जीरन् इत्यत्राह - अज्ञानेनावृतमिति । अज्ञानेन - ज्ञानं आवृतं आच्छादितम् । कर्मणिक्तः। तेन आवरणरूपाज्ञानेन जन्तवः संसारिणः मुह्यन्ति। करोमि कारयामि भोक्ष्ये, भोजयिष्यामि इत्येवं रूपं मोहं गच्छन्ति इत्यर्थः ॥ १५ ॥

ज्ञानिनस्तु न मुह्यन्ति इत्याह–

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥ १६॥

आत्मनः परमात्मनः ज्ञानेन विवेकज्ञानेन। येषां - जन्तूनां येन आवृतत्वात् जन्तवो मुह्यन्ति तदज्ञानं नाशितं भवति। तेषां ज्ञानं आदित्यवत् तत्परं ज्ञेयं - परमात्मस्वरूपं प्रकाशयति। येषां - जनानां आत्मयाथात्म्योपदशजनितेन आत्मविषयासाधारण - अहरहरभ्यासातिशयेन पवित्रेण ज्ञानेन तज्जानावरणं अनादिकालवृत्तानन्तकर्मसंधातरूपं अज्ञानं नाशितं तेषां तत् स्वाभाविकं परं ज्ञानं अपरिमितं अनन्तरितं आदित्यवत् सर्वं यथावस्थितं प्रकाशयति इत्यर्थः ॥१६ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

एवं आत्मज्ञानां फलमाह -

तद्बुद्ध्यस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥ १७॥

ज्ञानेन - यथोक्तज्ञानेन निर्धूतं - निवृत्तं, नाशितं कल्मषं - पापादि संसारकारणदोषः येषां ते ज्ञाननिर्धूतकल्मषाः। यतयः अत एव तद्बुद्धयः सन्तः तस्मिन् ब्रह्मणि गता बुद्धिः येषां ते तदात्मानः तदेव परं ब्रह्म आत्मा येषां ते। तन्निष्ठाः तस्मिन् ब्रह्मणि एव निष्ठा अभिनिवेशः येषां ते तत्परायणाश्च तदेव परं अयनं संसारगतिः येषां ते केवलात्मरतयः इत्यर्थः। अपुनरावृत्तिं अपुनर्देहसंबन्धं मोक्षं गच्छन्ति॥ १७॥

येषां ज्ञानेन अज्ञानं नाशितं ते पण्डिताः कथं पश्यन्ति इत्युच्यते—

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥

विद्याविनयाभ्यां संपन्ने उत्तमसंस्कारवती सात्विकब्राह्मणे श्वपाके शुनः पचति इति श्वपाकः अन्त्यजः तस्मिन् अधमे - तामसे कर्मवैषम्ययुक्ते च गवि - धेनौ मध्यमायां - राजन्यसंस्कारसहितायां हस्तिनि - गजे अन्तिमे - केवलतामसे च शुनि शुनके निकृष्टे केवलतामसे जातिवैषम्ययुक्ते च समदर्शिनः सत्त्वादिगुणैः तज्जन्यसंस्कारैः अत्यन्तमेव असंस्पृष्टं समं एकं अद्वितीयं ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः ज्ञानिनः॥ १८॥

ननु अभोज्यान्नाः ते दोषवन्ताः। समासमाभ्यां विषमे समे हीयते पूजकः इति गौतमस्मृतेः। पूज्याय ब्राह्मणाय विषमे प्रकारे कृते सति अपूज्या ये

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चण्डालाय समे प्रकारे कृते सति च इहामुत्रगतिर्नास्ति। तस्मात् कथं समदर्शिन: न दोषवन्त: इत्याशङ्कायामाह -

इहैव तैर्जित: सर्गो येषां साम्ये स्थितं मन:।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिता:॥ १९॥

येषां मन: अन्त: करणं साम्ये सर्वभूतेषु ब्रह्मणा समभावे स्थितम् निश्चयीभूतम् तै: इहैव अस्मिन् लोके सर्ग: जन्म - संसार इत्यर्थ:। जित: वशीकृत: जीवन्मुक्त: इति भाव:। हि यस्मात् कारणात् समं एकं ब्रह्म निर्दोषं - दोषवर्जितं तस्मात् कारणात् ते समदर्शिन: - ब्रह्मणि स्थिता: - ब्रह्मभावं प्राप्ता: इत्यर्थ: । अत: ब्रह्मभावं प्राप्ते पूज्यापूज्ययो: समदर्शनात् दोष:- देहादि-संघातात्मदर्शनाभावात् दोषगन्धमात्रमपि न संस्पृशति ॥ १९ ॥

यस्मात् निर्दोषं समं ब्रह्म तस्मात्–

न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थित:॥ २०॥

स्थिरबुद्धि: - सर्वभूतेषु एक: सम: निर्दोष: - आत्मा इति स्थिरा निस्संशया बुद्धि: यस्य स:। अत एव असंमूढ: संमोहवर्जित: ब्रह्मवित् आत्मज्ञानी ब्रह्मणि स्थित: सन्। अकर्मकृत्- सर्वकर्मसन्न्यासीत्यर्थ:। प्रियं इष्टं प्राप्य न प्रहृष्येत् प्रहर्षणं न कुर्यात्। अप्रियं - अनिष्टं प्राप्य - नोद्विजेत् - न भीयात् न विषीदतीत्यर्थ:। प्रियाप्रियौ देहमात्रदर्शिनमेव हर्षविषादौ द्वौ ते न तु आत्मविदां इति तात्पर्यम् ॥ २० ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

किञ्च -

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ २१ ॥

यः बाह्यश्च ते स्पृश्यते इति स्पर्शाः । शब्दादिविषयाः । तेषु **असक्तात्मा सन्** - असक्तान्तःकरण सन् विषयेषु प्रतिवर्जितं इत्यर्थः। **आत्मनि** चित्तवृत्तौ यदुपशमात्मकं सात्विकं **सुखं** तद्विन्दति - लभते। स च उपशमात्मकं सुखञ्च लब्ध्वा - **ब्रह्मयोगयुक्तात्मा सन्** - ब्रह्मणि योगः समाधिः तस्मिन् युक्तः व्यापृतः आत्मा अन्तःकरणं यस्य सः **अक्षय्यं** ब्रह्मानुभवरूपं सुखं **अश्नुते** - प्राप्नोति । "यो वै भूमा' तत्सुखम्, नाल्पे सुखमस्ति' (छा. उ.७.२३.१) इति श्रुतेः । आत्मनि अक्षय्यसुखार्थी - क्षणिकाया बाह्यविषयप्रीतेः इन्द्रियाणि न निवर्त्तयेदिति भावः ॥ २१ ॥

प्राकृतस्य भोगस्य त्याज्यतामाह–

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥ २२॥

हे कौन्तेय ! ये ये **भोगाः** सुखानि **संस्पर्शजाः** विषयेन्द्रियाणां संस्पर्शेभ्यः जाताः । **आद्यन्तवन्तः** - आदिः - विषयेन्द्रियसंयोगः भोगानां अन्तश्च तत्कारणभूताः **दुःखयोनयः** । 'एव' शब्दात् संसारे सुखस्य गन्धमात्रमपि नास्ति इति ज्ञातव्यम् इति भावः । **हि** यस्मात् **बुधः** - विवेकी परमार्थतत्त्वज्ञानीत्यर्थः **तेषु** भोगेषु **न रमते** - न क्रीडति आसक्तो न भवति इत्यर्थः ॥ २२ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कामक्रोधविजयं विना नि:श्रेयसप्राप्ति: सुलभा न भवति इत्यत्राह-

शक्नोतीहैव य: सोढुं प्राक्शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्त: स सुखी नर:॥ २३॥

य: शरीरविमोक्षणात् - प्राक् - यावज्जीवतीत्याशय: इहैव - अत्रैव जीवन्नेव इत्याशय: । कामक्रोधौ उद्भवौ यस्य तं कामक्रोधोद्भवं वेगं इन्द्रियगोचरप्राप्ते इष्टे विषये दृश्यमाने श्रूयमाणे स्मर्यमाणे वा अनुभूते सुखहेतौ- तृष्णाकाम: रोमाञ्चनहर्षनेत्रवदनादिलिङ्ग: अन्त:करणप्रक्षोभरूप: कामोद्भव: वेग:। आत्मन: प्रतिकूलेषु दु:खहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु च य: द्वेष: स: क्रोध: गात्रप्रकम्प: प्रस्वेदप्रणामसंदष्ठोष्ठपुट रक्तनेत्रान्तादिलिङ्ग: क्रोधोद्भवो वेग: इति तं कामक्रोधोद्भवं वेगं शरीरविमोक्षणात् प्राक् - आमरणात् सोढुं- प्रसहितुं शक्नोति। उत्सहते - स नर: युक्त: योगी नर: सुखी च॥ २३॥

ननु कथंभूतो ब्रह्मणि स्थित: ब्रह्म प्राप्नोति इत्याशङ्कायामाह -

योऽन्त: सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव य:।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥ २४॥

य: अन्तरात्मनि सुखं यस्य स: न तु विषयेषु य: तथा अन्तराराम:। अन्त: अन्तरेव आत्मनि आराम: आरमणं क्रीडा यस्य स: । न बहि: य: । तथाऽन्तर्ज्योति: अन्तरात्मन्येव ज्योति: प्रकाश: यस्य अन्तर्ज्योतिरेव स: योगी जीवन्नेव ब्रह्मभूत: सन् ब्रह्मनिर्वाणं - ब्रह्मणि निर्वृत्तिं ब्रह्मानन्दमिति यावत्। अधिगच्छति - प्राप्नोति॥ २४॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

किञ्च -

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥

क्षीणकल्मषाः क्षीणपापाः छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतचित्ताः सर्वभूतहिते रताः सर्वेषां भूतानां प्राणिनां ते आनुकूल्ये रता निरताः अहिंसकाः इत्यर्थः । ऋषयः ऋषिगतौ इति धातोः गत्यर्थस्य ज्ञानार्थत्वात् ज्ञानिन इत्यर्थः । ब्रह्मनिर्वाणं - ब्रह्मनिर्वृत्तिं मोक्षं इत्यर्थः । लभन्ते ॥ २५ ॥

किञ्च–

कामक्रोधवियुक्तानां यतीनां यत्तचेतसाम्।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥

कामक्रोधाभ्यां वियुक्तानां - रहितानां, अत एव यतचेतसाम् - यतान्तःकरणानां विदितः - प्राज्ञः आत्मा यैः तेषां विदितात्मनां, यतीनां सन्न्यासिनां, अभितः उभयतः इहामुत्र च। ब्रह्मनिर्वाणं मोक्षः वर्तते । सम्यक्दर्शनविशिष्टानां कर्मसन्न्यासिनां सद्योमुक्तिर्भवति इति भावः ॥ २६ ॥

अथ ज्ञानस्य अन्तरङ्गं ज्ञानयोगं विस्तरेण विवक्षुः इदानीं तमर्थं सूचयति स्पर्शानिति श्लोकद्वयेन -

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ २७ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः॥ २८ ॥

यो मुनिः **बाह्यान्** - बहिर्भवान्, श्रोत्रादिद्वारेण आगतान् **स्पर्शान्** शब्दादिविषयान् बहिः कृत्वा - नियम्येत्यर्थः। किञ्च चक्षुः दृष्टिं भ्रुवोरन्तरे मध्ये कृत्वा। तथा **प्राणापानौ नासाभ्यन्तरचारिणौ** - नासयोः अभ्यन्तरे अन्तराले - च चरन्तौ इति। तौ कुम्भकयुक्तत्वात् समौ च कृत्वा। **यतेन्द्रियमनो बुद्धिः** यथाः संयता इन्द्रियाणि च मनश्च बुद्धिश्च येन सः **विगतेच्छाभयक्रोधः** - विगताः इच्छा च भयं च क्रोधश्च ते यस्य सः। मोक्ष एव परमं अयनं परा गतिः यस्य सः **मोक्षपरायणः** सोऽयं **मुनिः** मननशीलः **सदा**-नित्यं **मुक्त एव**। तेन मोक्षार्थं उपायान्तरं नापेक्षते इति भावः॥ २७ & २८ ॥

एवं समाहितचित्तेन किं ज्ञेयम् -

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥ २९॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम पञ्चमोऽध्यायः ॥

यज्ञानां तपसां च भोक्तारं - **यज्ञतपसां** कर्तृरूपेण देवतारूपेण च **भोक्तारं** सर्वेषां लोकानां महान्तं ईश्वरं - **सर्वलोकमहेश्वरं सर्वभूतानां** सर्वप्राणिनां **सुहृदं** - प्रत्युपकारनिरपेक्षोपकारिणं - सर्वभूतानां हृदये शयम्

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

सर्वकर्मफलाध्यक्षं, सर्वप्रत्ययसाक्षिणं नारायणं - वासुदेवः अहं इति तत्त्वतो मां ज्ञात्वा शान्तिं - सर्वसंसारस्य उपरतिं ऋच्छति - गच्छति। ऋच्छ गताविति धातोः ॥ २९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य ब्रह्मानन्दसरस्वतीस्वामिशिष्य रामचन्द्रानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनसमाख्यायां कर्मसंन्यासयोगो नाम पञ्चमोऽध्यायः ॥

॥ षष्ठोऽध्यायः ॥

अतीताध्यायान्ते ज्ञानयोगस्य सम्यक्दर्शनं प्रति अन्तरङ्गस्य सूत्रभूताः स्पर्शान्कृत्वा बहिर्बाह्यनित्यादयः श्लोकाः उपदिष्ठाः तेषां वृत्तिस्थानीयोऽयं षष्ठोध्यायः आरभ्यते । तत्र ध्यानयोगस्य बहिरङ्गं कर्मध्यानयोगासमर्थेन कर्तव्यम् इति स्तुवन् श्रीभगवानुवाच -

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥

यः कर्मफलं अनाश्रितः - अनपेक्षितः सन् कार्य कर्तव्यम् कर्म अग्निहोत्रादिकं नित्यं कर्म करोति - निर्वर्तयति - सः - सन्न्यासी - सन्न्यासः परित्यागः । सन्न्यासी च योगः चित्तसमाधानं अस्यास्तीति सः योगी। योगपरित्यागोऽस्यास्तीति । निरग्निः निर्गताः कर्माङ्गभूताः अग्नयः यस्य आत्मनः न भवति । न विद्यते अनग्निसाधनाः तपोदानादिकाः क्रियाः यस्य सः न भवति । न केवलं निरग्निः अक्रिय एव सन्न्यासी योगी च इति मन्तव्यः । किञ्च साग्निहोत्रः सक्रियोऽपि इति भावः ॥ १ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उक्तलक्षणकर्मयोगेन सन्न्यासोऽस्तीत्याह -

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन॥ २॥

हे पाण्डव ! बुधाः यं संन्यासं - सर्वकर्मपरित्यागलक्षणं प्राहुः तं संन्यासं योगं कर्मानुष्ठानलक्षणमिति विद्धि। योगसन्न्यासयोः कथं साम्यमस्ति इति आशङ्क्य कर्मयोगी - कर्म कुर्वाण एव फलविषयं सङ्कल्पं संन्यस्ति इत्येतमर्थं दर्शयिष्यन् आह - न हीति। हि - यस्मात् असंन्यस्तसङ्कल्पः - अपरित्यक्तफलविषय सङ्कल्पः । अभिसंधिः येन सः कश्चन-कश्चिदपि योगी-कर्मयोगी - न भवति ॥ २ ॥

अधुना कर्मयोगस्य ध्यानयोगसाधनत्वं दर्शयति -

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शमः कारणमुच्यते॥ ३॥

योगं - ज्ञानयोगं, आरुरुक्षोः आरोढुं इच्छोः मुनेः कर्मफलत्यागिनः यतेः कर्म कारणं साधनं इत्युच्यते। **योगारूढस्य** - ज्ञानयोगसमारूढस्य मुनेः शमः सर्वकर्मभ्यो निवृत्तिरेव कारणं साधनं उच्यते ॥ ३ ॥

योगारुढः कदा भवति इत्यत्राह -

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते॥ ४॥

यदा - यस्मिन् काले समाधीयमानचित्तः। योगी - इन्द्रियार्थेषु शब्दादिविषयेषु नानुषज्जते - असक्तो न भवति। कर्मसु च

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या नानुषज्जते। कर्तव्यता-बुद्धिः - अनुषङ्गः तां न करोतीत्यर्थः । तदा हि तस्मिन् समय एव सर्व-सङ्कल्पसन्न्यासी - सर्वान् - सङ्कल्पान् इहामुत्रार्थान् कामहेतून् सन्न्यसितुं शीलं अस्येति। योगारूढः प्राप्तः तेन योगः इत्युच्यते ॥ ४ ॥

यदैवं योगारूढः तदाऽनर्थप्रदात्संसारात् अयं आत्मा आत्मना उद्धृतो भवति इत्यत्राह -

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५ ॥

आत्मना - विष्येष्वनासक्तेन मनसा। आत्मानं - शोकसागरे निमग्नं - स्वं, उद्धरेत् - ऊर्ध्वं हरेत् योगारूढतामापादयेत् इत्यर्थः । आत्मानं नावसादयेत् । अधो न निपातयेत् । हि यस्मात् आत्मनः स्वस्य - आत्मैव स्ववशीकृतं मन एव बन्धुः उपकारकः । न ह्यन्यः कश्चित्बन्धुः यः संसारमुक्तये भवति । बन्धुर्हि तावत् मोक्षं प्रति प्रतिकूल एव स्नेहादि-बन्धनायतनत्वात् इति भाष्यम् । आत्मनः स्वस्य आत्मैव अवशीकृतं मन एव रिपुः शत्रुः अधोगतिप्रापकत्वात् ॥ ५ ॥

ननु कथंभूतस्य आत्मनः मित्रत्वं शत्रुत्वं च भवति इत्यत्र आह-

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

येन आत्मना मनसैव आत्मा कार्यकरणसंघातः जितः वशीकृतेन्द्रियः। तस्य आत्मनः मनसः आत्मा, आत्मा - बन्धुः अनात्मनः अविजितमनसस्तु आत्मा मनः शत्रुवत् शत्रुरिव, शत्रुभावे अपकारे वर्तेत। तदुक्तं पाराशरेण ।

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासङ्गी मुक्त्यैनिर्विषयं मनः ॥ इति ॥ ६ ॥

जितात्मनः स्वस्मिन् मित्रत्वं दर्शयति -

जितात्मनःप्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥

जितः आत्मा कार्यकरणसंघातः येन तस्य जितात्मनः प्रशान्तस्य उपशान्तस्य पुंसः मानापमानयोः - पूजापरिभवयोः सतोरपि समाहितः स्वात्मनि स्थितो भवति। नान्यस्य ॥ ७ ॥

उक्तार्थं उपसंहरति-

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥ ८ ॥

शास्त्रोक्तपदार्थपरिज्ञानं ज्ञानं शास्त्रतो ज्ञानानां तदैव स्वानुभवकरणं विज्ञानं ताभ्यां तृप्तः सञ्जात अलंप्रत्ययः आत्मान्तःकरणं यस्य स कूटस्थः अप्रकम्पत्वात् । कूटवत् - अयोघनवत् तिष्ठति इति कूटस्थः । अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम् इत्यमरः अमरकोशः ३.३.) जितेन्द्रियः - समलोष्ठाश्मकाञ्चनः । समानि - लोष्ठं मृत्तिकाशकलं च अश्मा - पाषाणश्च काञ्चनश्च तानि यस्य सः । एवंविधः योगी युक्तः समाहितः साक्षादात्मभावेन वर्तमान इत्युच्यते ॥ ८ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

किञ्च -

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

सुहृत् प्रत्युपकारमनपेक्ष्य उपकर्ता । मित्रं - स्नेहवान्, अरिः - शत्रुः उदासीनः कस्यापि पक्षपातरहितः । मध्यस्थः विरुद्धयोः उभयोः हितैषी । द्वेष्यः आत्मनः अप्रियः बन्धुः - संबन्धी इत्येतेषु च । साधुषु शास्त्रानु-वर्त्तिष्वपि - पापेषु निषिद्धकारिष्वपि समा - प्रियाप्रियरहिता बुद्धिःयस्य समबुद्धिः विशिष्यते - विशिष्टो भवति । यागारूढानां श्रेष्ठो भवति इति भावः। विमुच्यते इति पाठे तु साक्षान्मुक्तो भवति ॥ ९ ॥

अतः उत्तमफलप्राप्त्यर्थं एवं वर्त्तितव्यम् इत्याह -

योगी युञ्जीत सततमात्मानं रहसि स्थितः।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥

योगी - ध्याता, एकाकी - असहायः, यतचित्तात्मा - यतौ चित्तं अन्तःकरणं आत्मा देहश्च तौ येन सः निराशीः । निर्गता आशीः तृष्णा यस्मात् सः । अपरिग्रहः - न विद्यते परिग्रहः संग्रहः यस्य सः । रहसि - एकान्ते गिरिगुहास्थितः सन् आत्मानं - अन्तःकरणं सततं सर्वदा युञ्जीत-समादध्यात् ॥ १० ॥

अथ योगाभ्यासिनः आदौ तावत् आसननियममाह द्वाभ्यां-

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शुचौ - स्वभावतः संस्कारतो वा शुद्धदेशे - स्थाने न अत्युच्छ्रितं - न अत्युन्नतम्। नातिनीचम् - नातिह्रस्वम् चैलाजिनकुशोत्तरम् - चेलं च अजिनं च कुशेभ्यः उत्तरे उपरि स्थिते यस्य तत् समभूमौ पूर्वं दर्भानास्तीर्य तदुपरि कृष्णमृगादिचर्म आसाद्य तदुपरि वस्त्रावरणं कल्पनीयम् । आत्मनः आसनं स्थिरम् - अचलम् यथा तथा प्रतिष्ठाप्य योगं युञ्जयन् इत्युत्तरेण अन्वयः ॥ ११ ॥

ततः-

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये॥ १२॥

तत्र - तस्मिन् आसने उपविश्य मनः एकाग्रं - अचञ्चलं कृत्वा यतचित्तेन्द्रियक्रियः यताः संयताः चित्तस्य इन्द्रियाणां च क्रिया यस्य सः योगी । आत्मविशुद्धये- अन्तःकरण शुद्ध्यर्थं योगं युञ्ज्यात् - अभ्यसेत् ॥ १२ ॥

एवं आसनलक्षणमुक्त्वा शरीरधारणप्रकारमाह द्वाभ्यां-

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥ १३॥

स्थिरः स्थिरो भूत्वा इत्यर्थः । समं - कायश्च शिरश्च ग्रीवाश्च कन्धरा - च कायशिरोग्रीवं - प्राण्यङ्गत्वात् एकवद्भावः । ततः तत् अचलं निश्चलं यथा तथा धारयन्, स्वं - नासिकाग्रं संप्रेक्ष्य- अवलोक्य । अत्र इव शब्दः

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

अध्याहर्तव्यः । नासाग्रे निरीक्षणमात्रस्य अविवक्षितत्वात् । दिशः अनवलोकयन् युक्तः आसीत इत्युत्तरेण अन्वयः ॥ १३ ॥

ततश्च -

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥

प्रकर्षेण शान्तः उपरतः आत्मा - अन्तःकरणं यस्य सः प्रशान्तात्मा। विगतभीः गतभयः ब्रह्मचारिव्रते- गुरुशुश्रूषा भैक्ष्यभोजनादौ स्थितः मनः संयम्य - प्रत्याहृत्य मयि चित्तं यस्य सः मच्चितः। अहं परो यस्य सः मत्परः युक्तः। एवं समाधियुक्तः सन् आसीत - उपविशेत् ॥ १४ ॥

अभ्यस्तयोगस्य फलमाह—

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

नियतमानसः योगी, सदा- नित्यं, एवं - उक्तप्रकारेण, आत्मानं - मनः युञ्जन् - समाधानं कुर्वन्, निर्वाणपरमां, निर्वाणं - मोक्षः तत् परमा - निष्ठा यस्याः तां, अत एव, मत्संस्थां - मद्रूपेणावस्थितिं शान्तिं उपरतिं, अधिगच्छति ॥ १५ ॥

योगिन आहारनियममाह द्वाभ्याम्—

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे अर्जुन, अत्यश्नतः - आत्मपरिमितान्नपरिमाणमतीत्य भुञ्जानस्य, योगः चित्तैकाग्र्यं, नास्ति एकान्तं- नितान्तं - अनश्नतः - अभुञ्जानस्य, योगः नास्ति। 'यदात्मसंमितमन्नं तदवति तन्न हिनस्ति, यद्भूयो हिनस्ति तद्यत्कनीयो (न तदवति) इति श्रुतेः। तस्मात् योगी स्वस्य परिमितात् अन्नात् अधिकं न्यूनं वा नाश्नीयात्। योगशास्त्रे च–

सव्यञ्जनाशनस्यार्धं तृतीयमुदकस्य तु।
वायोस्सञ्चारणार्थं हि चतुर्थमवशेषयेत् ॥

इत्यादिपरिमाणं, अतिस्वप्नशीलस्य च योगो नास्ति, जाग्रतः - अतिमात्रं जागरूकस्य, योगो नैव ॥ १६ ॥

योगः कथंविधस्य भवति इत्यत्राह–

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७॥

युक्तौ - नियतौ, आहारः - अन्नं, विहारः - पादविन्यासश्च तौ यस्य तस्य युक्ताहारविहारस्य। कर्मसु - कार्येषु, युक्ता - यता, चेष्टा यस्य तस्य युक्तचेष्टस्य, युक्तौ - नियतकालौ, स्वप्नो - निद्रा च, अवबोधो जागरश्च यस्य तस्य युक्तस्वप्नावबोधस्य। पुंसः, योगः दुःखहा - संसारदुःखहा, भवति एवंविधस्य योगः सिध्यतीति भावः ॥ १७ ॥

कदा युक्तो योगी भवतीत्यत्राह -

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निस्स्पृहस्सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

यदा चित्तं विनियतं - विशेषेण नियतं, एकाग्रतामापन्नं सत् बाह्यार्थचिन्तां त्यक्त्वा, आत्मन्येव, अवतिष्ठते - वर्तते, यदा, सर्वकामेभ्यो निस्स्पृहः निर्गततृष्णश्च भवति, तदा युक्तः - समाहितः इत्युच्यते ॥ १८ ॥

दृष्टान्तेन समाहितचित्तलक्षणमाह—

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९ ॥

निवातस्थः, निवातो - वायुवर्जितो देशः, तस्मिन्, स्थितो दीपः, प्रदीपः, यथा नेङ्गते - न चलति, आत्मनः, योगं समाधियोगं, युञ्जतः - अनुतिष्ठतः यतचित्तस्य - संयतान्तःकरणस्य, सा उपमा, उपमीयत इत्युपमा, (योगिनः) चित्तस्थैर्यस्य इति शेषः । योगज्ञैः सा स्मृता- चिन्तिता ॥ १९ ॥

भूयोऽपि योगसमाधिलक्षणं त्रिभिराह—

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥

यत्र - यस्मिन्नवस्थाविशेषे, चित्तं, योगसेवया योगानुष्ठानेन, निरुद्धं निगृहीतं सत्, उपरमते - उपरतिं गच्छति । किं च - यस्मिन्नवस्थाविशेषे, आत्मना - समाधिपरिशुद्धेनान्तःकरणेन, आत्मानं - परमात्मानं, पश्यन् अवलोकयन्, आत्मनि - स्वस्मिन्नेव, तुष्यति - तुष्टिं भजते, तं योगं विद्यात् इति वक्ष्यमाणेन चतुर्थश्लोकेन सम्बन्धः ॥ २० ॥

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किञ्च -

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः॥ २१॥

यत्र - यस्मिन्नवस्थाविशेषे, अतीन्द्रियं - इन्द्रियगोचरातीतं अविषय-जनितमित्यर्थः। बुद्ध्या - विशुद्धसत्त्वप्रधानया चरमान्तःकरणवृत्त्यैव गृह्यत इति बुद्धिग्राह्यं, यत्तत् - किमपि सुखं, अत्यन्तमेव भवतीत्यात्यन्तिकं यथा तथा अनन्तमित्यर्थः। वेत्ति किञ्च, यत्र - यस्मिन्नवस्थाविशेषे, स्थितः- अयं योगी, तत्वतः- तत्त्वस्वरूपात्, न चलति - न च्यवते तं, योगसंज्ञितं, विद्यादिति सम्बन्धः[43] ॥ २१ ॥

किञ्च -

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते॥ २२॥

यं - आत्मलाभं, लब्ध्वा ततः - तस्मादात्मलाभात्, अधिकं, अपरं - अन्यं लाभं, न मन्यते - न चिन्तयति, किञ्च - यस्मिन्, आत्मतत्वे, स्थितो, गुरुणा - महता, दुःखेनापि शस्त्रविषादिलक्षणेन विषादेन, न विचाल्यते - विकृतिं न प्राप्यते ॥ २२ ॥

एवं श्लोकत्रयेणोक्त आत्मावस्थविशेषो यः।
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ॥

43. 'यत्र' इत्यादीनां यच्छब्दानां 'तं योगसंज्ञितं विद्यात्' इत्यनेन अन्वयः॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

तं - पूर्वोक्तावस्थाविशेषं, दुःखसंयोगवियोगं, दुःखेन संयोगः तेन वियोगो विश्लेषस्तं, दुःखगन्धेनापि वर्जितो ब्रह्मानन्द इति भावः। योग इति सञ्जाता संज्ञा अस्येति योगसंज्ञितः तं, विद्यात् जानीयात् ॥

योगफलमुपसंहृत्य पुनरन्वारम्भेण[44] योगस्य कर्तव्यतामाह 'स' इति सार्धश्लोकेन–

स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३ ॥

निश्चयेन - निर्णयेन, संशयाभावेन, अनिर्विण्णचेतसा, अनिर्विण्णं - निर्वेदरहितं, चेतः चित्तं तेन योगो, योक्तव्यः - लीलयैव योजनीयः ॥ २३ ॥

किं कृत्वा इत्यत्राह–

सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥ २४॥

सङ्कल्पः प्रभवो येषां[45] तान् सङ्कल्पप्रभवान्, कामान् अशेषतः - निश्शेषं त्यक्त्वा किं च, मनसा विवेकयुक्तेन चित्तेन एव इन्द्रियग्रामं - इन्द्रियाणां समुदायः, समन्ततः - समन्तात्, विनियम्य - नियमनं कृत्वा, योगो, योक्तव्य इति पूर्वेण सम्बन्धः॥ २४॥

पूर्ववासनया मनसि चञ्चलेऽपि धारणया निश्चलं कर्तव्यमित्याह–

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥ २५॥

44. प्रकारान्तरेण योगस्य कर्तव्यत्वोपदेशारम्भः अत्र अन्वारम्भः तेन ।

45. प्रभवः येषां कामानां ते सङ्कल्पप्रभवाः तान्

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धृतिगृहीतया, धृत्या – धैर्येण धारणया वा, गृहीतया (युक्तया) बुद्ध्या, मनः आत्मसंस्थं, 'आत्मैव सर्वं ततोऽन्यन्न किञ्चिदस्ति इति एवम् आत्मनि संस्थितं, कृत्वा, शनैश्शनैः – न सहसा, उपरमेत् – उपरतिं कुर्यात्, अतः परं, किञ्चिदपि, न चिन्तयेत् ॥ २५ ॥

एवमपि मनसश्चञ्चलस्वभावत्वात् तस्य कथं धारणा भवेत् इत्यत्र आह –

यतो यतो निश्चलति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥

स्वाभाविकदोषात्, चञ्चलं – अत्यर्थं चलं, अत एव अस्थिरं, मनः, यतो यतः यस्माद्यस्मात्, शब्दादेः निमित्तात्, निश्चलति – निर्गच्छति, ततस्ततः – तस्मात्तस्माच्छब्दादिविषयनिमित्तात् एतत् – मनः नियम्य – प्रत्याहृत्य, आत्मन्येव, वशं नयेत् – आपादयेत् ॥ २६ ॥

इत्थं योगाभ्यासबलात् आत्मन्येव मनः प्रशाम्यति इत्याह–

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

प्रशान्तमनसं, अत एव, शान्तरजसं, शान्तं – क्षीणं, रजः मोहादिक्लेशरूपं यस्य तं, अकल्मषं – धर्माधर्मादिवर्जितं, ब्रह्मभूतं – ब्रह्मैकस्वरूपं, जीवन्मुक्तमिति यावत्। एनं योगिनं, उत्तमं, सुखं – निरतिशयं सुखं, स्वयं, उपैति हि – उपगच्छति हि [46] ॥ २७ ॥

46. मनसः तद्वृत्त्योरभावे सुषुप्तौ स्वरूपसुखाविर्भावप्रसिद्धिं द्योतयति 'हि' शब्दः (गू)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

तादृशयोगयुक्तस्य फलमाह–

एवं युञ्जन् सदात्मानं योगी विगतकल्मषः।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८ ॥

एवं उक्तप्रकारेण, सदा आत्मानम् अन्तःकरणं, युञ्जन् - वशं कुर्वन् विगतकल्मषः योगी, सुखेन - अनायासेन, ब्रह्मसंस्पर्शं, ब्रह्मणा - परमात्मना, सम्यक्स्पर्शं आनन्दानुभवो यस्य तत् उत्कृष्टं फलं[47] अश्नुते प्राप्नोति ॥ २८ ॥

इदानीं योगस्य यदुत्कृष्टफलं निरतिशयं ब्रह्मैकत्वदर्शनं सर्वसंसार-विच्छेदकारणं तदाह–

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥ २९ ॥

सर्वत्र समदर्शनः, सर्वेषु - ब्रह्मादिस्थावरान्तेषु, समं - निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं यस्य सः योगयुक्तात्मा सन्, योगेन - अभ्यस्त-योगेन, युक्तः- समाहितः आत्मा - अन्तःकरणं यस्य सः, सर्वभूतस्थं, सर्वेषु भूतेषु- ब्रह्मादिषु स्थितं आत्मानं, स्वं, आत्मनि स्थितानि, सर्वभूतानि ब्रह्मादीनि सर्वभूतानि, आत्मनि - एकतां गतानीत्यर्थः। ईक्षते-पश्यति ॥ २९ ॥

47. ब्रह्माभिन्नं सुखम् इत्यर्थः।

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतस्यात्मैकत्वदर्शनस्य फलमाह—

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥

यः सर्वत्र - सर्वभूतेषु, मां - वासुदेवं, पश्यति मयि - सर्वात्मनि, सर्वं- ब्रह्मादिभूतजातं च, पश्यति, तस्य - आत्मैकत्वदर्शिनः, अहं - ईश्वरः, न प्रणश्यामि (न परोक्षतां गमिष्यामि) स च विद्वान्, मे - मम वासुदेवस्य, न प्रणश्यति - परोक्षो न भविष्यति। तस्य मम च एकात्मत्वादिति भावः ॥ ३० ॥

एवंविधस्य योगिनः कर्तव्यता नास्तीत्याह—

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ३१ ॥

यः, एकत्वं - अभेदं आस्थितः - प्राप्तस्सन्, सर्वभूतस्थितं, मां भजति, स योगी, सर्वथा - सर्वप्रकारैर्यथेष्टाचारैः वर्तमानोऽपि,[48]। 'अपि' शब्दस्वारस्यात् सदाचारसम्पन्नः किमु वक्तव्यमित्याशयः। मयि वर्तते, नित्यमुक्तत्वात् परमपदे वर्तत इत्यर्थः ॥ ३१ ॥

परमकारुणिको योगी योगिषु गरीयानित्याह—

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

---

48. लोकानुग्रहार्थं कर्म कुर्वन् अकुर्वन् अन्यथा कुर्वन् वा न हीयते इत्यर्थः।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

C-0. In Public Domain. Digitization by eGangotri. Funding MID

हे अर्जुन, यः सर्वत्र - सर्वभूतेषु - सुखं वा - अनुकूलं, दुःखं वा यदि वा - प्रतिकूलं च। अव्ययानामनेकार्थत्वात् 'वा' शब्दोऽत्र समुच्चयार्थः। आत्मौपम्येन-स्वसाम्येन, समं - तुल्यं, पश्यति, कस्यचित्प्रतिकूलं नाचरति, अहिंसक इत्यर्थः। स योगी, परमः - श्रेष्ठ, इति मतः - मम संमतः ॥ ३२ ॥

अतः सर्वयोगानां समदर्शनलक्षणस्य यथोक्तस्यैव तस्य योगस्य दुस्सम्पाद्यतामालक्ष्य तत्प्राप्त्युपायं शुश्रूषुः अर्जुन उवाच-

योऽयं योगस्त्वया प्रोक्तस्साम्येन मधुसूदन।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितं स्थिराम् ॥ ३३ ॥

हे मधुसूदन ! त्वया, साम्येन - लयविक्षेपकषायादिशून्यतया मनसः समत्वेन सहितो योऽयं योगः प्रोक्तः अहं, चञ्चलत्वात्, एतस्य - योगस्य स्थिरां अचलां, स्थितिं, न पश्यामि ॥ ३३ ॥

भूयस्तदेवाह–

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥

'कृष' - विलेखन[49] इति धातोः भक्तजनदुरितान्यपकर्षतीति कृष्णः तस्य सम्बुद्धिः हे कृष्ण ! मनः, चञ्चलं हि, प्रमथ्नाति शरीरमिन्द्रियाणि च, विक्षिपति परवशीकरोतीति प्रमाथि - प्रमथनशीलं च, बलवत् -

49. विलेखनं विकर्षणम्।

uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

केनचिन्नियन्तुमशक्यं च, दृढं - सारवच्च, अहं तस्य, मनसो, निग्रहं निरोधं, वायोः निग्रहमिव, सुदुष्करं - कृच्छ्रेणापि कर्तुमशक्यं मन्ये।

तदुक्तं वसिष्ठेन -

अप्यब्धिपानान्महतस्सुमेरोर्मूलनादपि।
अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः' (महो. ३.२०) इति ॥ ३४ ॥

तस्मान्मनोनिग्रहोपायो वक्तव्य इत्याकाङ्क्षायां -

श्रीभगवानुवाच—

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥

हे महाबाहो ! कौन्तेय ! मनः, चलं, दुर्निग्रहं - निग्रहीतुमशक्यं च। असंशयम्- अस्मिन्नर्थे संशयो नास्ति किन्तु अभ्यासेन - अनवरतात्मानुसन्धानेन, वैराग्येण- दृष्टादृष्टेषु - भोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्येन च मनो, गृह्यते - निगृह्यते। एवं राजयोगे च—

'उन्मन्यवस्थाधिगमायविद्वन्नुपायमेकं तवं निर्दिशामः।
पश्यन्नुदासीनतया प्रपञ्चं सङ्कल्पमुन्मूलय सावधानः ॥' इति ॥ ३५ ॥

अविजितात्मनो योगो दुर्लभः। संयतात्मनस्तु सुलभ इत्याह—

असंयतात्मना योगो दुष्प्राप इति मे मतिः।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

असंयतात्मना - अभ्यासवैराग्याभ्यामसंयत आत्मा अन्तःकरणं यस्य तेन, योगः दुष्प्रापः प्राप्तुमशक्यः। **यतता** - प्रयत्नं कुर्वता, **वश्यात्मना** अभ्यासयोगाभ्यां वश्य अधीन आत्मा मनो यस्य, तेन, तु, **उपायत**[50] अवाप्तुं शक्य इति, मे, मतिः - बुद्धिः, निश्चय इति भावः ॥ ३६ ॥

तत्र योगाभ्यासाङ्गीकरणेन इहलोकपरलोकप्राप्तेः निमित्तानि कर्माणि संन्यस्तानि योगसिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्तमिति, योगी योगमार्गाच्चलितचित्त इति तस्य नाशमाशङ्क्य अर्जुन उवाच–

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७॥

हे कृष्ण, योगमार्गे श्रद्धया आस्तिक्यबुद्ध्या, **उपेतः** सङ्गतः तदनन्तरं, न विद्यते योगमार्गे, यतिः - प्रयत्नः, यस्य स **अयतिः**। अत एव **योगात्**- योगमार्गात्, **चलितं** - विषयेन्द्रियप्रवणं, **मानसं** - यस्य सः **चलितमानसः**। नष्टस्मृतिः पुरुषः **योगसंसिद्धिं** - योगफलं,सम्यग्दर्शनमिति यावत्। **अप्राप्य, कां गतिं** - प्राप्यस्थानं, **गच्छति** ॥ ३७ ॥

अपिच-

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८॥

50. उपायः - वैराग्यादिपूर्वकः मनो निरोधः।

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे महाबाहो श्रीकृष्ण ! ब्रह्मणः, पथि - उपक्रान्तमार्गे[51], विमूढः - अविज्ञातात्मतत्वः पुमान्, अप्रतिष्ठः निराश्रयस्सन्, अत एव उभयं - कर्ममार्गो योगमार्गश्चेति द्वयं, तस्मात्, विभ्रष्टः- गलितस्सन्, छिन्नाभ्रमिव - छिन्नमेघ इव । यथा मेघखण्डः पूर्वस्माद्बृहतो मेघात् छिन्नस्सन् परं बृहन्तं मेघमप्राप्य मध्ये विभ्रष्टो भवति तद्वन्न नश्यति कच्चित्[52] ॥ ३८ ॥

प्रश्नार्थमुपसंहरति–

एतन्मे संशयं कृष्ण च्छेत्तुमर्हस्यशेषतः ।
त्वदन्यस्संशयस्यास्य च्छेत्ता न ह्युपपद्यते ॥ ३९ ॥

हे कृष्ण, त्वं, मे - मम - एतत् संशयं - सन्देहं, अशेषतः- निश्शेषं, छेत्तुं - अपनेतुं, अर्हसि, हि - यस्मात्, अस्य संशयस्य, छेत्ता - नाशयिता, त्वदन्यः, नोपपद्यते न सम्भवति ॥ ३९ ॥

तस्य नाशो नास्तीति परिहर्तुं श्रीभगवानुवाच- पार्थेति सार्धश्लोक-चतुष्टयेन –

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥

हे पार्थ ! इह - अस्मिन् लोके च, तस्य - गलितयोगस्य, विनाशः, नाशः, पूर्वस्माज्जन्मनो हीनजन्मप्राप्तिरित्यर्थः । न विद्यते - नास्ति ।

51. ब्रह्मप्राप्तिमार्गे ज्ञाने विमूढः विक्षिप्तः । अनुत्पन्नब्रह्मात्मैक्यसाक्षात्कारः इति यावत् (गू) अनुत्पन्नब्रह्मात्मैक्यसाक्षात्कारः इति यावत् (गू)

52. कच्चिन्न इति साभिलाषप्रश्ने (गू)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तनोत्यात्मानं पुत्ररूपेणेति तातः पिता तस्य सम्बुद्धिः हे तात ! वात्सल्येन तातेत्युक्तम्। हि - यस्मात्, कल्याणकृत् - श्रद्धया योगे प्रवृत्तत्वात् शुभकृत् । कश्चिदपि, दुर्गतिं - कुगतिं, कुत्सितप्राप्यस्थानमिति यावत् । न गच्छति ॥ ४० ॥

तर्हि किं तस्य भवतीत्यत्राह–

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीस्समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

योगभ्रष्टः - विगलितयोगः पुमान्, **पुण्यकृतां** - अश्वमेधादिसुकृत-कारिणां, **लोकान्, प्राप्य** - गत्वा, **शाश्वतीः** - नित्याः, बह्वय इति भावः। **समाः** संवत्सरान्, **उषित्वा**- वाससुखमनुभूय, **शुचीनां** - सदाचारेण पवित्राणां, **श्रीमतां** - सम्पन्नानां, **गेहे** - गृहे, **अभिजायते** - उत्पद्यते ॥ ४१ ॥

अल्पकालाभ्यासयोगभ्रंशे गतिरियमित्युक्त्वा चिरकालाभ्यस्तयोगभ्रंशे तु पक्षान्तरमाह–

अथ वा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

अथवा - **धीमतां** - व्यवसायात्मकबुद्धिमतां **योगिनां, कुले** - वंश **एव, भवति** - जायते। **हि** - यस्मात् कारणात्, **यत् जन्म ईदृशं**-योगवासनाविशिष्टकुले प्राप्तं, **एतज्जन्म, लोके, दुर्लभतरं**- मोक्षहेतुत्वादतिशयेन दुर्लभम् ॥ ४२ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत एवं तत:—

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् ।
यतते च ततो भूयस्संसिद्धौ कुरुनन्दन ॥ ४३ ॥

हे कुरुनन्दन, तत्र - योगिनां कुले, पौर्वदैहिकं - पूर्वस्मिन् देहे भवं, तं बुद्धिसंयोगं - व्यवसायात्मकबुद्ध्या संयोग: तं लभते। तत: सुप्तप्रबुद्धवत्, भूय: - बहुतरं, संसिद्धौ - सम्यग्ज्ञाननिमित्तं, यतते - प्रयत्नं करोति ॥ ४३ ॥

तत्र हेतु:-

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि स: ।

तेन - पूर्वाभ्यासेन - पूर्वजन्मकृताभ्यास:तेनैव अवशोऽपि - कुतश्चिद्विघ्नात् अनिच्छन्नपि, स: - विगलितयोग: पुमान्, ह्रियते - विषयेभ्यो निवर्त्यते। ब्रह्मनिष्ठ: क्रियत इति भाव:। इममर्थमेव कैमुतिकन्यायेन दर्शयति जिज्ञासुरिति—

जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥

योगस्य स्वरूपं, जिज्ञासु: ज्ञातुमिच्छुरपि, शब्दमयं च तत् ब्रह्म च शब्दब्रह्म - वेद: तत्, वेदोक्तकर्मानुष्ठानफलमिति यावत्। अतिवर्तते - अतिक्रामति। अधिकफलं प्राप्य मुच्यते। किमुत बुद्ध्या योगं तन्निष्ठ: अभ्यासं कुर्वन्निति भाव: ॥ ४४ ॥

कस्माद्धेतोर्योगित्वं श्रेय इत्याकाङ्क्षायामाह—

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिष: ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

योगी - ज्ञानयुक्तस्तु, विद्वानित्यर्थः। आदौ, प्रयत्नात्, यतमानः, प्रयत्नं कुर्वन्, अत एव, संशुद्धकिल्बिषः - संशुद्धपापस्सन्, अनेकजन्मसंसिद्धः अनेकेषु जन्मसु उपचितेन योगेन संसिद्धः, सम्यक् सिद्धो ज्ञानी, भूत्वा, ततः परां - उत्कृष्टां गतिं, याति ॥ ४५ ॥

अतिशयितपुरुषार्थनिष्ठया योगिनः सर्वस्मादाधिक्यमाह—

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥

हे अर्जुन ! योगी, तपस्विभ्यः, तपः - कृच्छ्रचान्द्रायणादि, तदेषामस्तीति तपस्विनः तेभ्यः, अधिकः - श्रेष्ठः। किञ्च - योगी, ज्ञानं शास्त्रार्थपाण्डित्यमेषामस्तीति ज्ञानिनस्तेभ्यो ज्ञानिभ्यः, अधिकः - श्रेष्ठः, इति, मतः, ज्ञातः। किञ्च योगी, कर्म - योगादि, तद्वन्तः कर्मिणः तेभ्यः अधिकः तस्मात् - कारणात्, योगी भव ॥ ४६ ॥

योगनिष्ठं भङ्ग्यन्तरेण स्तौति—

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ ४७॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे अभ्यासयोगो नाम षष्ठोऽध्यायः ॥

यः श्रद्धावान् सः, मां, मद्गतेन, मयि - वासुदेवे, गतेन समाहितेन, अन्तरात्मना - अन्तःकरणेन, भजते - सेवते, सः, सर्वेषां

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मन्त्रपाठादियोगनिष्ठानां योगिनामपि, युक्ततमः - श्रेष्ठः योगी इति मे, मतः - संमतः ॥ ४७ ॥

इतिश्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीस्वामि शिष्यरामचन्द्रानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजना समाख्यायां अभ्यासयोगो नाम षष्ठोऽध्यायः ॥

॥ सप्तमोऽध्यायः ॥

पूर्वाध्यायान्ते 'स मे युक्ततमो मतः' इति प्रश्नबीजमुपन्यस्य स्वयमेव मदीयं तत्वमीदृशं, मद्गतान्तरात्मा चैवं स्यादित्येतद्विवक्षुः श्रीभगवानुवाच—

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

हे पार्थ ! त्वं, मयि - परमेश्वरे, आसक्तं मनो यस्य सः **आसक्तमनाः** **योगं** - मनस्समाधानं, **युञ्जन्** कुर्वन्नित्यर्थः। अहमेक एवाश्रयो यस्य सः **मदाश्रयः** सन्, **समग्रं** - परिपूर्णं **मां**, **यथा** - येन प्रकारेण, **असंशयं** - निस्सन्देहं यथा तथा ज्ञास्यसि, तत्, मया वक्ष्यमाणं, शृणु ॥ १ ॥

तज्ज्ञानमपि मद्विषयमित्याह—

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यद् ज्ञातव्यमवशिष्यते ॥ २ ॥

अहं, **सविज्ञानं** अनुभवसहितं, **इदं**, **ज्ञानं** -श्रवणजन्यज्ञानं, **अशेषतः**- साकल्येन, **ते** - तुभ्यं, **वक्ष्यामि**। श्रोतुरभिमुखीकरणाय विवक्षितं ज्ञानं

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

स्तौति। यद् ज्ञानं, ज्ञात्वा - अवगत्य, प्राप्येत्यर्थः। इह - मोक्षविषये, भूयः, पुनः, ज्ञातव्यं - अन्यत् पुरुषार्थसाधनं, नावशिष्यते - अवशिष्टं नास्ति। यस्तु मत्तत्वज्ञो भवति, स सर्वज्ञ इति भावः ॥ २ ॥

वक्ष्यमाणज्ञानस्य प्रायेण दुष्प्रापतामाह—

मनुष्याणां सहस्त्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः ॥ ३ ॥

मनुष्याणां - शास्त्राधिकारयोग्यानां मर्त्यानां मध्ये, सहस्त्रेषु, कश्चित् सिद्धये - आत्मज्ञानसिद्ध्यर्थं, यतति- प्रयत्नं करोति - परस्मैपदमार्षम् । यततां यत्नं कुर्वतां मध्ये, सहस्रेषु, कश्चित्, सिद्धो भवति । सिद्धानामपि सहस्त्रेषु, कश्चित्, मां, तत्वतः यथावत्, वेत्ति । एवं तज्ज्ञानं दुष्प्रापमपि, वक्ष्यामीत्याशयः ॥ ३ ॥

श्रोतारं प्ररोचनेनाभिमुखीकृत्याह—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥

भूमिः, भिन्नाप्रकृतिरष्टधा इति वचनात् न स्थूला, किन्तु पृथिवीतन्मात्रमिति भावः। तथा, आपः- उदकतन्मात्रं, अनलः अग्नितन्मात्रं, वायुः- वायुतन्मात्रं, खं च - आकाशतन्मात्रं, मनः मनसः कारणम् अहङ्कारश्च, बुद्धिः इत्यहङ्कारकारणं महत्तत्वं च, अहङ्कारः अविद्यासंयुक्तमव्यक्तमित्यर्थः।

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इति अष्टधा, भिन्ना - भेदं गता, इयं - मदुक्ता मे - मम प्रकृतिः - मायाशक्तिः ॥ ४ ॥

एवमपरां प्रकृतिमुक्त्वा परां प्रकृतिमाह—

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥

महाबाहो इयं प्रकृतिः, पर न भवतीति **अपरा**। निकृष्टा, मलिनत्वात् बन्धकत्वाच्च इति भावः। **इतः** - अपरप्रकृतेः **अन्यां** - इतरां विशुद्धां, इत्यर्थः। **जीवभूतां** - क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां, **परां** - उत्कृष्टां, **मे** - मम, **प्रकृतिं, विद्धि यया** - परप्रकृत्या, **इदं जगत् धार्यते**। अन्तःप्रविष्ठत्वादिति भावः ॥ ५ ॥

इत्थं प्रकृतिं द्विधा निरूप्य तद्द्वारेण स्वस्य सृष्ट्यादिकारणत्वमाह—

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

सर्वाणि भूतानि एतद्योनीनि, एते - क्षेत्रक्षेत्रज्ञलक्षणे परापरे प्रकृती योनी कारणे येषां तानीत्येवं, **उपधारय** - जानीहि। **तथा** - प्रकृतिद्वयद्वारेण, **अहं, कृत्स्नस्य जगतः प्रभवः**[53] - उद्भवः **प्रलयः**[54]- विनाशः एवं प्रकृतिसंयोगादहं सर्वज्ञः ईश्वरः, जगतः कारणमित्यर्थः ॥ ६ ॥

---

53. प्रभवः - प्रभवति अस्मात् इति प्रभवः उत्पत्तिकारणम्।
54. प्रलयः - प्रलीयतेऽस्मिन्निति प्रलयः नाशकरणम्। 'तथा' शब्देन 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति अग्रिमश्लोको त्तरार्धगतस्थिति कारणत्वनिर्देशः ॥ (ब्र)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यस्मात् सप्रकृतिकस्य जगतः कारणमहं तस्मादेव—

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥

हे धनञ्जय, मत्तः, परतरं, श्रेष्ठं, अन्यत् - कारणं किञ्चित्, नास्ति । अहमेव जगत्कारणमित्यर्थः। मयि, सर्वं, इदं - जगत्, सूत्रे मणिगणा इव प्रोतं-अनुस्यूतं ग्रथितम् इत्यर्थः ॥ ७ ॥

केन धर्मेण विशिष्टे मयि सर्वमिदं प्रोतमित्यत्राह—

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवस्सर्ववेदेषु शब्दःखे पौरुषं नृषु ॥ ८ ॥

हे कौन्तेय, अप्सु, रसः, अहं, रसतन्मात्रम् । रसभूते मयि, आपः, प्रोता इत्यर्थः। एवं सर्वत्र तद्विभूतिरुन्नेया । अहं, शशिसूर्ययोः प्रभा, अस्मि । सर्ववेदेषु प्रणवः - ओङ्कारोऽस्मि । खे - गगने, शब्दः सारभूतः, अहमस्मि । नृषु - पुरुषेषु, पौरुषं - पुरुषस्वभावः, अहं, अस्मि ॥ ८ ॥

किञ्च—

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥

पृथिव्यां, पुण्यः सुरभिः, गन्धः अस्मि, पृथिव्याः स्वभावत एव गन्धस्य पुण्यत्वं दर्शितम्। अबादिषु रसादेः पुण्यत्वोपलक्षणार्थम् ।[55] अपुण्यत्वं

55. यत्तु पृथिव्यां गन्धस्य स्वाभाविकं पुण्यत्वं दर्शितम्, तत् अबादिषु रसोदेरपि स्वाभाविकपुण्यस्य उपलक्षणार्थम् ।

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गन्धादीनामविद्याधमपिक्षम्। विभावसौ - अग्नौ, तेजश्च अस्मि। सर्वभूतेषु। जीव्यन्तेऽनेनेति जीवनं - प्राणधारणं आयुरिति यावत्। तपस्विषु, तपश्च, अस्मि ॥ ९ ॥

किञ्च–

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥

हे पार्थ ! सनातनं - चिरन्तनं, मां, सर्वभूतानां, बीजं प्ररोहकारणं, विद्धि। बुद्धिमतां, बुद्धि: - अन्त:करणस्य विवेकशक्ति:, तद्वतां, बुद्धि:, अस्मि तेज: प्रागल्भ्यं तद्वतां तेजस्विनां तेज:, अहं अस्मि ॥ १० ॥

किं च–

बलं बलवतां चाहं कामरागविवर्जितम्।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥

बलवतां, बलं - सामर्थ्यं ओज: तद्वतां, कामरागविवर्जितं, असन्निकृष्टेषु विषयेषु तृष्णाकाम:, प्राप्तेषु विषयेषु रञ्जना राग:, ताभ्यां विवर्जितं, देहधारणमात्रार्थमित्यर्थ:। बलं, अहं, अस्मि। हे भरतर्षभ - भरतवंशश्रेष्ठ, भूतेषु प्राणिषु धर्माविरुद्ध:, धर्मेण - शास्त्रेण, अविरुद्ध: काम: - स्वदारेषु पुत्रोत्पत्तिमात्रोपयोगीत्यर्थ:। अहं, अस्मि ॥ ११ ॥

किं च–

ये चैव सात्त्विका भावा: राजसास्तामसाश्च ये।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ये भावा: पदार्था: सात्विका:- सत्वगुणनिर्वृत्ता: शमादयश्चैव, किं च ये भावा: राजसा: रजोगुणनिर्वृत्ता: हर्षदर्पादयश्च, तामसा:- तमोगुणनिर्वृत्ता: शोकमोहादयश्च प्राणिनां स्वकर्मवशाज्जायन्ते, तान् भावान्, मत्त एव जाता इति विद्धि, मदीयप्रकृतिकार्यत्वादिति भाव: तेषु भावेषु। ते - भावास्तु, मयि, स्थिता:, मद्वशा इत्यर्थ: ॥ १२ ॥

एवमखिलकारणं त्वां लोका: किमर्थं न जानन्तीत्याशङ्कायामाह–

त्रिभिर्गुणमयैर्भावैरेभि: सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्य: परमव्ययम् ॥ १३ ॥

त्रिभि: त्रिविधै:, गुणमयै: सत्वादिविकारै:, एभि: भावै: शमदमादिभि: पदार्थै: मोहितं - अविवेकतां आपादितं सर्वमिदं जगत्। एभ्य: भावेभ्य: परं व्यतिरिक्तं विलक्षणं अव्ययं - व्ययरहितम् - जन्मादिसर्वभावविकारवर्जितं इत्यर्थ: । मां नाभिजानाति ॥ १३ ॥

एतां मायां केनोपायेन अतिक्रामतीत्याह -

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४ ॥

हि - यस्मात् दीव्यति - प्रकाशते इति। देवो विष्णु: अहं तस्य इयं दैवी अलौकिकी अत्यद्भुतेत्यर्थ:। गुणमयी - त्रिगुणात्मिका एषा - यथोक्ता मम माया दुरत्यया - दु:खेन अत्यय:- अतिक्रमो यस्या: अतिक्रान्तुं

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अशक्येत्यर्थः। अतः ये सर्वधर्मान्परित्यज्य मामेव प्रपद्यन्ते ते एतां मायां तरन्ति। अतिक्रामन्ति। संसारबन्धनात्मुच्यन्त इत्यर्थः ॥ १४ ॥

त्वां प्रपन्नाः एतां मायां तरन्ति यदि तर्हि कस्मात् सर्वे त्वामेव न प्रपद्यन्त इत्यत्राह -

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृत ज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥

दुष्कृतिनः पापकारिणः मायापहृतज्ञानाः संमुषितज्ञानाः आसुरं असुरस्यायं आसुरः तं भावं स्वभावं हिंसानृशंसादिलक्षणमाश्रिताः मूढाः विवेकरहिताः नराधमाः-नरेषु निकृष्टाः मां परमेशं न प्रपद्यन्ते - न भजन्ते ॥ १५ ॥

अभजमानान् एवं निराकृत्य भजमानान् तारतम्येन स्तौति ।

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभः ॥ १६ ॥

हे भरतर्षभ - हे अर्जुन ! आर्तः आपन्नः चोरव्याघ्ररोगाद्यभिभूतः इति यावत् । जिज्ञासुः - भगवन्तं - ज्ञातुमिच्छुः । अर्थार्थि धनकामः ज्ञानी तत्त्वविच्च इति - चतुर्विधाः चतुष्प्रकाराः सुकृतिनः पुण्यकर्माणः जनाः मां भजन्ते सेवन्ते ॥ १६ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इयत्तां प्रदर्शयति -

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ १७॥

तेषां - आर्तादीनां चतुर्णां मध्ये निरहंकारत्वात् नित्ययुक्तः, अन्य-दैवतभजनानुपयोगात् एकभक्तिश्च ज्ञानी विशिष्यते । विशेषं आधिक्यं आपद्यते । हि यस्मात् ज्ञानिनः अहं अत्यर्थं प्रियः ज्ञानिनः आत्मत्वात् वासुदेवोऽहं प्रियो भवामीत्यर्थः। स च ज्ञानी मम - वासुदेवस्य आत्मत्वात् अतिप्रियः ॥ १७ ॥

ननु आर्तादीनां चतुर्णां मध्ये ज्ञानिन एव उत्कर्षे कृते तदन्येषु त्रिषु अपकर्षो भवतीत्यत्राह -

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ १८ ॥

यद्यपि सर्वे एते - आर्ताद्याः त्रयः उदाराः उत्कृष्टा एव मम प्रिया एव। ज्ञानी तु आत्मैव अत्यर्थं प्रियो भवति इत्येव मे - मम - मतं निश्चयः। हि - यस्मात् सः ज्ञानी युक्तात्मा अहमेव वासुदेवः नान्योऽस्ति इत्येवं समाहितचित्तः सन् मामेव अनुत्तमां - श्रेष्ठगतिम् - आस्थितः गन्तुं प्रवृत्तः इत्याशयः ॥ १८ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ज्ञानी पुनरपि स्तूयते—

बहूनां जन्मनां अन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ॥ १९ ॥

यः बहूनां जन्मनां - अनेकेषां सुकृतजन्मनां अन्ते। **ज्ञानवान्** - प्राप्तपरिपाकज्ञानवान् सन्, **सर्वं** - विश्वं, **वासुदेवः अहं**, इति, **मां** प्रत्यगात्मानं, **प्रपद्यते**, **स महात्मा**, **सुदुर्लभः** स्वस्य साम्याधिक्याभावात् सुतरां असुलभः ॥ १९ ॥

वासुदेवस्सर्वमित्यनुपलब्धौ कारणमाह—

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥

स्वया आत्मीयया, **प्रकृत्या** - स्वभावेन, जन्मान्तरार्जित-संस्कारविशेषेणेति यावत् । **नियताः**- नियमिताः, जनाः, **तैस्तैः कामैः**- पुत्रपशुस्वर्गादिविषयैः, **हृतज्ञानाः** अपहृतविवेकज्ञानास्सन्तः, देवताराधनाय यो नियमः, **तं तं नियमं**, **आस्थाय** अधिष्ठाय, वासुदेवात् **अन्यदेवताः**, भजन्ते ॥ २० ॥.

तेषां कामिनां मध्ये—

यो यो यां यां तनुं भक्तश्श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

योय: - कामी भक्तस्सन्, यां यां, तनुं - देवतामूर्तिं, श्रद्धया, अर्चितुं - पूजयितुं, इच्छति, तस्य तस्य कामात्मन:, अहं, तां श्रद्धामेव अचलां - स्थिरां, विदधामि ॥ २१ ॥

अथ च–

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च तत: कामान्मयैव विहितान् हितान् ॥ २२ ॥

स भक्त: तया - मद्विहितया, श्रद्धया, युक्तस्सन्, तस्य - देवताविग्रहस्य, आराधनं - पूजां ईहते - चेष्टते। करोतीति यावत्। मयैव अन्तर्यामिणा, फलविभागज्ञेन विहितान् - निर्मितान् हितान् इष्टान्, कामान् - ईप्सितान्, तत: - आराधितदेवताविग्रहात्, लभते ॥ २२ ॥

कामैरन्यदेवतायाजिनां फलं तुच्छमित्याह–

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥

ये, देवान् यजन्त इति देवयज:, (ते) देवान् यान्ति। अल्पमेधसां - अल्पप्रज्ञानां तेषां, तत्फलं तु अन्तवत् - विनाशि, भवति । तस्मात्, अतुच्छफलापेक्षया, मद्भक्ता:, मां, यान्ति। अपि: सम्भावनायाम् ॥ २३ ॥

तर्हि किं निमित्तं त्वामेव न प्रपद्यन्त इत्यत्राह –

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धय: ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अव्ययं - व्ययरहितं, अनुत्तमं - निरतिशयं, परम् उत्कृष्टं, मम , भावं स्वरूपं, अजानन्तः अबुद्धयः - मूढाः, अव्यक्तं - अप्रकाशं, मां इदानीं, व्यक्तिं, प्रकाशं आपन्नं - गतं, मन्यन्ते - अवबुध्यन्ते। सर्वकर्मभिः आराध्यः सर्वेश्वरो वाङ्मनसोरपरिच्छेद्यस्वभावोऽप्यहं परमकारुण्यादाश्रितवात्सल्याद-जहत्स्वभाव एव वसुदेवसूनुरभवमिति मम परं भावमजानन्तः प्राक्तनकर्मव-शादभिव्यक्त प्राकृतराजसुतसमानं मां मन्यमानाः नाश्रयन्त इति भावः ॥ २४ ॥

कुत एवं न प्रकाश्यमानोऽसीत्यत्राह—

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥

अहं सर्वस्य - लोकस्य, प्रकाशः, प्रकटो, न भवामि, केषाञ्चिद्भक्तानामेव प्रकाशोऽहमित्यभिप्रायः योगमायासमावृतः योगः त्रैगुण्यस्य युक्तिः घटनं सैव माया, तया समावृतः - छन्नस्सन्, मूढः केवलमज्ञः, अयं लोकः जनः, मां, अजं, जन्मरहितं, अव्ययं नाशरहितं च, नाभिजानाति - न वेत्ति ॥ २५ ॥

यत एवमतः—

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥

हे अर्जुन, अहं, समतीतानि - समतिक्रान्तानि, वर्तमानानि च, भविष्याणि, च भूतानि - प्राणिनः, वेद - जानामि, कश्चन - कालत्रये

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

सर्वभूतेषु मद्भक्तमेकं विहाय कश्चित्, मां तु, न वेद - न जानाति मत्तत्त्ववेदनाभावात्, एवं मां न जानन्तीति भावः ॥ २६ ॥

ननु कीदृशेन तत्ववेदननिरोधेन प्रतिबद्धाः सन्तो लाके त्वां न जानन्ति, ते कीदृशाः इत्यत्राह–

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परन्तप ॥ २७ ॥

हे भारत ! हे परन्तप ! सर्गे - उत्पत्तिकाले, इच्छाद्वेषसमुत्थेन, इष्टार्थे इच्छा, अनिष्टार्थे द्वेषः, ताभ्यां समुत्थेन - जातेन, द्वन्द्वमोहेन - शीतोष्णसुखदुःखादिद्वन्द्वनिमित्तविवेकभ्रंशेन, सर्वभूतानि संमोहं - संमूढतां, यान्ति। अतो मां न जानन्तीति भावः ॥ २७ ॥

एवं सति के त्वां भजन्त इत्याकाङ्क्षायामाह–

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥

सत्वशुद्धिकारणं पुण्यं कर्म येषां तेषां पुण्यकर्मणां, येषां, जनानां, पापं तु, अन्तगतं - नाशं प्राप्तं समाप्तमित्यर्थः। ते जनाः द्वन्द्वमोहनिर्मुक्ताः सन्तः, दृढव्रताः दृढं व्रतं येषां ते 'आत्मतत्त्वमिदमेव नान्यत्' इति निश्चितविज्ञाना इत्यर्थः । मां परमात्मानं, भजन्ते ॥ २८ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्वां किमर्थं भजन्त इत्यत्राह—

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदु: कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥

ये, जरामरणमोक्षाय, मां, आश्रित्य, यतन्ति - प्रयतन्ते, ते, जना:, तत् - परं ब्रह्म च, कृत्स्नं - समस्तं, अध्यात्मं प्रत्यगात्मविषयं वस्तु च, अखिलं कर्म च, विदु: - जानन्ति ॥ २९ ॥

एवंविधानां योगभ्रंशोऽपि नास्तीत्याह—

साधिभूताधिदैवं मां साधियज्ञं च ये विदु: ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतस: ॥ ३० ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विज्ञानयोगो नाम सप्तमोऽध्याय: ॥

ये, साधिभूताधिदैवं, अधिभूतं - वक्ष्यमाणं, तथा अधिदैवं च ताभ्यां, सहितं, साधियज्ञं, अधियज्ञो वक्ष्यमाण:, तेन सह वर्तत इति साधियज्ञ:। तं च मां, विदु:, ते युक्तचेतस: समाहितचित्ता:, प्रयाणकाले - देहान्ते, च मां, विदु: ॥ ३० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीस्वामिशिष्य रामचन्द्रानन्द सरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां विज्ञानयोगो नाम सप्तमोऽध्याय: ॥

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

॥ अष्टमोऽध्याय: ॥

ते ब्रह्म तद्विदु: कृत्स्नम् इत्यादिना भगवता अर्जुनप्रश्नबीजान्युपदिष्टानि । अत: तत्प्रश्नार्थम् अर्जुन उवाच–

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥

हे पुरुषोत्तम, तद्ब्रह्म, किं - कीदृशं, अध्यात्मं किं कर्म किं अधिभूतं, किं- किमिति, प्रोक्तं - अधिदैवं, किं - किमित्युच्यते ॥ १ ॥

किञ्च–

अधियज्ञ: कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभि: ॥ २ ॥

अत्र देहे यो यज्ञो निर्वर्त्यते तस्मिन् यो अधियज्ञ: अधिष्ठाता - प्रयोजक: फलदाता च क: इत्यर्थ: । स्वरूपं पृष्ट्वा अधिष्ठानं पृच्छति । कथं केनप्रकारेण असौ अस्मिन् देहे स्थित: यज्ञमधितिष्ठति इत्यर्थ: । यज्ञग्रहणं सर्वकर्मणां उपलक्षणार्थम् । प्रयाणकाले देहान्ते नियतात्मभि: नियतचित्तै: कथं - केन प्रकारेण ज्ञयोऽसि तद् ब्रूहि इति भाव: ॥ २ ॥

एषां प्रश्नानां यथानिर्णयाय यथाक्रमं श्रीभगवानुवाच-

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्ग: कर्मसंज्ञित: ॥ ३ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

परमं - निरतिशयं, न क्षरति इति **अक्षरं ब्रह्म** 'एतस्यैव अक्षरस्य प्रशासने गार्गी सूर्याचन्द्रमसौ विधृतौ तिष्ठत (बृ.उ.३.८.९) इति श्रुते: स्वो भाव: **स्वभाव:** तस्यैव परब्रह्मण: प्रतिदेहं प्रत्यगात्मभाव: स्वभाव: इत्यर्थ:। आत्मानं देहं प्रत्यगात्मतयाऽधिकृत्य प्रवृत्तं- **अध्यात्मं** परमार्थब्रह्मावसानं वस्तु इत्युच्यते। भूतानां भावस्य उद्भवं करोतीति **भूतभावोद्भवकर:** सृष्ट्यादिक्रमेण भूतवस्तूद्भवकर: इत्यर्थ:। **विसर्ग:** देवतोद्देशेन - चरु पुरोडाशादि द्रव्यपरित्याग:। कर्मेति संज्ञित: शब्दित: **कर्मसंज्ञित:** ॥ ३ ॥

किञ्च -

अधिभूतं क्षरो भाव: पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥

हे देहभृतां वर ! प्राणिनां श्रेष्ठ ! क्षरति इति **क्षर:** विनाशी **भाव:** वस्तु **अधिभूतं** - प्राणिजातं पुरुषसूर्यान्तर्गत: हिरण्यगर्भ:। सर्वप्राणिनां अनुग्राहक कर्मसंज्ञित: । क:

स वै शरीरि प्रथम स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥

इति स्मृते: ॥ देवानां अधिपतित्वात् **अधिदैवतं** च **अहं**। **अत्र** - अस्मिन्देहे **अधियज्ञ:** सर्वयज्ञाभिमानिनी देवता अहं - 'यज्ञो वै विष्णु:' इति श्रुति: यज्ञो हि देहनिर्वर्त्यत्वेन देहसमवायि इति देहादिकरण: इति भाव: ॥ ४ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः इत्यस्य उत्तरमाह -

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेबरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥

यः अन्तः काले देहान्ते मां - परमेश्वरमेव स्मरन् - कलेबरं - शरीरं - मुक्त्वा - त्यंक्त्वा प्रयाति गच्छति स मद्भावं मत्स्वरूपवैष्णवं तत्त्वमित्यर्थः। याति । अंत्र - अस्मिन्नर्थे असंशयः संशयो नास्ति ॥ ५ ॥

अयं नियम एव मद्विषयो न भवति तर्हि किमित्यत्र आह -

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेबरम् ।
तं तमेवैति कौन्तेय सदा मद्भावभावितः ॥ ६ ॥

हे कौन्तेय ! यः अन्ते यः यं यं भावं देवताविशेषं स्मरन् - चिन्तयन् - कलेबरं - त्यजति स सः सदा - सर्वदा मद्भावभावितः सन् तस्मिन् देवतान्तरे भावः भावना अनुचिन्तनं भावितः प्राप्त एव सः तं तमेव स्मृतं भावमेव एति । प्राप्नोति नान्यम् ॥ ६ ॥

यस्मात् देहान्त्यभावना देहादिप्राप्तिकारणम्-

तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पित मनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७॥

तस्मात्कारणात् सर्वेषु मां अनुस्मर - चिन्तय यथाशास्त्रं। युध्य युध्यस्व, परस्मैपदं आर्षम् । स त्वं मयि अर्पितमनोबुद्धिः येन स त्वं यथा

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्मृतम् मामेव एष्यसि - आगमिष्यसि। अस्मिन्नर्थे असंशयः संशयो नास्ति ॥ ७ ॥

उपासनाप्रकारं वक्तुं उपक्रमते-

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८ ॥

हे पार्थ ! अभ्यासयोगयुक्तेन मयि चित्तसमर्पणविषयभूते तुल्यप्रत्ययावृत्ति लक्षणविलक्षण प्रत्ययानन्तरितः अभ्यासः स च अभ्यासयोगः। तेन युक्तेन अभ्यासयोगयुक्तेन नान्यत्र गन्तुं शीलं अस्य अस्तीति नान्यगामिना। तेन चेतसा चित्तेन, दिव्यं - दिवि सूर्यमण्डले भवं परं निरतिशयं पुरुषं - अनुचिन्तयन् - स्मरन् - शास्त्राचार्योपदेश मनुचिन्तयन्, इत्यर्थः। तमेव याति ॥ ८ ॥

किं विशिष्टं पुरुषं याति इत्यत्राह द्वाभ्याम्-

कविं पुराणमनुशासितारमणोरणियांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९ ॥

यः कविं - क्रान्तदर्शिनं सर्वज्ञं पुराणं - चिरन्तनं अनुशासितारं सर्वस्य जगतः प्रशासितारं अणोः सूक्ष्मादपि अणीयांसं - सूक्ष्मतरं। सर्वस्य कर्मफलजातस्य धातारं - विधातारं - विचित्रतया प्राणिभ्यो विभक्तारं इति यावत्। चिन्तयितुं अशक्यम् अचिन्त्यम् तादृक्स्वरूपं यस्य तं 'यतो वाचो'

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

(तै.उ.२.४) इत्यादि श्रुतेः। आदित्यस्यैव नित्यचैतन्यप्रकाशः वर्णः यस्य तं आदित्यवर्णं तमसः अज्ञानलक्षणात् मोहाधिकात्, परस्तात् परतः स्थितम् पुरुषं अनुस्मरेत् - चिन्तयेत् - सः तमेव उपैति इत्युत्तरेण संबन्धः ॥ ९ ॥

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्स तं परं पुरुषमुपैति दिव्यम् ॥१०॥

प्रयाणकाले - देहावसानसमये। अचलेन मनसा च भक्त्या भजनेन यः अचलेन च योगस्य बलं समाधिः संस्कारजनितचित्तस्थैर्यलक्षणम् । योगबलं तेन चैव युक्तः। भ्रुवोर्मध्ये प्राणं सम्यक् आवेश्य स्थापयित्वा। पूर्वं हृत्पुण्डरीके चित्तं वशीकृत्य ततः ऊर्ध्वगामिन्या नाड्या भूतिजक्रमेण भ्रूमध्ये प्राणं स्थापयेत् इति तात्पर्यम् । तं पुरुषं यः अनुस्मरेत् सः तं दिव्यं प्रद्योतनात्मकं परं पुरुषं उपैति ॥ १० ॥

पुनरपि वक्ष्यमाणेन उपायेन प्रतिपत्तुं ईप्सितस्य वेदवेद्यस्य ब्रह्मणः अभिधानं करोति -

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

वेदविदः वेदार्थविदः यत् न क्षरतीत्यक्षरम् अच्युतस्वरूपं 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति' (बृ.उ.३.८.८.) इति श्रुतेः। वदन्ति वीतः रागः येभ्यस्ते वीतरागाः यतयः यतनशीलाः सन्न्यासिनः यदक्षरं विशन्ति

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ज्ञातुं इति शेषः। इच्छन्तः गुरुकुले ब्रह्मचर्यं चरन्ति। तदक्षराख्यं प्रपद्यत अनेन इति पदम् प्राप्यं संग्रहेण संक्षेपेण ते तुभ्यं प्रवक्ष्ये कथयिष्यामि ॥ ११ ॥

प्रतिज्ञातार्थं दर्शयति द्वाभ्याम् –

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ १२ ॥

सर्वद्वाराणि – नवद्वाराणि, संयम्य – नियम्य, हृदि – हृदयपुण्डरीके, मनः निरुध्य च – निष्प्रचारमापाद्य इति यावत्। तत्र वशीकृतेन मनसा हृदयादूर्ध्वगामिन्या नाड्या ऊर्ध्वमारुह्य, मूर्ध्नि – शिरः प्रान्ते भ्रूमध्ये, आत्मनः प्राणं, आधाय आस्थाप्य, योगधारणां योगस्य धारणां धैर्यं, आस्थितः, आश्रितः सन्, परमां, गतिं याति इत्युत्तरेणान्वयः ॥ १२ ॥

अथ च–

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३ ॥

ब्रह्म – ब्रह्मवाचकं ओमिति, एकाक्षरं – मुख्यवर्णं, व्याहरन् – उच्चरन्, ततः तद्वाच्यं, मां अनुस्मरन् – अनुचिन्तयन्, देहं – त्यजन् यः, प्रयाति सः, परमां [56] अर्चिरादिमार्गेण प्रकृष्टां, गतिं, याति ॥ १३ ॥

56. अत्र परमां इति गतिविशेषणं क्रममुक्तिविवक्षया द्रष्टव्यम्।

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भगवत्प्राप्तेः सुकरोपायमाह—

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥

हे पार्थ, यः न अन्यविषयं चेतः यस्य सः, अयम् अनन्यचेताः योगी, मां - परमेश्वरं, सततं - निरन्तरं, नित्यशः, प्रतिदिनं, यावज्जीवमिति भावः। स्मरति - चिन्तयति, नित्ययुक्तस्य - सदा समाहितचित्तस्य, तस्य योगिनः, अहं, सुलभः सुखेन लभ्यः अस्मि, नान्यस्य ॥ १४ ॥

तव सौलभ्येन किं स्यादिति अत्राह—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

महात्मनाः- महाबुद्धयः, ते मां उपेत्य - मद्भावं आपद्य परमां सिद्धिं- मोक्षाख्यां, सम्यक्सिद्धिं, गताः सन्तः, दुःखालयं, दुःखानां - आध्यात्मिकादीनां, आलयं - आश्रयं. अशाश्वतं - अस्थिरं, पुनर्जन्म - पुनरुत्पत्तिं, न प्राप्नुवन्ति ॥ १५ ॥

ते के न पुनरावर्तन्त इत्याशङ्कायामाह—

आब्रह्मभुवनाल्लोकाः पुनरावृत्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे अर्जुन ! हे कौन्तेय ! भवन्त्यस्मिन् भूतानीति भुवनं - वासस्थानं, ब्रह्मणो भुवनं - ब्रह्मलोक:, तस्मात् आब्रह्मभुवनात् ब्रह्म भुवनेन सह लोकास्सर्वे पुनरावृत्तिन: पुनरावर्तनस्वभावा:। मां उपेत्य तु, पुनर्जन्म, न विद्यते ॥ १६ ॥

ब्रह्मलोकसहिता लोका: कस्मात्पुनरावृत्तिन इत्याशङ्क्य कालपरिच्छिन्न-त्वात् इत्याह–

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदु: ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जना: ॥ १७ ॥

ये जना:, अहश्च रात्रिश्च अहोरात्रं तद्विदन्तीति अहोरात्रविद: कालसंख्याविद: ते जना:, ब्रह्मण: -चतुर्मुखस्य, प्रजापते:, यद् अह: सहस्रयुगपर्यन्तं, सहस्रयुगानि पर्यन्तोऽवसानं यस्य तत् रात्रिं च युगसहस्रान्तां, युगानां, सहस्रमन्तो यस्यास्ताम्। अह: परिमाणमेव रात्रावपि भवति इति भाव: ॥ १७ ॥

यत एवं कालपरिच्छिन्नास्ते अत: पुनरावृत्तिनो लोका: प्रजापते: अह्नि यद्भवति रात्रौ च तदुच्यते इत्याह -

अव्यक्ताद्व्यक्तय: सर्वा प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥

अहरागमे - अह: आगमे। ब्रह्मण: प्रबोधकाले इति यावत् । अव्यक्तात् प्रजापते:स्वापावस्था अव्यक्तं तस्मात् व्यक्तय: शरीरिण:

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

स्थावरजङ्गमलक्षणः सर्वाः प्रजाः इत्यर्थः । प्रभवन्ति - प्रजायन्ते । रात्र्यागमे - ब्रह्मणः स्वापकाले व्यक्तयः तत्र - तस्मिन् अव्यक्त-संज्ञक एव प्रलीयन्ते - लीनं गच्छन्ति ॥ १८ ॥

अतः संसारवैराग्यप्रदर्शनार्थं इदमाह -

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

हे पार्थ ! यः स्थावरजङ्गमलक्षणः पूर्वस्मिन् कल्पे आसीत् स एवायं भूतग्रामः - प्राणिसमुदायः । अवशः अस्वतन्त्रः सन् अहरागमे भूत्वा रात्र्यागमे प्रलीयते । मुहुर्मुहुः अहरागमे प्रभवति । रात्र्यागमे प्रलीयते च ॥ १९ ॥

एवं विनाशिस्वरूपं निरूप्य अथ नाशस्वरूपं निरूपयति -

परस्तस्मात्तु भावोऽन्यो व्यक्तोऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥

यः भावः परमात्मस्वरूपं तस्मात् पूर्वोक्तात् अव्यक्तात् - भूतग्राम-बीजभूतात् अविद्यालक्षणात्तु परः उत्कृष्टः अन्यः व्यतिरिक्तः अव्यक्तः अतीन्द्रियः सनातनः चिरन्तनः । स भावः सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु शरीरेषु नश्यत्सु सत्सु न विनश्यति ॥ २० ॥

किञ्च -

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यो भावः अव्यक्तः - अतीन्द्रियः अक्षरः - नाशरहितः इत्यर्थः। तं भावं - परमां प्रकृष्टां गतिम् प्राप्यस्थानम् मुहुर्वदन्ति। तथा च श्रुतिरपि - 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' (क.उ.३.२२) यं भावं प्राप्य - गत्वा न निवर्तन्ते संसाराय न प्रवर्तन्त इत्यर्थः। तत् धाम - स्थानं - मम - परमं - परमस्थानम् - प्रकृष्टं मत्स्वरूपमिति भावः। यमिति विशेष्ये तदिति विशेषणम् आर्षम् ॥ २१ ॥

तल्लुब्ध्युपायमाह-

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥

हे पार्थ ! भूतानि प्राणिनः यस्य पुरुषस्य अन्तःस्थानि मध्यस्थानि येन पुरुषेण सर्वमिदं जगत् ततम् व्याप्तम् स परः उत्कृष्टः पुरुषः अनन्यया अव्यभिचारिण्या भक्त्या भजन्ति- गच्छन्ति आत्मानं अनया इति भक्तिः ज्ञानं "भज गताविति" तया लभ्यः प्राप्तव्यः ॥ २२ ॥

योगिनां आवृत्तिकरं निवृत्तिकरं च कालं दर्शयति-

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

हे भरतर्षभ ! यत्र - यस्मिन् काले तु प्रयाताः मृताः योगिनः कर्मयोगिनः आवृत्तिं पुनर्जन्म यान्ति। यत्र काले प्रयाताः योगिनः योगाभ्यासिनः अनावृत्तिं पुनर्जन्मराहित्यं यान्ति तं कालं वक्ष्यामि ॥ २३ ॥

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्र अर्चिरादिमार्गलक्षणम् आह-

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

अग्निः कालाभिमानिनी देवता । तथा ज्योतिरपि कालाभिमानी देवतैव । यद्वा अग्निज्योतिषी यथाश्रुते एव देवते **अहः** अहरभिमानिनी देवता । **शुक्लः** - शुक्लपक्षाभिमानिनी देवताः **षण्मासाः उत्तरायणम्** इति अत्रापि देवतैव **तत्र** - तस्मिन् मार्गे **प्रयाताः** गताः **ब्रह्मविदः** ब्रह्मोपासका **जनाः** क्रमेण इति शेषः **ब्रह्म गच्छन्ति** प्राप्नुवन्ति ॥ २४ ॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥

धूमः - धूमाभिमानिनी देवता । **रात्रिः** रात्र्यभिमानिनी देवता । **तथा कृष्णः** कृष्णपक्षाभिमानिनी देवता । **षण्मासाः दक्षिणायनम्** इति पूर्ववत् देवतैव । तस्मिन् मार्गे प्रयातः इति शेषः । **योगी** - कर्मयोगी, **चान्द्रमसं** - चन्द्रमस भवं **ज्योतिः** फलम् - इष्टाधिकारी **प्राप्य** - लब्ध्वा भुक्त्वेत्यर्थः । पुण्यसंक्षयात् **निवर्तते** - पुनरावर्तते ॥ २५ ॥

उक्तार्थं संगृह्य अनुवदति -

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥ २६ ॥

शुक्लकृष्णे - ज्ञानप्रकाशत्वात् शुक्लं च । तदभावात् कृष्णा च **एते** - **गती** - मार्गौ **शाश्वते** - संसारस्य अनादित्वात् नित्ये **जगतः मते** - अभिप्रेते ।

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्र एकया शुक्लया अनावृत्तिं - अपुनर्भवं याति - अन्यया - धूमाख्यया - इतरया पुन: - भूय: आवर्तते संसरति इत्यर्थ: ॥ २६ ॥

उक्तमार्गद्वयस्य फलं दर्शयन् उपसंहरति -

नैते सृती पार्थ, जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७॥

हे अर्जुन ! - हे पार्थ ! यथोक्तौ श्रुतिमार्गौ जानन् एका श्रुति: संसाराय अन्या मोक्षाय इति विदन् कश्चन योगी न मुह्यति मोहं न प्राप्नोति । तस्मात्कारणात् सर्वेषु कालेषु योगयुक्त: - समाहित: भव ॥ २७॥

तद्योगमहिमानं आह -

वेदेषु यज्ञेषु तप:सु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥ २८ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे तारकब्रह्मयोगो नाम अष्टमोऽध्याय: ॥

वेदेषु - सम्यगतीतेषु, यज्ञेषु षाड्गुण्येन अनुष्ठितेषु तप:सु सुतप्तेषु, दानेषु - सम्यक्दत्तेषु - यत् पुण्यफलं - प्रदिष्ठम् - निर्दिष्टम्। तत्सर्वं फलं अत्येति - अधिगच्छति - योगी। इदं सप्तप्रश्ननिर्णयद्वारं उक्तमर्थं विदित्वा सम्यग् ज्ञात्वा आदौ भवं - आद्यम् कारणं ब्रह्मेत्यर्थ:। परं उत्कृष्टस्थानं उपैति ॥ २८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीस्वामिशिष्य
रामानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां
तारकब्रह्मयोगो नाम अष्टमोऽध्याय: ॥

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ नवमोऽध्याय:॥

अष्टमे अनादिद्वारेण सगुणो धारणायोगयुक्त: तस्य च फलं अर्चिरादिमार्गेण आवृत्तिरूपं कालान्तरे ब्रह्मप्राप्तिलक्षणं निर्दिष्ठम्। तत्र अनेनैव प्रकारेण मोक्षप्राप्ति: फलमधिगम्यते नान्यथा इत्याशङ्कायां श्रीभगवानुवाच -

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

यत् ज्ञानं ज्ञात्वा अशुभात्संसारबन्धनात् मोक्ष्यसे मुक्तो भविष्यसि तद्गुह्यतमं अतिगोप्यं - ज्ञानसहितं अनुभवज्ञानयुक्तं - इदं तु ज्ञानं - अनसूयवे असूयारहिताय । अयं पुन: पुन: स्वमाहात्म्यमेव कथयति इति दोषदृष्टिरहिताय ते- तुभ्यं - वक्ष्यामि - कथयिष्यामि ॥ १ ॥

वक्ष्यमाणं ज्ञानं स्तौति-

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

उत्तमम् - पवित्राणाम् - उत्कृष्टं पवित्रं पावनं इदं वक्ष्यमाणं ब्रह्मज्ञानम् राजविद्या - विद्यानां राजा श्रेष्ठम्, राजगुह्यं - गुह्यानां गोप्यमानानां राजा - श्रेष्ठ: । राजदन्तादिषु परनिपात: । किञ्च प्रत्यक्षावगमं प्रत्यक्षेण सुखादेरिव अवगमो यस्य तत् । धर्म्यं - धर्मादनपेतम् कर्तुं - अभ्यासं कर्तुं सुसुखम् सुष्ठु सुखम् - अव्ययम् न विद्यते व्ययो यस्य फलस्य नाशो यस्य तत् ॥ २ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नन्वेवं अतिसुकरे राजयोगे सत्यपि सर्वे कथं संसरन्ति इत्याशङ्क्याह -

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥

हे परन्तप ! अस्य वक्ष्यमाणस्य धर्मस्य आत्मज्ञानस्य, कर्मणि षष्ठी, अश्रद्दधाना - अविश्वसन्तः नास्तिकाः इत्यर्थः । पुरुषा : मां परमेश्वरं अप्राप्य मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारः मृत्युसंसारः नरकतिर्यगादिषु प्राप्तिः इति यावत् । तस्य वर्त्मनि मार्गे निवर्तन्ते - ते नितरां वर्तन्ते ॥ ३ ॥

स्तुत्या अर्जुनं अभिमुखीकृत्य आह -

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥

अव्यक्तमूर्तिना - अव्यक्ता - करणागोचरा मूर्तिः स्वरूपं यस्य तेन मया - परमात्मना सर्वमिदं जगत् ततम् - व्याप्तम् । सर्वभूतानि ब्रह्मादीनि मत्स्थानि - मयि - अव्यक्तमूर्तौ तिष्ठन्ति इति मत्स्थानि । सूत्रे मणिगणवत् प्रोतानि इत्यर्थः । अत एव अहं तेषु सर्वभूतेषु नावस्थितः । आधेयत्वेन न स्थितः किन्त्वाधार एव ॥ ४ ॥

एतदेव विवृणोति -

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

SJ-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भूतानि - ब्रह्मादिस्थावरान्तानि मत्स्थानि, न च मम असङ्गत्वात् - मयि न तिष्ठन्ति। तर्हि व्यापकत्वं आश्रयत्वं च पूर्वोक्तं विरुद्धम् इत्याशङ्क्य आह - पश्येति। ऐश्वरं - ईश्वरसंबन्धिनं मे मम योगं युक्तिं अघटित-घटनाचातुर्यं इति यावत्। पश्य - मदीययोगमायावैभवस्य अप्रतर्क्यत्वात् विरुद्धं किञ्चिदपि नास्ति इत्यर्थः। अन्यथा आश्चर्यं पश्य इत्याह - ममात्मा परं स्वरूपं भूतानि बिभर्ति धारयति इति भूतभृत् - भूतभर्ता - भूतानि भावयति - वर्धयति इति भूतभावनः एवमपि न भूतभृथः भूतैः धार्यमाणो न भवति। यथा जीवः देहं बिभ्रत् पालयंश्च अहंकारेण तत्संश्लिष्ठः तिष्ठति। देवमहं भूतानि धारयन् पालयन्नपि निरहंकारत्वात् न तेषु तिष्ठामि इत्यभिप्रायः ॥ ५ ॥

यथोक्तेन श्लोकद्वयेनोक्तमसङ्गत्वं दृष्टान्तेन उपपादयन्नाह—

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥ ६॥

यथा, सर्वत्र गच्छतीति सर्वगः, महान् - परिमाणतोऽधिकतरः, वायुः, नित्यं, आकाशस्थितः, आकाशे निर्लिप्तत्वेन तिष्ठतीत्याकाशस्थितः, तथा, आकाशवत् सर्वाणि भूतानि, मत्स्थानि, मयि सर्वगते असंश्लेषेण तिष्ठन्तीति स्थितानि इति उपधारय - जानीहि ॥ ६ ॥

एवमसङ्गेऽप्यात्मनि योगमायायाः स्थितिरुक्ता तत उत्पत्तिप्रलयावप्याह—

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे कौन्तेय - कुन्तीकुमार, कल्पक्षये - लयकाले, सर्वभूतानि - अखिलप्राणिनः, मामिकां - मदीयां, प्रकृतिं - त्रिगुणात्मिकां मायां, यान्ति - (तत्र) लीनं गच्छन्तीत्यर्थः । अहं, कल्पादौ - सृष्टिकाले, तानि - सर्वभूतानि, पुनः, विसृजामि - उत्पादयामि ॥ ७ ॥

तर्हि निस्सङ्गेन त्वया कथं सृष्टिः इत्यत्राह—

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नं अवशं प्रकृतेर्वशात् ॥ ८ ॥

स्वां, प्रकृतिं - मायां, अवष्टभ्य - अधिष्ठाय, प्रकृतेः स्वभावस्य, वशात्, अवशं - अस्वतन्त्रं, अविद्यादिदोषैः परवशीकृतं, कृत्स्नं - समस्तं, इमं, भूतग्रामं, भूतसमुदायं, पुनः पुनः, विसृजामि विशेषेण सृजामि ॥ ८ ॥

एवं तर्हि सृष्ट्यादीनि कर्माणि नैपुण्याद्यापादनेन परमेश्वरं बध्नन्ति इत्याशङ्क्याह –

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

हे धनञ्जय, तानि - सृष्ट्यादीनि, कर्माणि, तेषु कर्मसु, असक्तं - 'अहं करोमि' इत्यभिमानवर्जितं, उदासीनवत् - उपेक्षक इव, आसीनं -स्थितं, मां, न निबध्नन्ति। अतोऽन्यस्यापि कर्तृत्वाभिमानाभावः फलसङ्गाभावश्च बन्धकारणं न भवति ॥ अन्यथा कर्मभिः मूढः कोशकारकीटवत् बध्यत इत्यभिप्रायः ॥ ९ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ननु 'भूतग्रामं विसृजामि' इति 'उदासीनवदासीनम्' इति च विरुद्धमुच्यत इत्याशङ्कायामाह—

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥

हे कौन्तेय, अध्यक्षेण - अधिष्ठात्रा, मया, निमित्तभूतेन सता, प्रकृतिः - त्रिगुणात्मिका माया, सचराचरं, जगत्, सूयते - उत्पादयति । अनेन - अध्यक्षत्वेन, हेतुना - निमित्तेन, जगत् विपरिवर्तते विशेषेण परितो वर्तते । अतोऽयस्कान्तवत् सन्निधिमात्रेणाधिष्ठातृत्वांत् स्वस्य कर्तृत्वमुदासीनत्वं च अविरुद्धमिति भावः ॥ १० ॥

ननु एवम्भूतं भवन्तम् इतरे किमर्थं न भजन्त इत्यत्राह द्वाभ्याम्—

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११ ॥

भूतानां, महान्तं, ईश्वरं - भूतमहेश्वरं अत एव, परं उत्कृष्टं, मम भावं- परमार्थतत्वं, अजानन्तः, मूढाः - अविवेकिनः, मां मानुषीं - मनुष्यसम्बन्धिनीं, तनुं - देहं, आश्रितं, मनुष्यदेहेन व्यवहरन्तं, इति अवजानन्ति - अवज्ञां कुर्वन्ति ॥ ११ ॥

किञ्च-

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मोघा - वृथाभूता आशा - इच्छा येषां ते मोघाशाः । मोघानि - व्यर्थानि, कर्माणि - अग्निहोत्रादीनि येषां ते मोघकर्माणः मोघं निष्फलं, ज्ञानं येषां ते मोघज्ञानाः विचेतसः - विगतविवेकाः मूढाः । अत्र हेतुः राक्षसीं, रक्षसामियं राक्षसी, तां च हिंसादिप्रचुरां प्रकृतिं, स्वभावं आसुरीं, असुराणामियं आसुरी तां, कामदर्पादिबहुलां, अत एव मोहिनीं मोहिकां प्रकृतिं च श्रिताः सन्तो मामवजानन्तीति पूर्वेण सम्बन्धः ॥ १२ ॥

तर्हि भगवच्छक्तिलक्षणे श्रद्दधाना मोक्षमार्गे प्रवृत्ताः के इत्यत्राह –

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥

हे पार्थ, महात्मानस्तु, महान् - अक्षुद्रः कामादिवर्जितः आत्मा - मनो येषां ते दैवीं, देवानामियं दैवी - शमदमादिलक्षणा तां, प्रकृतिं - स्वभावं, आश्रितास्सन्तः, भूतादिं - सर्वेषां भूतानां, आदिं - कारणं, अव्ययं नाशरहितं, मां - परमेश्वरं, ज्ञात्वा अनन्यमनसः, अनन्यचित्तास्सन्तः, भजन्ते- सेवन्ते ॥ १३ ॥

तद्भजनप्रकारानाह–

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥

यतन्तः यत्नं कुर्वन्तः जितेन्द्रिया इत्यर्थः । दृढव्रताः स्थिरनियमाः, केचिद्भक्ताः नित्ययुक्तास्सन्तः, मां - भगवन्तं, सततं, कीर्तयन्तश्च,

SJ-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

उपासते - सेवन्ते, केचिद्भक्त्या, मां, नमस्यन्तः नमस्कुर्वन्तस्सन्तः, उपासते। १४ ॥

किं च -

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

अन्ये, ज्ञानयज्ञेन, ज्ञानमेव यज्ञस्तेन, मां - ईश्वरं यजन्तः- पूजयन्तः, उपासते, केचित्, एकत्वेन एकभावेन, एकमेव परं ब्रह्मेति परमार्थभावेनेति यावत् । उपासते केचित् । पृथक्त्वेन पृथग्भावेन, सूर्यचन्द्रादिभावेन स एव भगवानवस्थित इत्युपासते। केचिद्बहुधा - बहुप्रकारेण, विश्वतोमुखं सर्वतोमुखं, विश्वरूपमिति यावत्। उपासते ॥ १५ ॥

तथा हि विश्वशरीरोऽहमेवावस्थित इत्याह—

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥

क्रतुः - श्रौतकर्मभेदः ज्योतिष्टोमादिः अहं। यज्ञः - स्मार्तकर्म, अहं स्वधा - पितृभ्यो दीयमानमन्नम् यद्वा (सर्वप्राणि) साधारणमन्नम् । अहं औषधं - सर्वप्राणिभिः भक्षणीयम् । यद्वा व्याध्युपशमार्थं भेषजम् अहं। मन्त्रः देवेभ्यः आज्यं घृतमहं. पितृभ्यश्च हविर्दानमन्त्रः अहं, आज्यम् - घृतम् अहं, हविरित्यर्थः अहमेव अग्निः हुतवहः अहं हुतं - हवनकर्म च अहम् ॥ १६ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पिताहमस्य जगतो माता धाता पितामहः।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥ १७ ॥

अस्य - स्थावरजङ्गमात्मकस्य जगतः पिताऽहं, माता - जननी अहं धाता - प्राणिभ्यः कर्मफलस्य विधाता अहं, पितामहः पितुः पिता पितामहः। अहं वेद्यं-ज्ञेयं वस्तु, अहं पवित्रं पावनं वस्तु अहं - ओंकारः अहं ऋक् - ऋग्वेदः अहं, यजुश्च - यजुर्वेदः अहं सामः - सामवेदः अहमेव ॥ १७ ॥

किञ्च-

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ १८ ॥

गतिः कर्मफलं च भर्ता - पोषकश्च, प्रभुः - स्वामी साक्षी - प्राणिनां कृताकृतस्य साक्षी, द्रष्टा, निवासः - निवासस्थानं - वेश्मादि शरणाम् इष्टस्य प्रापकतया अनिष्ठस्य निवारकतया च समाश्रयणीयः। चेतनविशेषः शरणम्, सुहृत् प्रत्युपकारानपेक्षस्सन् उपकारी। प्रभवः। संहारः निधानं - निक्षेपः प्राणिनां कालान्तरभोग्यं अव्ययं - नाशरहितम् न तु व्रीह्यादिबीजवत् नश्वरम् इत्यर्थः। बीजम् - जलप्ररोहकरणम् अहमेवेति संबन्धः ॥ १८ ॥

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥

हे अर्जुन ! अहं सूर्यो भूत्वा कैश्चिद् रश्मिभिः जगत् तपामि। अहं वर्षं वृष्टिं प्रावृषि कैश्चिद्रश्मिभिः उत्सृजामि ततः वर्षं निगृह्णामि अष्टमासपर्यन्तम्।

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रश्मिभिः (वर्षस्य) निरोधं करोतीत्यर्थः। अमृतं - जीवनं- मृत्युश्च नाशः सत्- स्थूलं - दृश्यम्। असत् - सूक्ष्मं अदृश्यं च अहमेव बहुधा विश्वतो-मुखम् मामुपासन्ते इति पूर्वेण अन्वयः ॥ १९ ॥

एवं महात्मनां ज्ञानिनां भगवदनुभवैकभोग्यानां वृत्तमुक्त्वा तेषामेव विशेषं दर्शयितुं अज्ञानां कामकामानां वृत्तमाह द्वाभ्याम् -

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥ २० ॥

तिस्रो विद्याः ऋग्यजुस्सामरूपाः तां विन्दन्ति इति त्रैविद्या तदधीते तद्वेद इत्यण् त्रयी धर्मपरायणा इत्यर्थः। सोमं पिबन्ति इति सोमपाः अत एव पूतानि - शुद्धानि - पापानि येषां ते पूतपापाः ये यज्ञैः अग्निष्टोमादिभिः मां इन्द्रियादिरूपिणं इष्ट्वा पूजयित्वा - ममैवरूपम् एतां, देवतान्तरमित्यजानन्तः इन्द्रादीन् पृथग्भजन्त इति ॥ स्वर्गतिं - स्वर्गगमनम् प्रार्थयन्ते कामयन्ते ते जनाः पुण्यं पुण्यफलं सुरेन्द्रलोकं - सुराणां इन्द्रः श्रेष्ठः। शतक्रतुः तस्य भुवनम् आसाद्य प्राप्य दिवि स्वर्गे दिव्यान् उत्तमान् - देवभोगान् - देवानां भोगः सुखानि। तान् अश्नन्ति - भजन्ते ॥ २० ॥

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥ २१ ॥

ते - त्रयीविद्याजनाः, विशालं - पृथुलं, स्वर्गलोकं - तत्सुखमित्यर्थः, भुक्त्वा, पुण्ये क्षीणे सति, मर्त्यलोकं - इमं, विशन्ति। एवं - यथोक्तेन

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रकारेण, त्रयीधर्मं - वेदत्रयप्रतिपाद्यं - कर्म, अनुप्रपन्नाः- आश्रिताः कामान् कामयन्त इति कामकामाः- जनाः गतागतं - गमनागमने, लभन्ते, न तु स्वातन्त्र्यं क्वचिल्लभन्ते । किन्तु घटीयन्त्रवत् भ्रमन्तीत्यर्थः ॥ २१ ॥

निष्कामा मद्भक्तास्तु तथा न भवन्तीत्याह—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

नास्ति मद्व्यतिरेकेणान्यत् काम्यं येषां, ते **अनन्याः**। ये जनाः मां, चिन्तयन्तः स्मरन्तः सन्तः, पर्युपासते भजन्ते, तेषां - परमार्थदर्शिनां, नित्याभियुक्तानां - सन्तताभियोगिनां, अहं, योगक्षेमं, अप्राप्तप्रापणं योगः, तद्रक्षणं क्षेमः तदुभयं योगक्षेमः तं, वहामि प्रापयामि ॥ २२ ॥

ननु च त्वद्व्यतिरेकेण वस्तुतो देवतान्तरस्याभावात् इन्द्रादियाजिनोऽपि त्वद्भक्ता एव। कथं के यातायातं लभेरन्नित्यत्राह—

येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३ ॥

हे कौन्तेय, येऽपि अन्यदेवताभक्ताः - अन्यदेवतासु भक्ताः श्रद्धया आस्तिक्यबुद्ध्या, अन्विताः अनुगताः सन्तः, अन्यदेवताः यजन्ते - भजन्ते, तेऽपिजनाः अविधिः - मोक्षप्रापकविधानाभावः[57] पूर्वं यथा भवति तथा

57. वासुदेवव्यतिरिक्तं वस्तु नास्ति इति ज्ञानं विधिः तदभावः अविधिः तत्पूर्वकं यजन्ता इत्यर्थः (भा).

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अविधिपूर्वकं, मामेव, यजन्ति। अतः अन्यदेवतायाजिनः पुनरावर्तन्त इति भावः ॥ २३ ॥

उक्तार्थमेव स्पष्टयति–

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥

हि - यस्मात्, सर्वयज्ञानां, सर्वे - श्रौतस्मार्ताश्च यज्ञास्तेषां देवतात्वेन, भोक्ता च, प्रभुश्च - स्वामी च, अहमेव। एवंविधं मां, तत्वेन - याथार्थ्येन, ये, नाभिजानन्ति, ते (तत्त्वतः), अविधिपूर्वकं, इष्ट्वा यागफलात्, च्यवन्ति - प्रच्यवन्ते, पुनरावर्तन्त इति भावः ॥ २४ ॥

तत्कथमित्यत्राह–

यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥ २५ ॥

देवेषु व्रतं नियमो भक्तिश्च येषां ते देवव्रताः ॥ देवान्, यान्ति- गच्छन्ति। पितृव्रताः - श्राद्धादिक्रियापराः, पितृभक्ताः, पितॄन्, यान्ति, अग्निष्वात्तादीन् यान्ति। भूतेषु, इज्या - पूजा येषां ते भूतेज्याः, भूतानि - विनायकमातृगणादीनि, यान्ति। मद्याजिनः - मत्पूजनशीलाः मामेव, यान्ति। एवमायासे समानेऽपि अज्ञानात् अल्पफलभाजो भवन्तीत्यर्थः ॥ २५ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न केवलं मद्भक्तानामनावृत्तिलक्षणमनन्तफलं किन्तु मदाराधनं मद्भक्तानां सुकरमित्याह—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मन: ॥ २६ ॥

यो भक्त्या मे - मह्यं, **पत्रं** वा **पुष्पं** वा **फलं** वा **तोयं** वा **प्रयच्छति** ददाति, **अहं, प्रयत:** - शुद्ध:, आत्मा बुद्धिर्यस्य तस्य, **प्रयतात्मन:**, तस्य भक्त्या, उपहृतं, समर्पितं **भक्त्युपहृतं**, भक्तिपूर्वकं प्रापितमित्यर्थ:। **तत्** - पत्रादिकं वा, **अश्नामि**- भुञ्जे ॥ २६ ॥

न च फलपुष्पादिकमपि यागार्थपशुसोमादिद्रव्यवत् मदर्थमेवोद्यमै: आपाद्य समर्पणीयम् किं तर्हि—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥

हे **कौन्तेय**, स्वभावतो वा शास्त्रतो वा यत्किञ्चित् **करोषि**, तथा, **यदश्नासि**, **यज्जुहोषि**, **यद्ददासि**, **यत्तपस्यसि** - तप: करोषि, **तत्**सर्वं, **मदर्पणं** मय्यर्पितं, **कुरुष्व** ॥ २७ ॥

एवं मत्समर्पणं कुर्वत: तव यद्भवति तत् श्रृणु इत्याह—

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनै:।
सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवं - उक्तप्रकारेण, कुर्वन्, कर्मण्येव बन्धनानि तैः कर्मबन्धनैः कर्मनिमित्तैः शुभाशुभफलैः इष्टानिष्टैः फलैः, मोक्ष्यसे - मुक्तो भविष्यसि। कर्मणां मयि समर्पितत्वेन तत्फलसम्बन्धानुपपत्तेः कर्मभिर्विमुक्तः सन् संन्यासः कर्मणां मत्समर्पणं स एव योगः तेन युक्त आत्मा - अन्तःकरणं यस्य स सन्न्यासयोगयुक्तात्मा सन्। देहान्ते मामुपैष्यसि॥ २८॥

तर्हि भवान् रागद्वेषवान् यतो भक्तान् अनुगृह्णाति नेतरान् इत्याशङ्क्याह–

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥ २९॥

अहं सर्वभूतेषु, समः तुल्यः, मे - मम, द्वेष्टुं योग्या द्वेष्यः अप्रियो, नास्ति। प्रियः - इष्टश्च, नास्ति। किन्तु, ये मां, भजन्ति ते भक्ताः, मयि, भक्त्या प्रवर्तन्ते, अहमपि, तेषु - भक्तेषु, अनुग्राहकतया वर्ते, यथाग्निः दूरस्थानां शीतं नापनयति, समीपमुपसर्पतां शीतमपनयति, तथाऽहं भक्ताननुगृह्णामि नेतरान्। तस्मान्मम भक्तेर्माहात्म्यमेतादृशम्, मम तु वैषम्यं नास्तीति भावः॥ २९॥

पुनरपि भक्तेः अपरिमेयमहिमानं दर्शयन् आह–

अपिचेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥ ३०॥

सुदुराचारः अतीव कुत्सिताचारोऽपि अनन्यभाक् - मदन्यमभजमानस्सन्, मद्बुद्धिमेव सर्वत्र कुर्वाणस्सन्, इत्यर्थः। अयमेवोद्धारकः इति विश्वासं मय्येव कुर्वाण इति वार्थः। मां - परमेश्वरं, भजते, स साधुरेव -

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सदाचार एव, इति, मन्तव्यः, ज्ञातव्यः हि - यस्मात्, सः भक्तः, सम्यक् व्यवसितः- व्यवसायं कृतवान् प्रयत्नवानिति यावत् ॥ ३० ॥

ननु सम्यग्व्यवसायमात्रेण दुराचारः कथं साधुरिति मन्तव्य इत्यत्राह –

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥

क्षिप्रं - शीघ्रं **धर्मात्मा** - धर्मचित्त एव, **भवति, शश्वत्** - नित्यं, **शान्तिं** उपशमं, **निगच्छति** - नितरां प्राप्नोति। कुतर्ककर्कशवादिनो नैतन्मन्येरन् इति शङ्काव्याकुलमर्जुनं प्रोत्साहयति - **हे कौन्तेय !** पटहकाहलादिमहाधोषपूर्वकं विवदमानानां सभां गत्वा बाहुमुत्क्षिप्य निश्शङ्कं मे परमेश्वरस्य भक्तो सुदुराचारोऽपि **न प्रणश्यति।** अपि तु कृतार्थ एव भवति इति **प्रतिजानीहि** - प्रतिज्ञां कुरु। ततश्च ते त्वत्प्रतिज्ञाविजृम्भणविध्वंसित-कुतर्काः निस्संशयं त्वामेव गुरुत्वेनाश्रयेरन्निति ज्ञातव्यम् ॥ ३१ ॥

किञ्च मंद्भक्तिः पावनतमा इत्याह–

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ ३२ ॥

हे पार्थ, हि यस्मात्, **ये, पापा** निकृष्टा **योनिः** - जन्म येषां ते **पापयोनयः** निकृष्टजन्मानः चातुर्वर्ण्येतराः **स्युः** भवेयुः **येऽपि, स्त्रिया, शूद्राश्च, तथा,** अध्ययनरहिताः **वैश्याः** - केवलकृषिवाणिज्यपराश्च, **मां** परमेश्वरं, **व्यपाश्रित्य** - संसेव्य, **परां** - प्रकृष्टां, **गतिं, यान्ति** ॥ ३२ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उक्तेतरान् कैमुतिकन्यायेन स्तुवन् भजनमेवोपदिशति–

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥

पुण्याः - पुण्ययोनयः ब्राह्मणाः तथा भक्ताश्च, तथा राजानश्च ते ऋषयश्च राजर्षयः मामाश्रित्य परां गतिं, यान्तीति किं पुनः- किं वक्तव्यम् । यतः अनित्यं - क्षणभङ्गुरं असुखं - सुखवर्जितं, इमं लोकं - मनुष्यलोकं, प्राप्य, पुरुषार्थसाधनं दुर्लभं मनुष्यत्वं लब्ध्वेत्यर्थः । मां, भजस्व । अतो राजर्षिस्त्वं परमगतिः अस्तीति निश्चित्य मां भजस्व इति भावः ॥ ३३ ॥

भजनप्रकारं दर्शयन्नुपसंहरति–

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामैवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥

मयि मनो यस्य स मन्मनाः भव । तथा, मद्भक्तः - मम सेवकः भव । मां, यष्टुं - पूजयितुं शीलमस्यास्तीति मद्याजी भव । मां नमस्कुरु, अहमेव परमयनं यस्य स मत्परायणः सन्, एनं उक्तप्रकारैः, आत्मानं - मनः, मयि, युक्त्वा, समाधाय, मामेव, एष्यसि ॥ ३४ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीस्वामिशिष्य
रामचन्द्रानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजना-
समाख्यायां राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ दशमोऽध्यायः ॥

सप्तमाध्याये नवमे च भगवतः तत्त्वं विभूतयश्च प्रकाशिताः । अथ इदानीं येषु येषु भावेषु भगवान् चिन्त्यः ते भावा वक्तव्याः । भगवतः तत्त्वं च वक्तव्यम् । उक्तमपि दुर्विज्ञेयत्वात् इत्यतः श्रीभगवानुवाच—

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥

हे महाबाहो, अहं, मद्वचसा, अमृतेनेव, प्रीयमाणाय प्रीतिं प्राप्नुवते, ते-तुभ्यं, हितकाम्यया - हितकरणेच्छया, भूय एव - पुनरपि, यत्, परमं - प्रकृष्टं, निरतिशयवस्तुप्रकाशकं, वचो, वक्ष्यामि । मे - मम शृणु ॥ १ ॥

किमर्थं पुनर्वक्ष्यसीत्यत्राह—

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

महान्तश्च ते ऋषयो भृग्वादयो महर्षयः । मे मम, प्रभवं - प्रभुशक्त्यतिशयं, न विदुः । सुरगणाश्च, मे प्रभवं, न विदुः । अहं देवानां, महर्षीणां च, सर्वशः- सर्वप्रकारैः, उत्पादकत्वेन बुद्ध्यादि-प्रवर्तकत्वेन च, आदिः- कारणं हि । अतो मदनुग्रहं विना मां, केऽपि, न जानन्ति इत्यर्थः ॥ २ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

एवम्भूतात्मज्ञाने फलमाह–

योमामजमनादिं च वेत्ति लोकमहेश्वरम्।
असंमूढ: स मर्त्येषु सर्वपापै: प्रमुच्यते ॥ ३ ॥

न विद्यते आदि: यस्य तम् अनादिं, अत एव, अजं - जन्मरहितं, लोकमहेश्वरं, मां यो वेत्ति, मर्त्येषु, असंमूढ: संमोहवर्जित: । स मर्त्य:, सर्वपापै:, प्रमुच्यते । सर्वशब्देन बुद्धिकृतैरपि दुरितै:, मुक्तो भवतीति ज्ञायते ॥ ३ ॥

लोकमहेश्वरत्वमेव स्फुटीकरोति–

बुद्धिर्ज्ञानमसंमोह: क्षमा सत्यं दम: शम:।
सुखं दु:खं भवोऽभावो भयं चाभयमेव च ॥ ४ ॥

बुद्धि: - अन्त:करणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यं, ज्ञानं - आत्मादिपदार्थानामवबोध:। असंमोह:- प्रत्युत्पन्नेषु बोद्धव्येषु विवेकपूर्विका प्रवृत्ति: । क्षमा - आकृष्टस्य ताडितस्य वा अविकृतचित्तता, सत्यं - यथादृष्टस्य यथाश्रुतस्य वा आत्मानुभवस्य परबुद्धिसङ्क्रान्तये तथैवोच्चार्यमाणा वाक्। दमो - बाह्येन्द्रियोपशम: । शम: - अन्त:करणस्योपशम: । सुखं- आह्लाद: दु:खं - सन्ताप: भव:- उद्भव: - अभाव: - तद्विपर्यय:, भयं त्रास:, अभयं एव च (तद्विपरीतम्) मत्त एव, भवन्तीत्युत्तरेणान्वय: ॥ ४ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किञ्च -

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥

अहिंसा - प्राणिनामपीडा, समता - समचित्तता, तुष्टिः - सन्तोषः, लाभेषु पर्याप्तबुद्धिः, तपः - इन्द्रिय - संयमपूर्वकः कायक्लेशः, दानं - यथाशक्ति धनसंविभागः, यशः (धर्मनिमित्ता) कीर्तिः, अयशः - (अधर्मनिमित्ता) अकीर्तिः, इति, पृथग्विधाः, - स्वकर्मानुरूपेण नानाविधाः, भूतानां - प्राणिनां, भावाः - यथोक्ता बुद्ध्यादयः मत्त एव, भवन्ति॥ ५ ॥

किञ्च -

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता एषां लोक इमाः प्रजाः ॥ ६ ॥

पूर्वे - अतीतकालसम्बन्धिनः, सप्त, भृग्वादयो महर्षयश्च, तथा 'पूर्वे' चत्वारः, - सावर्णिसंज्ञकाः मनवश्च, मद्भावाः - मद्गतभावनाः, वैष्णवेन सामर्थ्येनोपेताः, मानसाः - हिरण्यगर्भात्मना मया मनसैवोत्पादिताः लोके, इमाः चराचररूपाः, प्रजाः एषां - मनूनां महर्षीणां । पञ्चम्यर्थे षष्ठी । जाताः उत्पन्नाः ॥ ६ ॥

यथोक्तविभूत्यादितत्वज्ञानस्य फलमाह—

एतां विभूतिं योगं च मम यो वेत्ति तत्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥ ७ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

यः, 'एतां मम' विभूतिं - विस्तरं - च, योगं - युक्तिं च, आत्मनः घटनमिति यावत्।[58] तत्वतो - यथावत् 'वेत्ति' सः अविकम्पेन - अप्रचलितेन योगेन, सम्यग्दर्शनस्थैर्यलक्षणेन, युज्यते - सम्बध्यते । अत्र - अस्मिन्नर्थे, संशयः, नास्ति ॥ ७ ॥

विभूतिज्ञानविपाकरूपां भक्तिविवृद्धिं दर्शयति—

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ ८ ॥

अहं - वासुदेवाख्यं ब्रह्म, सर्वस्य - जगतः, प्रभवः- उत्पत्तिकारणं, मत्त एव सर्वं - जगतः स्थितिप्रलयादि, प्रवर्तते इति एवं मत्वा । बुधाः - पण्डिताः, भावसमन्विताः- परतत्त्वाभिनिवेशयुक्ताः सन्तो, मां, भजन्ते - सेवन्ते ॥ ८ ॥

भजनप्रकारमेवाह—

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ ९ ॥

मयि चित्तं येषां ते मच्चित्ताः, मां गताः- प्राप्ताः, प्राणाः- चक्षुरादयश्च येषां ते मद्गतप्राणाः, मय्युपसंहृतकरणा इत्यर्थः। मद्गतजीविता वा । परस्परं - अन्योऽन्यं, बोधयन्तः- श्रुत्यादिप्रमाणैरवगमयन्तः, ज्ञानबलैश्वर्यादिधर्मैर्विशिष्टं मां, कथयन्तः- कीर्तयन्तश्च तुष्यन्ति - परितोषं यान्ति । रमन्ति- प्रियसङ्गत्वेन रमन्ति च ॥ ९ ॥

58. ईश्वरस्य तत्तदर्थसंपादनसामर्थ्यं योगः (आ)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ये यथोक्तप्रकारैर्मां भजन्ते तान् अनुगृह्णामि इत्याह—

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥

सततयुक्तानां मयि नित्यं योगमाकाङ्क्षमाणानां, प्रीतिपूर्वकं यथा तथा, भजतां - सेवमानानां, तेषां, चतुर्थ्यर्थे षष्ठी। तं - बुद्धियोगं - सम्यग्दर्शनयोगं, ददामि। येन - बुद्धियोगेन, ते, मां - परमात्मानं, उपयान्ति आत्मत्वेन प्रतिपद्यन्ते ॥ १० ॥

ननु केषां किमर्थं बुद्धियोगं ददासि इत्यपेक्षायामाह—

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

तेषामेव - मच्चित्तादीनामेव, अनुकम्पार्थं - दयाहेतोः, आत्मभावस्थः, आत्मनो भावः अन्तःकरणाशयः, तस्मिन् स्थितः, अहं भास्वता - प्रकाशमानेन, ज्ञानदीपेन, ज्ञानं - विवेक एव दीपः तेन, अज्ञानजं - अविवेकतो जातं, तमः - मिथ्याप्रत्ययलक्षणं मोहान्धकारं, नाशयामि ॥ ११ ॥

उक्तां विभूतिं योगं च श्रुत्वा अर्जुन उवाच—

परं ब्रह्म परंधाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भवान्, परं ब्रह्म, परं धाम - तेजः, परमं, पवित्रं-पावनं, किञ्च-पुरुषं शाश्वतं, नित्यं, दिव्यं, दिवि भवं, आदि देवं - सर्वदेवानामादिदेवं, अजं विभुं - विभवशीलं, त्वामाहुरित्युत्तरेणसम्बन्धः ॥ १२ ॥

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥

देवर्षिःनारदश्च, असितो, देवलश्च, व्यासश्च, सर्वे वसिष्ठाद्या ऋषयश्च, त्वां, विभुं, शाश्वतं, पुरुषं, आहुः, स्वयं चैव, त्वं, मे - मह्यं, ब्रवीषि ॥१३॥

अतो मम सम्प्रति भवन्महत्त्वविषये असम्भावना निवृत्ता इत्याह—

सर्वमेतदृतं मन्ये यन्मां वदसि केशव।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

हे केशव, मां प्रति, यद् वदसि - भाषसे, ऋषिभिश्च यदुक्तं, तत्सर्वं, ऋतं सत्यमेव, मन्ये। हे भगवन् ते - तव, व्यक्तिं - प्रभवं, देवाः, न विदुः - न जानन्ति । हि, दानवाश्च, न विदुः ॥ १४ ॥

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

हे पुरुषोत्तम, हे भूतभावन, हे भूतेश हे देव देव, हे जगत्पते, आदरातिशयेन सम्बोधनबाहुल्यम्। आत्मना - स्वयमेव, आत्मानं - निरतिशयज्ञानैश्वर्यबलादि शक्तिमन्तं त्वां, वेत्थ - जानासि ॥ १५ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अतः-

> वक्तुमर्हस्यशेषेण दिव्याह्यात्मविभूतयः ।
> याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

या आत्मविभूतयः आत्मनो माहात्म्यविस्ताराः दिव्याः हि, याभिः, विभूतिभिः - आत्मनो माहात्म्यविस्तारैः इमान्, लोकान्, व्याप्य, त्वं, तिष्ठसि, ताः विभूतीः अशेषेण वक्तुं, अर्हसि ॥ १६ ॥

कथनप्रयोजनं दर्शयन् प्रार्थयते–

> कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
> केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥ १७॥

हे योगिन्, अहंकथं - कैर्विभूतिभेदैः, त्वां, सदा, परिचिन्तयन्, विद्यां - जानीयाम् । हे भगवन्, केषु केषु, भावेषु - वस्तुषु, मया, चिन्त्यः, असि ॥ १७ ॥

तदेवं चित्ते बहिर्मुखेऽपि, तत्र तत्र विभूतिभेदेन त्वं चिन्तनीयो यथा भवेः, तथा विस्तरेण कथयेत्याह–

> विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
> भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ १८ ॥

हे जनार्दन, आत्मनः, तव, योगं - योगैश्वर्यशक्तिविशेषं, विभूतिं - ध्येयपदार्थानां विस्तारं च, भूयः, कथय । अमृतं -त्वन्मुखनिस्सृतां वाक्यसुधां, शृण्वतः, मे - मम, तृप्तिः- परितोषः नास्ति ॥ १८ ॥

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवं प्रार्थित: श्रीभगवानुवाच—

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतय:।
प्राधान्यत: कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९ ॥

हे कुरुश्रेष्ठ, हन्त इत्यनुकम्पा सम्बोधने, या, दिव्या ह्यात्मविभूतय: ता: विभूती:, प्राधान्यत: - प्राधान्येन, विभूतिषु प्रधानां मुख्यभूतां विभूतिमित्यर्थ:। ते - तुभ्यं, कथयिष्यामि। मे - मम, विभूतीनां विस्तरस्य अन्त: नास्ति ॥ १९ ॥

तत्र प्रथममेव तावत् शृणु इत्याह –

अहमात्मा गुडाकेश सर्वभूताशयस्थित:।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २० ॥

गुडाका - निद्रा, तस्या ईश: गुडाकेश:, तस्य सम्बुद्धिर्हे गुडाकेश। घनकेश इति वा। अहं, सर्वभूताशयस्थित:, सर्वेषां - भूतानां, आशये - अन्त: हृदि स्थित:, आत्मा - नित्यं ध्येय: तदशक्तेन उत्तरेषु भावेषु चिन्त्य:। यस्मात्, अहमेव, भूतानां, आदि:कारणं, तथा मध्यं च - स्थिति: ॥ अन्त: - प्रलयश्च, जन्मादिहेतुरहमित्यर्थ: ॥ २० ॥

विभूतीरेव कथयति यावदध्यायपरिसमाप्ति—

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अदितेः अपत्यानि पुमांस आदित्याः तेषां द्वादशानां आदित्यानां विष्णुर्नाम आदित्योहम् । ज्योतिषां - प्रकाशयितृणां, अंशुमान् - रश्मिमान्, रविः- सूर्योऽहं, मरुतां - मरुद्देवताभेदानां, मरीचिर्नामास्मि । अहं नक्षत्राणां शशी ॥ २१ ॥

वेदानां सामवेदोऽस्मि देवानाममस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥ २२॥

अहं वेदानां मध्ये, सामवेदो ऽस्मि देवानां रुद्रादित्यानां वासवः इन्द्रोऽस्मि । इन्द्रियाणां एकादशानां मनश्चास्मि । भूतानां कार्यकारण-संघातेऽभिव्यक्तबुद्धेः वृत्ति चेतनाऽस्मि । २२ ।

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्॥ २३॥

रुद्राणां - एकादशानां शङ्करश्चास्मि । यक्षरक्षसां वित्तेशः कुबेरः अस्मि । वसूनां अष्ठानां पावकः अग्निश्चास्मि । शिखरिणां - शिखरवतां मेरुः अहम् । २३ ।

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीमहं स्कन्दः सरसामस्मि सागरः। २४।

हे पार्थ ! पुरोधसां राजपुरोहितानां मुख्यं - प्रधानं बृहस्पतिं मां विद्धि । सेनानीनाम् सेनापतीनां नुगागमः आर्षः । स्कन्दः अहम् । सरसां - देवरशतानाम् सागरोऽस्मि ॥ २४ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

महर्षीणां भृगु रहम्, गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥

महर्षीणां - भृगुः अहम्, गिराम् - पदलक्षणानां वाचाम् एकं-केवलं अक्षरम्-प्रणवः अस्मि । यज्ञानां जपयज्ञोऽस्मि । स्थावराणां-स्थितिमतां हिमालयः हिमवान् अस्मि ॥२५ ॥

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥

सर्ववृक्षाणां अश्वत्थोऽस्मि । देवाः ऋषित्वं प्राप्ताः देवर्षयः मन्त्रदर्शिनः तेषां नारदोऽस्मि । गन्धर्वाणां चित्ररथोऽस्मि । सिद्धानां जन्मनैव धर्मज्ञानैश्वर्यप्राप्तानां कपिलः कपिलाख्यो मुनिः ॥ २६ ॥

उच्चैःश्रसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ २७ ॥

अश्वानां मध्ये अमृतोद्भवं उच्चैश्रवसम् नामाश्वम् मां विद्धि । गजेन्द्राणां ऐरावतं मां विद्धि । नराणां नराधिपं राजानं मां विद्धि ॥ २७ ॥

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥

आयुधानाम् -वज्रं दधीच्यस्थिसंभवम् - कुविशं अहम् । धेनूनाम् - दोग्ध्राणाम् -कामधुगस्मि । प्रजनः जनयिता । कन्दर्पः कामोऽस्मि । सर्पाणां एकशिरसाम् सर्पभेदानां - वासुकिर्नामास्मि ॥ २८ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यम: संयमतामहम् ॥ २९ ॥

नागानां-बहुशिरसां सर्पभेदानां, अनन्त: शेषोऽस्मि । यादसाम् जलदेवतानाम् वरुणोऽहम् । पितॄणाम् अर्यमानाम पितृराजश्चास्मि । संयमतां - संयमनं कुर्वतां यम:, वैवस्तश्चास्मि ॥ २९ ॥

प्रह्लादश्चास्मि दैत्यानां काल: कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥

दैत्यानाम्-दितिवंश्यानाम् प्रह्लादश्चास्मि । कलयतां-कलनं गणनं कुर्वताम् कालोऽहम् । मृगाणाम्-मृगेन्द्र:सिंहोऽहम् । पक्षिणाम् वैनतेय: गरुड: ॥ ३० ॥

पवन: पवतामस्मि राम: शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥

पवतां-पावयितॄणाम् पवन: वायु: अस्मि । शस्त्रभृताम् - राम: दाशरथी अहम् । झषाणां मत्स्यविशेषादीनां मकर: जातिविशेष: अस्मि । स्रोतसाम् - जाह्नवी गङ्गाऽस्मि ॥ ३१ ॥

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वाद: प्रवदतामहम् ॥ ३२ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

हे अर्जुन! सर्गाणाम्-सृष्टीनाम् । आदिश्च मध्यश्च अन्तश्च उत्पत्तिस्थितिलया: इत्यर्थ: । अहम् - भूतानाम् जीवाधिष्ठितानाम् एव आदि: अन्तश्चेत्युक्तं उपक्रमे । इह तु सर्वस्यैव सर्गमात्रस्येति विशेष: । विद्यानाम् अध्यात्मविद्याऽस्मि । मोक्षप्रदत्वात् । प्रवदताम्-प्रकर्षेण वाद इति प्रवदत्संबन्धिनां कथाभेदानाम् (मध्ये) वादोऽहम् ॥३२ ॥

अक्षराणामकारोस्मि द्वन्द्व: सामासिकस्य च ।
अहमेवाक्षय: कालो धाताहं विश्वतोमुख: ॥ ३३ ॥

अक्षराणाम् - वर्णानाम् अकारोऽस्मि । 'अकारो वै सर्वा वाक् इति श्रुते: । सामासिकस्य समाससमूहस्य द्वन्द्वसमास: उभयपदार्थ-प्रधानत्वम् । अहमेव अक्षय: अक्षीण: काल: प्रसिद्ध: क्षणाख्य: परो वा ईश्वर: कालस्यापि काल: अहम् । धाता - कर्मफलस्यापि धाता । विश्वतोमुख: चतुर्मुख: ॥ ३३ ॥

मृत्यु: सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्ति: श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृति: क्षमा ॥ ३४ ॥

मृत्यु: द्विविध: - धनहर: प्राणहरश्च । सर्वहरो मृत्युरहम् अथवा हर: ईश्वर: प्रथमे सर्वहरणात् सर्वहर: सोऽहम् । भविष्यताम् - भविष्यकारणानाम् । उत्कर्षप्राप्तियोग्यानां इत्यर्थ: । नारीणाम् कीर्ति: श्री वाक् च उद्भवश्च

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्कर्षः अभ्युदयः । तत्प्राप्तिहेतुश्चाहम् । स्मृतिः मेधा धृतिः क्षमा अहमस्मि । या सा भासमात्रसंबन्धेनापि लोकः कृतार्थमात्मानं मन्यते ॥३४॥

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

साम्नां बृहन्नाम सामाऽस्मि । छन्दसां छन्दोविशिष्टानाम् ऋचां गायत्री ऋगहम् । मासानांमार्गशीर्षोऽहम् । ऋतूनां कुसुमाकरः वसन्तोऽहम् ॥ ३५ ॥

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥

छलयताम् - छलं कुर्वताम् । अन्योन्यवञ्चनपराणाम् । द्यूतं-अस्मि । तेजस्विनाम् प्रधानवताम् । तेजोऽहम् । जेतॄणाम् जयोऽस्मि । व्यवसायिनाम् व्यवसायोऽस्मि । सत्त्ववतां सात्विकायां सत्त्वमहम् ॥ ३६ ॥

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७॥

वृष्णीनाम् - वृष्णिवंशानाम् वासुदेवोऽहमस्मि । पाण्डवानां धनञ्जयः त्वमेवाहम् । मुनीनाम् सर्वपदार्थज्ञानाम् - व्यासोऽप्यहमस्मि । कवीनाम् क्रान्तदर्शिनाम् - उशना शुक्रोऽहम् ॥ ३७ ॥

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दमयतां नियमातिक्रमणे दण्डं कुर्वताम् दण्डोऽस्मि । जिगीषताम् जेतुं इच्छूनां जयोपायभूता नीतिरस्मि । गुह्यानाम् मौनं चैवास्मि । ज्ञानवतां ज्ञानमहम् ॥ ३८ ॥

यच्चापि सर्वभूतानां बीजं तदहमर्जुन।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥

हे अर्जुन ! मत्सर्वभूतानां बीजं प्ररोहकारणम् तदप्यहम् । प्रकरणोपसंहारार्थं विभूतिसंक्षेपमाह । चरं अचरं वा भूमं विना यत्स्यात् भवेत् तन्नास्ति । मदत्र तिष्ठितम् निरात्मकम् शून्यं हि अतः मदात्मकं सर्वं इत्यर्थः ॥ ३९ ॥

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।
एष तूद्देशतः प्रोक्तो विभूते विस्तरो मम ॥ ४० ॥

हे परन्तप! मम दिव्यानां विभूतीनां विस्ताराणां अन्तो नास्ति । परमेश्वरस्य दिव्यविभूतयः केनापि ज्ञातुं च वक्तुं च अशक्याः इत्यर्थः । एषः विभूतेः विस्तरस्तु मया उद्देशतः एकदेशेन संक्षेपतः प्रोक्तः ॥ ४० ॥

पुनः साकाङ्क्षं प्रति कथञ्चित् साकल्येन कथयति-

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोऽंशसंभवम् ॥ ४१ ॥

लोके विभूतिमत् - विभूतियुक्तम् श्रीमत् - संपद्युक्तम् । कान्तियुक्तं वा ऊर्जितम् - उत्साहोपेतम् वा। यद्यत्सत्त्वं वस्तु तत्तद्वस्त्वेव

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मम तेजोऽंश: एकदेश: संभव: यस्य तत् तेजोऽंशसंभवं इति त्वं अवगच्छ, जानीहि ॥ ४१ ॥

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४१ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्याय: ॥ १० ॥

हे अर्जुन! अथवा तव एतेन एवमादिना बहुना ज्ञातेन किं स्यात् त्वं सावशेषेण अवशेषमिमं उच्यमानं अर्थं श्रुणु । अहं एकांशेन एकावयवेन एकपादेन सर्वत: भूतस्वरूपेण इत्यर्थ: । इदं जगत् विष्टभ्य विशेषेण स्तम्भनं कृत्वा स्थित: । तथा च श्रुति: 'पादोऽस्य विश्वा भूतानि' इति ॥ ४२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वती स्वामिशिष्य
रामचन्द्रानन्दसरस्वती विरचितायां भगवद्गीता व्याख्यायां
पदयोजनासमाख्यायां विभूतियोगो नाम दशमोऽध्याय:

॥ एकादशोऽध्याय: ॥

भगवत: विभूतय: उक्ता: । तत्र च विष्टभ्याहमिदं कृत्स्नं एकांशेन स्थितो जगत्' इति भगवता अभिहितं श्रुत्वा यज्जगदात्मस्वरूपं आद्यं ऐश्वर्यं तत्साक्षात्कर्तुम् इच्छन् अर्जुन: उवाच-

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मदनुग्रहाय-मदनुग्रहार्थम्त्वया परमं-निरतिशयम्-गोप्यम् अध्यात्म-संज्ञितम् - आत्मानात्मविवेकविषयं यद्वच: वाक्यं उक्तम् तेन वाक्येन मम अयम्-मोह: अविवेकबुद्धि: विगत: अपगत: ॥ १ ॥

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्त: कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २ ॥

हे कमलपत्राक्ष: त्वत्त: सकाशात् भूतानाम् प्राणिनां भव उत्पत्तिश्च व्ययश्च प्रलयश्च भवव्ययौ विस्तरश: पुन: विस्तरेण मया श्रुतौ अव्ययम् अक्षरम् ते च माहात्म्यम् अपि श्रुतमित्यनुषज्यते ॥ २ ॥

श्रुतमपि साक्षात् द्रक्ष्यामि इत्याह-

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥

हे परमेश्वर! हे पुरुषोत्तम! त्वमेवं एतत् इत्यवधृतम् । यथा येन प्रकारेण आत्मानं त्वं आत्थ कथयसि तथा तेन प्रकारेण ऐश्वर्य ज्ञानशक्ति-बलवीर्यतेजोभि: संपन्नं ते रूपं द्रष्टुं इच्छामि ॥ ३ ॥

न चाहम् द्रष्टुमिच्छामि इत्येतावतैव त्वया त्वद्रूपं दर्शयितव्यम् । किं तर्हि-

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे प्रभो ! स्वामिन् । योगिनः ये योगाः तेषाम् ईश्वरः तस्य सम्बुद्धिः हे योगेश्वर, तद्रूपं मया द्रष्टुं शक्यं इति मन्यसे चिन्तयसि यदि, यतोऽहं द्रष्टुकामः ततः त्वं मे-मह्यं अव्ययम् - शाश्वतम् आत्मानं दर्शय ॥ ४ ॥

एवमर्जुनेन चोदितः श्रीभगवानुवाच—

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥

हे पार्थ, नानाविधानि - अनेकप्रकाराणि, दिव्यानि - अप्राकृतानि, नानाविधलक्षणाः नीलपीतादिप्रकारा वर्णाः आकृतयश्च - अवयवसंस्थान-विशेषां येषां तानि नानावर्णाकृतीनि। शतशः, अथ, सहस्रशः, बहुशतानि बहुसहस्राणीत्यर्थः। मे - मम, रूपाणि, पश्य। रूपस्यैकत्वेऽपि नानाविधत्वात् बहुवचनम् ॥ ५ ॥

किञ्च -

पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥

आदित्यान् द्वादश, वसून् अष्टो, रुद्रान् - एकादश, अश्विनौ द्वौ, तथा, मरुतः सप्तगणाः पश्य। हे भारत, अदृष्टपूर्वाणि, मनुष्यलोके त्वत्तोऽन्येन केनचिदपि पूर्वं न दृष्टानि बहूनि, अन्यानि आश्चर्याणि, अद्भुतानि, पश्य ॥ ६ ॥

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न केवलमेतावदेवेत्याह–

इहैकस्थं जगत्कृऽत्सनं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥

हे गुडाकेश, अद्य - इदानीं, सचराचरं, कृत्स्नं - समस्तं, जगत्, इह - अस्मिन् मम देहे, एकस्थं - एकस्मिन्नेव स्थितं,[59] पश्य यच्च अन्यत् - जयपराजयादि[60] - यच्छङ्कसे तदपि द्रष्टुम् इच्छसि, पश्य ॥ ७ ॥

न तु मां शक्ष्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८ ॥

अनेनैव - प्राकृतेन, स्वचक्षुषा, मां - विश्वरूपधरं, द्रष्टुं न शक्ष्यसे। अतो येन तु शक्ष्यसे द्रष्टुं दिव्येन, तद्दिव्यं, चक्षुः, ते - तुभ्यं, ददामि - दास्यामि, ऐश्वरं, ईश्वरस्येमं ऐश्वरं, योगं - योगशक्त्यतिशयं, पश्य ॥ ८ ॥

सञ्जय उवाच–

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥

59. एकस्मिन्नेव अवयवरूपेण स्थितम् इत्यर्थः ।

60. 'यद्वा जयेम यदि वा नो जयेयुः (भ.गी.2.6) इति यदवोचः तदपि द्रष्टुं यदि इच्छसि तदपि पश्य इति योजना ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे राजन् - धृतराष्ट्र, महायोगेश्वर: महांश्चासौ योगेश्वरश्च, हरि:-नारायण:, एवमुक्त्वा, तत:, पार्थाय, परमं, ऐश्वरं, रूपं दर्शयामास ॥ ९ ॥

कथम्भूतं तत् इत्यत्राह–

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥

अनेकानि, वक्त्राणि, नयनानि च यस्मिंन् तत् अनेकवक्त्रनयनं, अनेकानि, अद्भुतानि विस्मयकराणि दर्शनानि यस्मिन् तत् अनेकाद्भुत-दर्शनम् । अनेकानि दिव्याभरणानि यस्मिन् तत् अनेकदिव्याभरणं दिव्यानि अनेकानि खङ्गदीनि उद्यतानि, आयुधानि यस्मिन् तत् दिव्यानेकोद्यतायुधं, रूपं, पार्थाय दर्शयाम इति पूर्वेण सम्बन्ध: ॥ १० ॥

किञ्च–

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११ ॥

दिव्यानां माल्यानां - पुष्प स्रजां, अम्बराणां च धरतीति धरं दिव्यमाल्याम्बरधरं, दिव्यं गन्धानुलेपनं यस्य तं । सर्वाश्चर्यमयं[61] विश्वतोमुखं[62] सर्वतोमुखम्, अनन्तं - अपरिच्छिन्नं, देवं - परमेश्वरं, अर्जुनो ददर्शेत्यध्याह्रियते ॥ ११ ॥

61. सर्वाश्चर्यमयम् - अनेकाद्भुतप्रचुरम् (गू)

62. विश्वतोमुखम् - सर्वभूतात्मत्वात् सर्वतो मुखम् (भा)

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

विश्वरूपस्य भगवतो या भा: तस्या उपमामाह—

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।
यदि भा: सदृशी सा स्याद्भासस्तस्य महात्मन: ॥ १२ ॥

दिवि - आकाशे, युगपत्, उत्थितस्य, सूर्यसहस्रस्य, सूर्याणां सहस्र, तस्य या, युगपदुथता भा: - प्रभा, सा, भवेद्यदि, तस्य - महात्मनो विश्वरूपस्य, भास: सदृशी, स्यात् न अन्या उपमा ॥ १२ ॥

तत: किं वृत्तमित्यत्राह—

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३ ॥

अनेकधा - देवपितृमनुष्यादि भेदै: प्रविभक्तं, कृत्स्नं - समस्तं, जगत् - देवदेवस्य - विश्वरूपस्य, तत्र - शरीरे, एकस्थं - एकस्मिन् स्थितं, तदा, पाण्डव: अर्जुन:, अपश्यत् ॥ १३ ॥

यत एवम् -

तत: स विस्मयाविष्टो हृष्टरोमा धनञ्जय:।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ १४ ॥

तत: - दर्शनानन्तरं, विस्मयेन - अद्भुतेन, आविष्ट:- व्याप्त: विस्मयाविष्ट: सन्, हृष्टानि - पुलकितानि, रोमाणि यस्य स हृष्टरोमा, स,

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धनञ्जयः- अर्जुनः, देवं - विश्वरूपधरं, शिरसा, प्रणम्य कृताञ्जलिस्सन्, अभाषत ॥ १४ ॥

कथं यत्त्वया दर्शितं विश्वरूपं तदहं पश्यामीति स्वानुभवमाविष्कुर्वन्नर्जुन उवाच –

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥ १५ ॥

हे देव, तव देहे, देवान् आदित्यादीन्, पश्यामि । तथा, सर्वान्, भूतविशेषसंधान्, भूतविशेषाणां - स्थावरजङ्गमानां - नानासंस्थानविशिष्टानां संघान्, पश्यामि । किं च- कमलासनस्थं, पृथिवीपद्ममध्ये मेरुकर्णिकासमा-सीनमित्यर्थः । ईशम् - प्रजानामशितारं, ब्रह्माणं - चतुर्मुखं च, सर्वान्वसिष्ठादीन् ऋषींश्च, दिव्यान् दिविभवान् वासुकिप्रभृतीन् उरगांश्च पश्यामि ॥ १५ ॥

किञ्च -

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥ १६ ॥

अनेकानि बाहवः उदराणि वक्त्राणि नेत्राणि यस्य तं अनेकबाहूदरवक्त्रनेत्रं, सर्वतः- सर्वत्र, अनन्तानि रूपाणि यस्य तम् अनन्तरूपं, पश्यामि । हे विश्वेश्वर, हे विश्वरूप, तव पुनः आदिं न पश्यामि तव, मध्यं नाम द्वयोः कोट्योरन्तरं न पश्यामि । अन्तं - अवसानं, न पश्यामि ॥ १६ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किं च -

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७॥

किरीटिनं - किरीटवन्तं, गदिनं - गदावन्तं, चक्रिणं - चक्रवन्तं, तेजोराशिं - तेजः पुञ्जं, सर्वतो दीप्तिरस्यास्तीति तं सर्वतोदीप्तिमन्तं, दुर्निरीक्ष्यं - निरीक्षितुमशक्यं, अत एव, दीप्तयोः अनलार्कयोः - अग्नि-सूर्ययोः, द्युतिरिव द्युतिर्यस्य तं, दीप्तानलार्कद्युतिं अप्रमेयं - अपरिच्छेद्यं, त्वां- त्वां समन्तात् पश्यामि ॥ १७ ॥

यस्मादेवं तव अनन्तमैश्वर्यं तस्मात्–

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८॥

त्वं, वेदितव्यं - मुमुक्षुभिर्वेद्यं, परमं अक्षरं - ब्रह्म, त्वं अस्य विश्वस्य- समस्तस्य जगत; परं - प्रकृष्टं, निधीयतेऽस्मिन्निति निधानं - पर आश्रय इत्यर्थः। किञ्च, त्वं अव्ययः - व्ययरहितः, शाश्वतो नित्यो धर्मस्तस्य गोप्ता शाश्वतधर्मगोप्ता। त्वं सनातनः - चिरन्तनः, पुरुष इति, मे, मतः - अभिप्रेतः, असि ॥ १८ ॥

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥ १९॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न विद्यन्ते आदिर्मध्यं चान्तश्च यस्य तं **अनादिमध्यान्तं**, अनन्तं - अमितं, वीर्यं यस्य तं **अनन्तवीर्यं**, अनन्ता बाहवो यस्य तं **अनन्तबाहुं**, शशिसूर्यनेत्रं - **चन्द्रार्कनयनं**, त्वां पश्यामि । दीप्तः हुताशो वह्निः वक्त्रं वक्त्रेषु वा यस्य तं दीप्तहुताशवक्त्रं स्वतेजस । इदं, विश्वं - समस्तं, तपन्तं - सन्तापयन्तं, पश्यामि ॥ १९ ॥

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥

द्यावापृथिव्योः, इदं, अन्तरं हि - अन्तरिक्षं, व्याप्तं, त्वया - विश्वरूपधरेण, एकेन, सर्वा दिशश्च व्याप्ताः, हे महात्मन् - अक्षुद्रस्वभाव, अद्भुतं - विस्मापकं, उग्रं - क्रूरं, तव, इदं रूपं, दृष्ट्वा, लोकत्रयं - त्रैलोक्यं, प्रव्यथितं - भीतं, चलितं वा ॥ २० ॥

अथेदानीं 'यद्वा जयेम यदि वा नो जयेयुः' (भ.गी. २.६) इत्यस्यार्जुनस्य यः संशयो जातः तन्निर्णयाय पाण्डवविजयं दर्शयन्तं भगवन्तं पश्यन् आह—

अमी हि त्वां[63] सुरसंघा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥

63. त्वां असुरसङ्घा इति पदं छित्वा भूभारभूताः दुर्योधनादयः त्वां विशन्ति इत्यपि वक्तव्यम् (आ)

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDR

अमी हि - युध्यमाना योद्धारः, सुरसंघा - ये तु भूभारावतरणायावतीर्णाः वस्वादिदेवसंघा मनुष्यसंस्थानाः ते, त्वां विशन्ति - प्रविशन्तो दृश्यन्ते। तत्र केचित् भीताः, प्राञ्जलयस्सन्तः, गृणन्ति - स्तुवन्ति। पलायनेऽप्यशक्ताः सन्तो युद्धे प्रत्युपस्थिते महर्षीणां सिद्धानां च संघाः उत्पातादि निमित्तान्युपलभ्य, जगतः स्वस्ति क्षेमं, अस्तु इत्युक्त्वा, पुष्कलाभिः - सम्पूर्णाभिः, स्तुतिभिः त्वां, स्तुवन्ति ॥ २१ ॥

किञ्च -

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसंघा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे॥ २२॥

रुद्रादित्याः - रुद्राश्च आदित्याश्च, वसवः, ये च, साध्याः साध्या नाम देव विशेषाः, विश्वे - विश्वेदेवाः अश्विनौ मरुतश्च, ऊष्माणं पिबन्तीति ऊष्मपाः पितरः। 'ऊष्म भागा हि पितर' इति श्रुतेः। गन्धर्वयक्षासुरसिद्धसंघाः गन्धर्वाः हाहाहूहूप्रभृतयः यक्षाः- कुबेरादयः, असुराः विरोचनादयः, सिद्धाः- कपिलादयः, तेषां संघाः, एते सर्वे च विस्मितास्सन्तः, त्वां ईक्षन्ते - पश्यन्ति ॥ २२ ॥

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्॥ २३॥

हे महाबाहो, बहूनि, वक्त्राणि - मुखानि, नेत्राणि यस्य तत् बहुवक्त्रनेत्रं, बहवो बाहवश्च ऊरवश्च पादाश्च यस्य तत् बहुबाहूरुपादं, बहून्युदराणि यस्य तत् बहूदरं, बह्वीभिर्दंष्ट्राभिः करालं - विकृतं बहुदंष्ट्राकरालं

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
Acc.No. 389488
Acc.Date 2-4-25

महत् अतिप्रमाणंते तव रूपं दृष्ट्वा ॥ लोकाः प्राणिनः प्रव्यथिताः भयेन प्रचलिताः तथाऽहमपि प्रचलितः ॥ २३ ॥

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥ २४ ॥

हे विष्णो ! नभः स्पृशति इति नभःस्पृक् तं नभस्पृशम् दीप्तं ज्वलितम् अनेकवर्णम्। अनेके - भयंकराः नानासंस्थानाः वर्णाः यस्मिन् तं व्यात्तानि विवृतानि आननानि यस्य तं व्यात्ताननम् दीप्तानि ज्वलितानि विशालानि नेत्राणि यस्य ते दीप्तविशालनेत्रम् त्वां-त्वां दृष्ट्वा प्रव्यथितः अन्तरात्मा मनः यस्य सः प्रव्यथितान्तरात्मा अहं धृतिं धैर्यं च शमं मनस्तुष्टिं च न विन्दामि हि- न लभे ॥ २४ ॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंन्निभानि।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥

दंष्ट्राकरालानि - कालानलसन्निभानि - प्रलयकालाग्निसंनिभानि प्रलयकालाग्निसदृशानि - ते मुखानि दृष्ट्वैव कालानलसंनिभानि उपलभ्यः दिशः न जाने दिङ्मूढो जातोऽस्मि इत्यर्थः अतः शर्म सुखं न लभे च। अतः हे देवेश ! हे जगन्निवास ! प्रसीद प्रसन्नो भव ॥ २५ ॥

SJ-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

Acc. No. 38938
Acc. Date 2-1-25

येभ्यः स्वस्य पराजयशङ्का जाता सा च अपगता इत्याह -

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

अवनिपालसङ्घैः - राजसंघातैः सह सर्वे अमी धृतराष्ट्रस्य पुत्राः दुर्योधनादयः भीष्मः द्रोणश्च तथाऽसौ सूतपुत्रः कर्ण अस्माकं इमे अस्मदीयाः तैः अस्मदीयैः दृष्टद्युम्नप्रभृतिभिः योधमुख्यैः प्रीतियोधप्रधानैः सह ते वक्त्राणि विशान्ति इत्युत्तरेण अन्वयः ॥ २६ ॥

वक्त्राणि ते त्वरमाणा विशान्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ २७ ॥

एते दुर्योधनादयः त्वरमाणाः त्वरा युक्ताः सन्तः दंष्ट्राकरालानि भयानकानि भयंकराणि ते तव - वक्त्राणि विशान्ति । तेषां मध्ये केचित् - दशनान्तरेषु दन्तान्तरेषु विलग्नाः सन्तः चूर्णितैः चूर्णाः उत्तमाङ्गैः शिरोभिः दृश्यन्ते ॥ २७ ॥

यथा नदीनां बहवोऽम्बुगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८ ॥

यथा येन प्रकारेण बहवः अनेकनदीनां स्रवन्तीनाम् अम्बुवेगाः अम्बुनां वेगाः त्वराविशेषाः अभिमुखाः समुद्राभिमुखाः सन्तः समुद्रयैव द्रवन्ति । संविशन्ति । तथा अमी भीष्मादयः नरलोकवीरा मनुष्यलोके शूरा अभिविज्वलन्ति प्रकाशमानानि ते वक्त्राणि विशन्ति ॥ २८ ॥

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किमर्थं प्रविशन्ति कथञ्च इत्यत्राह -

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः॥ २९॥

पतङ्गाः शलभाः समृद्धं अद्भुतः वेगः गतिः तेषां ते समृद्धवेगाः सन्तः प्रदीप्तं ज्वलनं ज्वलत्पावकं नाशाय यथा विशन्ति तथा लोकाः प्राणिनः समृद्धवेगाः सन्तः तव वक्त्राणि नाशाय विशन्ति ॥ २९ ॥

लेलिह्यसे ग्रसमानः समन्ताल्लोकान् समग्रान्वदनैर्ज्वलद्भिः।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो॥ ३०॥

ज्वलद्भिः - दीप्यमानैः, वदनैः - वक्त्रैः, समग्रान् - समस्तान्, लोकान् - राजलोकान्, ग्रसमानः - गिलन्, अन्तः प्रवेशयन्, समन्तात् - समन्ततः, लेलिह्यसे - तद्रुधिरसिक्तमोष्ठपुटादिकं भृशमास्वादयसि। हे विष्णो, तव उग्राः- क्रूराः. भासो- दीप्तयः, तेजोभिः, समग्रं - सकलं, जगत्,आपूर्य - संव्याप्य, प्रतपन्ति सन्तापयन्ति ॥ ३० ॥

यत एवम् अतः-

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद।
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम्॥ ३१॥

हे देववर, ते - तुभ्यं, नमः, अस्तु। मे - मह्यं, प्रसीद प्रसन्नो भव। हि - यस्मात्, तव प्रवृत्तिं - चेष्टां, न प्रजानामि - प्रकर्षेण न वेद्मि। उग्ररूपो भवान् कः अहं, आद्यं, भवन्तं - त्वां, विज्ञातुं, इच्छामि। मे - मह्यं, आख्याहि - कथय ॥ ३१ ॥

SJ-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इत्थं प्रार्थितः श्री भगवानुवाच–

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२

लोकानां - राजलोकानां क्षयं करोतीति **लोकक्षयकृत्** । **प्रवृद्धो** - वृद्धिं गतः, कालोऽहम् । **लोकान्** - राजलोकान्, **समाहर्तुं** - संहर्तुं, **इह** - अस्मिन् काले, **प्रवृत्तः** अस्मि, **प्रत्यनीकेषु** - अनीकान्यनीकानि प्रति, **ये योधाः** - योद्धारः, **अवस्थिताः** भीष्मद्रोणकर्णादयः ते **सर्वे, त्वां ऋते,** - त्वां विना, **न भविष्यन्ति** - विनङ्क्ष्यन्ति ॥ ३२ ॥

यस्मादेवं -

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥

एतस्मात्कारणात्, **त्वं** युद्धाय, **उत्तिष्ठ, शत्रून्** - दुर्योधनप्रभृतीन्, **जित्वा, यशः** - देवैरपि दुर्जया भीष्मद्रोणाद्यतिरथाः अर्जुनेन जिता, इति कीर्तिं, **लभस्व** - प्राप्नुहि **समृद्धं** - अकण्टकं, **राज्यं भुङ्क्ष्व, एते** - त्वच्छत्रवः, **पूर्वमेव, मयैव, निहताः** प्राणैर्वियोजिताः, सव्येन - वामेन करेण, सचितुं शरान् सन्धातुं शीलमस्यास्तीति सव्यसाची, तस्य सम्बुद्धिः हे **सव्यसाचिन्** अर्जुन, त्वं, योद्धुं, **निमित्तमात्रं**,[64] **भव** ॥ ३३ ॥

64. निमित्तमात्रम् - अर्जुनेन एते निर्जिता इति सार्वलौकिकव्यपदेशास्पदं भव (गू)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तदेवानुवदति—

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्।
मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्॥ ३४॥

द्रोणं च, भीष्मं च, जयद्रथं - सैन्धवं च, कर्णं, तथा, अन्यान्, योधवीरान् अपि, मया हतान्, एतान्, त्वं, निमित्तमात्रेण, जहि - संहर मा व्यथिष्ठा:- तेभ्यो भयं मा कार्षी:। अतो युध्यस्व, सपत्नान् शत्रून् रणे, जेतासि - जेष्यसि ॥ ३४॥

सञ्जय उवाच—

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमान: किरीटी।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीत: प्रणम्य॥ ३५॥

वेपमान:- कम्पमान:, किरीटी - अर्जुन: एतत्, केशवस्य, वचनं, श्रुत्वा भीतभीत: - पुन: पुन: भयाविष्टचेता: सन्, कृष्णं, भूय एव प्रणम्य - प्रह्वीभूत्वा, कृताञ्जलि: सम्पुटीकृतहस्तस्सन्, गद्गदवचनेन - समन्दवचनेन सह वर्तनं यथा तथा सगद्गदं, आह - उक्तवान्॥ ३५॥

अर्जुन उवाच -

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघा:॥ ३६॥

हे हृषीकेश, तव प्रकीर्त्या - श्रुतेन माहात्म्यकीर्तनेन, जगत्, प्रहृष्यति- प्रहर्षमुपैतीति यत्, तत् स्थाने - युक्तम्। इदमव्ययपदम्। तथा च जगत्, अनुरज्यते - अनुरागं च उपैति, इति यत्, तच्च, स्थाने - युक्तम्

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रक्षांसि राक्षसाः, भीतानि भयाविष्टानि, दिशः, द्रवन्ति - फलायन्ते, इति यत्, तच्च स्थाने - युक्तम् । सर्वे सिद्धसंघा, सिद्धानां कपिलादीनां, संघाः - समुदायाः त्वां, नमस्यन्तीति यत् तच्च, स्थाने युक्तम् । न चित्रमिति भावः ॥ ३६ ॥

तत्र हेतुमाह—

कस्माच्च ते नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७॥

हे महात्मन्, गरीयसे - गुरुतराय, यतो, ब्रह्मणः- हिरण्यगर्भस्यापि, आदिकर्त्रे - कारणाय, ते - तुभ्यं, कस्मात् - हेतोः, एते, न नमेरन् - न नमस्कुर्युः। अतो हर्षादीनां नमस्कारस्य स्थानं त्वमर्हो विषय इत्यर्थः। हे अनन्त, हे देवेश, हे जगन्निवास, त्वमक्षरं यद्वेदान्तेषु श्रूयते, किं तत्, सदसत्, सत् - विद्यमानं, असत् च यत्र नास्तीति बुद्धिः, ते उपधानभूते सदसती यस्याक्षरस्य द्वारेण सदसत् इत्युपचर्यते । परमार्थतस्तु सदसतोः परं तदक्षरं, यदक्षरं वेदविदो वदन्ति तत्त्वमेव, नान्यदिति भावः ॥ ३७ ॥

पुनरपि स्तौति—

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
वेत्ता च वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥ ३८ ॥

अनन्तानि रूपाणि यस्य तस्य सम्बुद्धिः हे अन्तरूप, त्वं जगतः स्रष्टत्वात्, आदिदेवः, त्वं पुरि शयनात् पुरुषः त्वं पुराणः - चिरन्तनः, त्वं, अस्य विश्वस्य परं प्रकृष्टं, निधानं, निधीयतेऽस्मिन् जगत् सर्वं प्रलयादौ इति निधानं - लयस्थानम् । किं च, त्वं, विश्वस्य, वेत्ता -

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वेदिता, असि - भवसि । वेद्यं - वेदनार्हं, परं धाम । पदं त्वमेव । त्वया, विश्वं, ततं - व्याप्तम् ॥ ३८ ॥

अत: सर्वदेवात्मकं त्वां प्रणमामीत्याह—

वायुर्यमोऽग्निर्वरुण: शशाङ्क: प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्व: पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥

वायु:- पवन:, त्वं, यम:, त्वं, अग्नि; त्वं, वरुण:- अपां पति:, त्वं, शशाङ्क:- चन्द्र: त्वं, प्रजापति:- पितामह: त्वं, प्रपितामह:, पितामहजनक:- त्वं, अत:, ते, तुभ्यं, सहस्रकृत्व:-सहस्रश:, नमो नम: अस्तु, पुनस्ते, नम: भूयोऽपि, ते, नम:, पुनश्च भूयोऽपीति श्रद्धाभक्त्यतिशयात् परितोषमात्मनो दर्शयतीति भाव: ॥ ३९ ॥

किञ्च –

नम: पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्व: ॥ ४० ॥

हे सर्व - सर्वात्मन्, पुरस्तात् पूर्वस्यां दिशि, ते - तुभ्यं, नम:, अस्तु, अथ, पृष्ठत: अपि ते - तुभ्यं, नम: अस्तु । सर्वत एव - सर्वासु दिक्षु सर्वत:, स्थिताय, ते - तुभ्यं, नम:, अस्तु । अनन्तं वीर्यं - सामर्थ्यं यस्य, स चासौ, अमित:, विक्रम: पराक्रम: यस्य स: अनन्तवीर्यामितविक्रम: त्वं, सर्वं - समस्तं जगत्, समाप्नोषि - सम्यक् एकेन आत्मना आप्नोषि, तत:- तस्मात्, सर्व: - सर्वस्वरूप: असि । त्वया विना भूतं न किञ्चिदस्तीयभिप्राय: ॥ ४० ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अविवेकिना मया कृता अपराधाः क्षन्तव्या इत्याह—

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥

तव इदं - इमं, लिङ्गव्यत्यय आर्षः। महिमानं अजानता मया प्रमादात्, मोहात्, प्रणयेन - चिरपरिचयेन वापि, सखा इति - प्राकृतः समानवयस्क, इति, मत्वा, हे कृष्ण, हे यादव हे सखेति, सखेति सन्धिरार्षः। प्रसभं - अभिभूय प्रसह्य, यदुक्तं, तत्, क्षामये, त्वामित्युत्तरेणान्वयः ॥ ४१ ॥

किञ्च—

यच्चापहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु।
एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥

हे अच्युत, यच्च, अपहासार्थं - परिहासप्रयोजनाय, विहार शय्यासनभोजनेषु, असत्कृतः - परिभूतः, असि- अथवा, एकः[65]- परोक्षस्सन्, असत्कृतः, असि, तथा, समक्षं[66]- प्रत्यक्षं, वा, असत्कृतः असि, तत् - सर्वमपराधजातं, अप्रमेयं - अचिन्त्यप्रभावं, त्वां, अहं, क्षामये- क्षमां कारये ॥ ४२ ॥

अचिन्त्यवैभवमेवाह—

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३ ॥

अप्रतिमः - अनुपमः, प्रभावो यस्य तस्य सम्बुद्धिः हे अप्रतिमप्रभाव,

65. एकः - सखीन् विहाय रहसि स्थितो वा त्वम् (गू)

66. अथवा तत्समक्षं - तेषां सखीनां परिहसतां सपक्षं वा (गू)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्वं, चराचरस्य, लोकस्य, प्राणिजातस्य, पिता - जनयिता, असि, अस्य - लोकस्य, पूज्य:- पूजार्ह:, असि । अस्य - लोकस्य, गुरु: - असि । अस्य - लोकस्य गरीयान् गुरुतर: पूज्यतम इत्यर्थ: । अत:, लोकत्रयेऽपि त्वत्सम:- त्वत्सदृश: नास्ति । अनेकेश्वरत्वे व्यवहारानुपपत्ते: । अन्य:, त्वत्त:, अभ्यधिक:, कुत: ॥ ४३ ॥

यत एवं –

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्यु: प्रिय: प्रियायार्हसि देव सोढुम् ॥ ४४ ॥

तस्मात् - कारणात्, कायं - शरीरं, प्रणिधाय - दण्डवन्निपात्य, प्रणम्य - नमस्कृत्य, ईशं - ईशितारं, ईड्यं - स्तुत्यं, त्वां, अहं, प्रसादये - प्रसादं कारये । हे देव, त्वं, पुत्रस्य अपराधं, पितेव, सख्यु:, अपराधं, सखेव, प्रियाया अपराधं, प्रिय इव सन्धिरार्ष: प्रियाया[67] इत्यत्र । मे, अपराधं, सोढुं क्षन्तुं, अर्हसि ॥ ४४ ॥

एवं क्षमाप्य प्रार्थयते–

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥

हे देव, अदृष्टपूर्वं विश्वरूपं, दृष्ट्वा, हृषित: - हृष्ट: अस्मि, मे, मम, भयेन मन:- प्रव्यथितं - प्रचलितं च । अत: तत् - चतुर्भुजादि-लक्षणं, रूपमेव, मे - मह्यं, दर्शय । हे देवेश, हे जगन्निवास, मे, प्रसीद - प्रसन्नो भव ॥ ४५ ॥

67. प्रियायार्हसि इत्यत्र 'इव' शब्दलोप: सन्धिश्च छान्दस: (गू)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किञ्च–

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते॥ ४६॥

पूर्वं, यथा, तथैव, किरीटिनं - किरीटवन्तं, गदिनं - गदावन्तं, तथैव, चक्रहस्तं च, त्वां, द्रष्टुं, अहं, इच्छामि - प्रार्थये। हे सहस्रबाहो, हे विश्वमूर्ते, विश्वशरीर, विश्वरूपमुपसंहृत्य तेन - किरीटादियुक्तेन, चतुर्भुजेन, चत्वारो भुजा यस्य तेन, रूपेण, उपलक्षितो भव॥ ४६॥

विश्वरूपमुपहृत्य भीतमर्जुनं प्रियवचनेनाश्वासयन् श्रीभगवानुवाच–

मया प्रसन्नेव तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम्॥ ४७॥

हे अर्जुन, मे - मम, यत् रूपं, तेजोमयं - तेजः प्रायं, विश्वं - समस्तं, अनन्तं - अन्तरहितं, आद्यं - आदौ भवं, त्वदन्येन - त्वत्तोऽन्यस्तेन, न दृष्टपूर्वम्। तत्, इदं - परं रूपंविश्वरूपं, प्रसन्नेन - अनुगृह्णता, मया आत्मयोगात्, आत्मनो - मम, योगात् - योगमाया-सामर्थ्यात्, तव, दर्शितम्॥ ४७॥

एवं मद्रूपदर्शनात्त्वं कृतार्थोऽसीत्याह–

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर॥ ४८॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे कुरुप्रवीर, एवंविधं दर्शितं, रूपं - विश्वरूपं यस्य स एवं अहं नृलोके - मनुष्यलोके, त्वदन्येन - त्वद्व्यतिरिक्तेन, भक्तिरहितेनेति यावत्। वेदयज्ञाध्ययनैः, वेदा ऋगादयः, यज्ञाः - कल्पसूत्रादियज्ञविद्याः तेषामध्ययनैः द्रष्टुं, न शक्यः। दानैरपि द्रष्टुं न शक्यः। क्रियाभिः - अग्निहोत्रादिभिश्च द्रष्टुं न शक्यः। उग्रैः, तपोभिः - कृच्छ्रचान्द्रायणादिभिश्च, द्रष्टुं, न शक्यः ॥ ४८ ॥

तव भयमोहनिवृत्त्यर्थं सौम्यरूपं दर्शयामीत्याह–

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम्।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

ईदृक् - यथा दर्शितं, घोरं, मम, इदं, रूपं, दृष्ट्वा ते - तव, व्यथा - भयं, मा च, मास्तु। विमूढभावः - विमूढचित्तता च, मास्तु। त्वं, व्यपेतभीः- विगतभयः, अत एव, प्रीतमनास्सन्, पुनः, तदेव - चतुर्भुजादिलक्षणं, इदं, मे - मम रूपं, प्रपश्य ॥ ४९ ॥

सञ्जय उवाच–

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥

वासुदेवः अर्जुनं, तथा, इति उक्त्वा, भूयः - पुनः, स्वकं- चतुर्भुजादिलक्षणं रूपं, दर्शयामास। महात्मा - श्रीकृष्णः, सौम्यवपुः- प्रसन्नदेहः, भूत्वा भीतं, एनं - अर्जुनं, पुनः, आश्वासयामास- आश्वासितवान् च ॥ ५० ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततोऽर्जुन उवाच–

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः॥ ५१॥

हे जनार्दन, सौम्यं - प्रसन्नं, मानुषं - मत्सखं, तव, इदं, रूपं दृष्ट्वा, इदानीं - अधुना, सचेताः - प्रसन्नचित्तः संवृत्तः- सञ्जातः, अस्मि। प्रकृतिं - स्वभावं, गतश्च, अस्मि॥ ५१॥

स्वकृतस्यानुग्रहस्य अतिदुर्लभत्वं श्रीभगवानुवाच–

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः॥ ५२॥

यत्, मम, रूपं, दृष्टवान्, असि, इदं, सुदुर्दर्शं - अत्यन्तं द्रष्टुमशक्यं, अस्य, रूपस्य, देवा अपि, नित्यं, दर्शनकाङ्क्षिणः, दर्शनेच्छवः, न त्वमिव दृष्टवन्तः, द्रक्ष्यन्ति वेत्याशयः॥ ५२॥

कुत इत्यत आह–

नाहं वेदैर्न तपसा न दानेन नचेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥ ५३॥

मां, यथा, दृष्टवान्, असि, एवंविधः यथादर्शितप्रकारः, अहं, वेदैः - अध्यापनप्रवचनाध्ययनेन, तपसा - श्रवणजपविषयैः, द्रष्टुं, न शक्यः दानेन, द्रष्टुं, न शक्यः इज्यया- योगेन च, द्रष्टुं, न शक्यः॥ ५३॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कथं पुनर्द्रष्टुं शक्य इत्याह—

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ ५४ ॥

हे अर्जुन, हे परन्तप, अनन्यया - अपृथग्भूतया, भगवतोऽन्यत्र पृथक् न कदाचिदपि भवति, यया सर्वैरपि करणैः वासुदेवान्यन्नोपलभ्यते सा, अनन्या, तया भक्त्या, तु, एवंविधः - विश्वरूपप्रकारः अहं, तत्त्वेन - परमार्थेन, ज्ञातुं, शास्त्रतः द्रष्टुं साक्षात्कर्तुं च, प्रवेष्टुं - मोक्षं गन्तुं च, शक्यः[68] ॥ ५४ ॥

गीताशास्त्रसारभूतार्थं निश्चित्याह—

मत्कर्मकृन्मत्परमो मद्भक्त : सङ्गवर्जितः ।
निर्वैरः सर्वभूतषु यःस मामेति पाण्डव ॥ ५५ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विश्वरूपसन्दर्शनयोगो नम एकादशोऽध्यायः ॥

हे पाण्डव, यः, मदर्थं कर्म करोतीति मत्कर्मकृत्, अहं, परमः, परमगतिर्यस्य सः मत्परमः । मामेव सर्वप्रकारैर्भजत इति मद्भक्तः । सङ्गो-

68. श्रवणादिना तत्त्वसाक्षात्कारेण मोक्षं एकीभावलक्षणं जीवन्मुक्तिं विदेहकैवल्याख्यं च गन्तुम् इत्यर्थः (भा).
श्रद्धाभक्तिभ्यां भेदप्रत्ययनाशात् परिशुद्धात्मनः निर्विशेषं ब्रह्म ज्ञातुं साक्षात्कर्तुं तदात्मना अवस्थानलक्षणं विदेहमुक्तिं च प्राप्तुं इत्यर्थः ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDP

धनपुत्रमित्रकलत्रबन्धुभोगेषु सक्तिः, तेन वर्जितः सङ्गवर्जितः। सर्वभूतेषु - निर्वैरः आत्मनोऽत्यन्तापकारप्रवृत्तेष्वपि शत्रुभावरहितः सः मां, एति। अहमेव तस्य परागतिः, नान्या गतिर्भवति ॥ ५५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य ब्रह्मानन्दसरस्वतीस्वामिशिष्य रामचन्द्रानन्द सरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां विश्वरूपसन्दर्शनयोगो नाम एकादशोऽध्यायः ॥

॥ द्वादशोऽध्यायः ॥

अतीताध्यायान्ते 'मत्कर्मकृन्मत्परमो मद्भक्त (भ.गी. ११. ४४) इति भक्तेरेव प्राधान्यमुक्तम् । तत्र तत्र च 'न हि ज्ञानेन सदृशं पवित्रम् इति । ज्ञानस्यैव प्राधान्यमुक्तम् । अतोऽनयोर्विशिष्टतरं बुभुत्सुः अर्जुन उवाच–

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥

एवं - 'मत्कर्मकृत् इत्यादिना उक्तप्रकारेण, सततयुक्ता - अनन्यशरणाः सन्तो, ये भक्ताः, त्वां, भगवन्तं वासुदेवं, पर्युपासते - ध्यायन्ति, ये चापि, अक्षरं- ब्रह्म निर्विशेषं, अव्यक्तं - करणागोचरं, पर्युपासते, तेषां - उभयेषां मध्ये, के योगवित्तमाः - अतिशयेन योगविदः ॥ १ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्री भगवानुवाच - येऽक्षरोपासकाः सम्यग्दर्शिनः ते तावत्तिष्ठन्तु । तान् प्रति यद्वक्तव्यं, तदुपरिष्टात् वक्ष्यामः। ये त्वितरे-

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

ये - भक्ताः, मयि - सर्वज्ञत्वादिविशिष्टे, परमेश्वरे, मनः, आवेश्य - समाधाय, नित्ययुक्ताः- मत्कर्मकृत् इत्याद्युक्तरीत्या सततं युक्ताः, परया, श्रद्धया, उपेताः - समन्विताः सन्तः, मां - सर्वेश्वरं, उपासते, ते, युक्ततमाः- योगितमाः, मे - मम, मताः, अभिमताः, मां - सुखेन, अचिरात्, प्राप्नुवन्ती-त्यर्थः ॥ २ ॥

तर्हीतरे किं न श्रेष्ठा इति अत आह द्वाभ्याम्-

येत्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥

ये तु, अनिर्देश्यं - व्यपदेष्टुमशक्यं, अव्यक्तं - रूपादिरहितं, सर्वत्रगं - व्योमवद् व्यापि, अचिन्त्यं - करणागोचरं, कूटस्थं - दृश्यमानगुणमन्तर्दोषं, वस्तु कूटं - कूटरूपम्। कूटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धः लोके। तथा - चाविद्याद्यनेक संसारबीजमन्तर्दोषवन्मायाऽव्याकृतादिशब्दवाच्यतया 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' 'मम माया दुरत्यया' (भ.गी. ७.२८) इत्यादौ प्रसिद्धं यत् तत् कूटं तस्मिन् कूटेऽवस्थितं कूटस्थं तदध्यक्षतया।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अथवा राशिवत् स्थितं कूटस्थं अत एव अचलं तस्मात् ध्रुवं - नित्यं, अक्षरं-ब्रह्म, पर्युपासते, ते, मामेव प्राप्नुवन्तीत्युत्तरेणान्वयः ॥ ३ ॥

किञ्च –

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥

ये तु इन्द्रियग्रामं - इन्द्रियसमुदायं, संनियम्य-सम्यगुपसंहृत्य, सर्वत्र - सर्वस्मिन् काले, इष्टानिष्टप्राप्तौ, समा - तुल्या, बुद्धिर्येषां ते समबुद्धयः । ते, सर्वभूतहिते रताः, मामेव प्राप्नुवन्ति ॥ ४ ॥

भगवत्स्वरूपाणां सतां युक्ततमत्वम् अयुक्ततमत्वं वा न वाच्यं हि। किन्तु–

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

तेषां, अव्यक्ते - अक्षरे, आसक्तं चेतो येषां तेषां, अव्यक्तासक्तचेतसां, परमार्थदर्शिनां, क्लेशः- देहाभिमानपरित्यागनिमित्तः, अधिकतरः, हि-यस्मात्, देहवद्भिः- देहाभिमानवद्भिः- अव्यक्ता, अक्षरात्मिका- गतिः दुःखं यथा तथा, अवाप्यते, अतः क्लेशः अधिकतरः ॥ ५ ॥

मद्भक्तानामनायासेनैव सिद्धिर्भवतीति द्वाभ्यामाह–

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ये तु अहमेव परो येषां ते मत्पराः सन्तः, सर्वाणि - लौकिकवैदिकानि कर्माणि मयि, सन्न्यस्य - समर्प्य, न विद्यते परमेश्वरं विना अन्यो भजनीयो यस्य, तेन अनन्येन, - एकेनैव, योगेन - समाधिना, मां ध्यायन्तः चिन्तयन्तः - उपासते, तेषां समुद्धर्ता भवामि इत्युत्तरेणान्वयः ॥ ६ ॥

यत एवं, अतः-

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७॥

हे पार्थ, मयि - परमेश्वरे, आवेशितचेतसां - समाहितचित्तानां, तेषां - उपासकानां, अहं - परमेश्वरः, दुस्तरत्वात् मृत्युयुक्तसंसार एव सागरः, तस्मात्, मृत्युसंसारसागरात् समुद्धर्ता, नचिरात् -क्षिप्र भवामि ॥ ७ ॥

यत एवं तस्मात्—

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

मयि एव - परमेश्वरे , मनः- सङ्कल्पविकल्पात्मकं आधत्स्व - स्थापय मयि बुद्धिं व्यवसायात्मिकां निवेशय। अत ऊर्ध्वं - शरीरपातादूर्ध्वं मय्येव, निवसिष्यसि-निवत्स्यसि इडागम आर्षः। निश्चयेन मदात्मना मयि वासं, करिष्यस्येव। अत्र संशयः नास्ति ॥ ८ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अत्र अनधिकारिणः सुलभोपायमाह—

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥ ९ ॥

हे **धनञ्जय, अथ मयि स्थिरं** - यथा तथा, **चित्तं, समाधातुं, न शक्नोषि** चेत्, **ततः** - पश्चात् चित्तस्य, एकस्मिन्नालम्बने सर्वतः समाहृत्य पुनः पुनः स्थापनम् अभ्यासः। तत्पूर्वको योगः समाधानलक्षणः तेन **अभ्यासयोगेन मां** - परमेश्वरं, **आप्तुं इच्छ** - प्रार्थयस्व ॥ ९ ॥

अशक्तं प्रति उक्तादपि सुकरोपायमाह—

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥ १० ॥

अभ्यासे - अभ्यासयोगेऽपि, **असमर्थः** -अशक्तः, **असि** चेत् **मदर्थं** मत्प्रीत्यर्थं, कर्म परमं - प्रधानं यस्य स **मत्कर्मपरमः, भव। मदर्थं कर्माणि कुर्वन्नपि,** चित्तशुद्धियोगज्ञानप्राप्तिद्वारेण, **सिद्धिं** - मोक्षं, **अवाप्स्यसि** ॥ १० ॥

उक्तनिष्ठायाम् अपि अशक्तस्य पक्षान्तरमाह—

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

अथ एतत् - मत्कर्मपरमत्वमपि, **कर्तुं, अशक्तः, असि** चेत्, **मद्योगं,** मयि क्रियमाणानि कर्माणि सन्न्यस्य यत्करणं तेषामनुष्ठानं, सः: मद्योग तं

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

समाश्रितः सन्, ततः **सर्वकर्मफलत्यागं**, सर्वेषां कर्मणां फलपरित्यागं, **यतात्मवान्** - यतचित्तस्सन्, **कुरु** ॥ ११ ॥

इदानीं सर्वकर्मफलत्यागं स्तौति—

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागः त्यागाच्छन्तिरनन्तरम् ॥ १२ ॥

अभ्यासात् - सम्यग्ज्ञानरहितात्, युक्तिसहितोपदेशपूर्वकं, **ज्ञानं, श्रेयः** प्रशस्यतरं **हि। ज्ञानात्** ज्ञानपूर्वं **ध्यानं, विशिष्यते।** ज्ञानवतो ध्यानादपि, **कर्मफलत्यागो विशिष्यते** इत्यनुषज्यते। एवं, **कर्मफलत्यागात्, अनन्तरं, शान्तिः,** सहेतुकस्य संसारस्य उपशमः स्यात् न तु कालान्तरमपेक्षते। यस्य कर्मणि प्रवृत्तस्य अज्ञस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्वकर्मफलत्यागः श्रेयस्साधनमुपदिष्टं न प्रथममेव। अतश्च श्रेयो हि ज्ञानमित्युत्तरोत्तर विशिष्टत्वोपदेशेन सर्वकर्मफलात्यागः स्तूयते । सम्पन्नसाधनानुष्ठानाशक्तौ अनुष्ठेयत्वेन श्रुतत्वात् । 'केन धर्मेण स्तुतित्वं' (बृ.उ.४.४.७) 'यदा सर्वे प्रमुच्यन्त' इति सर्वकामप्रहाणात् अमृतत्वमुक्तं तत्प्रसिद्धम् । सर्वे कामाश्च श्रौतस्मार्तकर्मफलानि । तत्त्यागेन च विदुषो ज्ञाननिष्ठस्यानन्तरमेव शान्तिरिति सर्वकर्मत्यागसामान्यमन्यकर्मफलत्यागस्याप्यस्तीति तत्सामान्यात् कर्मफल-त्यागस्तुतिरियं प्ररोचनार्था । यथा अगस्त्येन ब्राह्मणेन समुद्रः पीत इति इदानीन्तना ब्राह्मणा अपि ब्राह्मणत्वसामान्यात् स्तूयन्ते। एवं कर्मफलत्यागात् कर्मयोगस्य श्रेयस्साधनत्वमभिमतम् । अत्र चात्मेश्वरभेदमाश्रित्य विश्वरूपे

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ईश्वरे चेतस्समाधानलक्षणो योग: उक्त: । ईश्वरार्थं कर्मानुष्ठानादि च । 'अथैतदप्यशक्तोऽसि' इत्यज्ञानकार्यसूचनात् न अभेददर्शिनोऽक्षरोपासकस्य कर्मयोग उपपद्यत इति दर्शयति । तथा कर्मयोगिनोऽक्षरोपासनानुपपत्तिं दर्शयति भगवान् 'प्राप्नुवन्ति ते मामेव' इति । अक्षरोपासकानां कैवल्यप्राप्तौ स्वातन्त्र्य-मुक्त्वा इतरेषां पारतन्त्र्यमीश्वराधीनतां दर्शितवान् 'तेषामहं समुद्धर्ता' इति यदि हीश्वरस्यात्मभूतास्ते मता: अभेददर्शित्वात् अक्षरस्वरूपा एव ते इति समुद्धरणकर्मवचनं तान्प्रत्यपेशलं स्यात् । यस्माच्च अर्जुनस्य अत्यन्त-मेव हितैषी भगवान् तस्य सम्यग्दर्शनेनान्वितं कर्मयोगं भेददृष्टिमन्त-मेवोपदिशति । न चात्मानमीश्वरं प्रमाणतो बुद्ध्वा कस्यचिद्गुणभावं जिगमिषति कश्चिद्विरोधात् ॥ १२ ॥

तस्मादक्षरोपासकानां सम्यग्दर्शनानिष्ठानां साक्षादमृतत्वकारणभूतान् धर्मान् वक्ष्यामीत्याह—

अद्वेष्टा सर्वभूतानां मैत्र: करुण एव च ।
निर्ममो निरहङ्कार: समदु:खसुख: क्षमी ॥ १३ ॥

य:, सर्वभूतानां, अद्वेष्टा - दु:खहेतुमपि न द्वेष्टि, सर्वाणि भूतानि आत्मत्वेन हि पश्यतीत्यर्थ:। मैत्र: - सर्वभूतेषु मैत्रीयुक्त: करुण:- करुणवान् अर्श - आदित्वात् अच् । निर्मम:- निर्गतममकार:, निरहङ्कार: - निर्गता-हम्प्रत्यय:, समदु:खसुख, समे दु:खसुखे - द्वेषरागयो: अप्रवर्तके यस्य स: । क्षमी क्षमावान्, अधिक्षिप्तस्ताडितो वा निर्विकार: इत्यर्थ: । स, मे प्रिय इत्युत्तरेण सबन्ध: ॥ १३ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किञ्च -

सन्तुष्टःसततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥

यदृच्छोपगतेन येन केनापि देहधारणमात्रद्रव्येण सततं सन्तुष्टः योगी - प्रकृतियुक्तात्मानुसन्धानपरःयतात्मा नियमितमनोवृत्तिः; दृढनिश्चयः - दृढः स्थितः निश्चयः यस्य आत्मतत्वविषये । मय्यर्पितमनोबुद्धिः भगवान् वासुदेव एव अनभिसंहितफलेनानुष्ठितेन कर्मणा आराध्यते, आराधितश्च ममात्मापरोक्षं साधयिष्य तीत्यर्पिते मनोबुद्धी येन सः। य एवम्भूतो मद्भक्तः स मे प्रियः ॥ १४ ॥

यत्तु 'प्रियो हि ज्ञानिनोऽत्यर्थमहम्' (भ.गी.७.१०) इति पूर्वं सप्तमेऽध्याये सूचितं तदिह प्रपञ्चयन्नाह –

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥

लोको जनः, यस्मात् योगिनः नोद्विजते - उद्वेगं न गच्छति, यो योगी - लोकात् - जनात् - नोद्विजते । यो - योगी हर्षामर्षभयोद्वेगैः हर्षः - प्रियलाभे उत्साहः अमर्षः - असहिष्णुता, भयं - भीतिः, उद्वेगः - भयादिनिमित्तश्चित्तक्षोभः, एतैः मुक्तः स, च, मे प्रियः ॥ १५ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किं च–

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥

अनपेक्षः आत्मव्यतिरिक्ते कृत्स्ने वस्तुनि निःस्पृहः, शुचिः - शुद्धः शास्त्रविहितद्रव्यवर्धितकाय इति यावत्। दक्षः प्रत्युत्पन्नेषु कार्येषु सद्यो यथावत् प्रतिपत्तुं समर्थः, उदासीनः- पक्षपातरहितः, गतव्यथः- गतभयः । सर्वाणि कर्माणि सर्वारम्भास्तान् परित्यक्तुं शीलमस्यास्तीति सर्वारम्भपरित्यागी। एवं यो मद्भक्तः, सः, मे प्रियः ॥ १६ ॥

किञ्च–

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७॥

यः इष्टप्राप्तौ, न हृष्यति, अनिष्टप्राप्तौ, न द्वेष्टि, इष्टवियोगे सति, न शोचति, अप्राप्तमर्थं न काङ्क्षति, शुभाशुभपरित्यागी पापवत् पुण्यस्याप्यनुबन्धहेतुत्वाविशेषात् उभयपरित्यागी, य एवम्भूतो भक्तिमान्, स मे प्रियः ॥ १७ ॥

किं च–

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १८ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शत्रौ च, मित्रे, च, समः तथा, मानापमानयोस्समः, शीतोष्णसुख दुःखेषु, शीतोष्णे च सुखदुःखे च शीतोष्णसुखदुःखानि, तेषु, समः सर्वत्र सङ्गवर्जितश्च, मे प्रिय इत्युत्तरेणान्वयः ॥ १८ ॥

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥ १९ ॥

तुल्ये निन्दास्तुती यस्य सः तुल्यनिन्दास्तुतिः । मौनी - नियमितवाक्, येन केनचित् - शरीरस्थितिमात्रेण, सन्तुष्टः तथा चोक्तम्—

'येन केनचिदाच्छन्नो येन केनचिदाशितः ।
यत्र क्वचन शायी स्यात्तं देवा ब्राह्मणं विदुः ॥" (म.भा.सभापर्व-२४५.१२)

इति । न विद्यते निकेतो - निवासो यस्य सः अनिकेतः। परमार्थवस्तुनि,स्थिरा मतिर्यस्य सः स्थिरमतिः। भक्तिमान् नरः मे प्रियः ॥ १९ ॥

उक्तं धर्मजातं सफलमुपसंहरति—

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे भगवद्भक्तियोगो नाम द्वादशोऽध्यायः ॥

ये तु, अहमेव परमः गतिः येषां ते मत्परमाः सन्तः, यथोक्तं, इदं, धर्म्यं, च तदमृतं अमृतहेतुत्वात् धर्म्यामृतं श्रद्दधानाः विश्वासं कुर्वन्तः पर्युपासते -

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अनुतिष्ठन्ति, ते भक्ता, मे अतीव - अतितरां, प्रियाः। इदं धर्म्यामृतं विष्णोः प्रियं धाम जिगमिषुणा यत्नतोऽनुष्ठेयमिति भावः ॥ २० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य ब्रह्मानन्दसरस्वतीस्वामिशिष्य रामचन्द्रानन्दरस्वती विरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां भगवद्भक्तियोगो नाम द्वादशोऽध्यायः ॥

॥ त्रयोदशोऽध्यायः ॥

अतीताध्यायान्ते 'भक्तास्तेऽतीव मे प्रियाः' (भ.गी. १२. २०) इत्युक्त्वा भूयोऽपि सप्तमाध्यायसूचितप्रकृतिद्वयमत्र क्षेत्रक्षेत्रज्ञशब्दवाच्यं निरूपयिष्यन्

श्रीभगवानुवाच –

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः ॥ १ ॥

हे कौन्तेय, इदं शरीरं संसारस्य प्रोहभूमित्वात् क्षेत्रमिति, अभिधीयते कथ्यते। यः एतत् क्षेत्रं, वेत्ति - विजानाति, आपादतलमस्तकं ज्ञानेन विषयीकरोतीत्यर्थः। तौ क्षेत्रक्षेत्रज्ञौ, विदन्तीति तद्विदः। तं वेदितारं, नन्वेवमुक्तौ क्षेत्रक्षेत्रज्ञौ एतावन्मात्रेण ज्ञानेन ज्ञातव्यौ किम् इत्याशङ्क्य नेत्याह–

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे भारत, सर्वक्षेत्रेषु, क्षेत्रज्ञं - यथोक्तलक्षणं चापि मां - परमेश्वरं, विद्धि। य:- क्षेत्रज्ञ: ब्रह्मादिस्तम्बपर्यन्तानेकक्षेत्रोपाधिप्रविभक्त: तं निरस्तसर्वोपाधिभेदं सदसदादि-शब्दप्रत्ययागोचरं जानीहीत्यभिप्राय:। क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत् तत् ज्ञानं सम्यग्ज्ञानं मम इति मे - ईश्वरस्य मतम् अभिप्राय:।

ननु सर्वक्षेत्रेष्वेक एवेश्वर: नान्य: तद्व्यतिरिक्तो भोक्ता। तत ईश्वरस्य संसारित्वं प्राप्तम्। ईश्वरव्यतिरेकेण वा संसारिणोऽन्यस्य अभावात् संसाराभावप्रसङ्ग:। तच्चोभयमनिष्टं, बन्धमोक्षतद्धेतुशास्त्रानर्थक्यप्रसङ्गात्। प्रत्यक्षादिप्रमाणविरोधाच्च। प्रत्यक्षेण तावत्सुखतद्धेतुलक्षण: संसार उपलभ्यते। जगद्वैचित्र्योपलब्धेश्च धर्माधर्मनिमित्त: संसारोऽनुमीयते। सर्वमेतदनुपपन्नम् आत्मेश्वरैकत्वे न ज्ञानाज्ञानयोरन्यत्वेन उपपत्ते:। 'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता' (क. ३.२.४) तदा अनयो: र्विद्याविद्ययो: श्रेयश्च प्रेयश्च फलभेदो निर्दिष्ट:। तत्र विद्याविषय: श्रेय:। अविद्याकार्यं प्रेय:। तथा च व्यास: 'द्वाविमौ पन्थानौ इति' इमौ द्वावेव पन्थानौ इति च। इह च द्वे निष्ठे उक्ते। अविद्या च सह कार्येण हातव्येति श्रुतिस्मृतिभ्योऽवगम्यते। श्रुतयस्तावत् - 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टि: (के.उ. २.५) तमेवं विद्वानमृत इह भवति नान्य: पन्था विद्यतेऽयनाय। अविदुषस्तु - अथ तस्य भयं भवति। (तै.उ.२.६) (तै. आ. ३.१.३) 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति (तै. उ.२.२) 'अविद्यायामन्तरे वर्तमाना: (क. उ.२.५) अन्योऽसावन्योऽ-

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हमस्मीति न स वेद यथा पशुरेवं स देवानाम्' (बृ. उ. १.४.१०) आत्मविद्यस्स इदगँ सर्वं भवति (बृ.उ.३.४. १०) यदा चर्मवदाकाशम् (श्वे.उ.३.२०) इत्याद्या: सहस्रश:। स्मृतयश्च–

'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव:' (भ.गी.५.१५) 'इहैव तैर्जित: सर्गो येषां साम्ये स्थितं मन:' (भ.गी.५.१९) 'समं पश्यन् हि सर्वत्र' (भ.गी.१३.२८) इत्याद्या:। तथा च देहादिषु आत्मबुद्धि: विद्वान् रागद्वेषादियुक्तो धर्माधर्मानुष्ठानकृत् जायत एवेत्यवगम्यते । देहादिव्यतिरिक्तात्मदर्शिनो रागद्वेषादिप्रहाणात् तदपेक्षं धर्माधर्मप्रवृत्त्युपशमवान् मुच्यत इति न केनचित् प्रत्याख्यातुं शक्यम् ॥ २॥

इदं शरीरम् इत्यादि श्लोकोपदिष्टक्षेत्राध्यायार्थस्य सङ्ग्रहश्लोकोऽयमुपन्यस्यते–

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे श्रृणु ॥ ३॥

यच्च इदं निर्दिष्टं क्षेत्रं, तत् **यादृक्** -स्वकै: धर्मै: यादृशं च । **यद्विकारि** च, यो विकारो यस्य तत् । **यत:** यस्मात्कारणात्, यत् कार्यमुत्पद्यत इति शेष: य: स च क्षेत्रज्ञ: । ये प्रभावा उपाधिकृता: शक्तयो यस्य **यत्प्रभाव:** । **तत्** - क्षेत्रक्षेत्रज्ञयाथात्म्यं, **मे** मत्त:, पञ्चम्यर्थे षष्ठी । **समासेन** - संक्षेपेण, **श्रृणु** । श्रुत्वा अवधारयेत्यर्थ: ॥ ३ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रोतृबुद्धिप्ररोचनार्थं विवक्षितं स्तौति—

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥ ४॥

तत् क्षेत्रक्षेत्रज्ञयोः याथात्म्यं ऋषिभिः - वसिष्ठपराशरादिभिः, बहुधा - बहुप्रकारं, गीतं - कथितं। तदुक्तं पराशरेण—

'आत्मा शुद्धोऽक्षरश्शान्तो निर्गुणः प्रकृतेः परः' इत्यादि। विविधैः नानाप्रकारैः, छन्दोभिः छन्दांसि ऋगादीनि तैः विवेकतः गीतम् किञ्च ब्रह्मसूत्रपदैश्च - ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते - गम्यते ज्ञायते, ब्रह्म इति तानि पदानि उच्यन्ते। तैरेव च क्षेत्रक्षेत्रज्ञयोः याथात्म्यं गीतम् इति अनुवर्ततेआत्मेत्येव उपासीत (बृ.उ.३.४.७) इत्यादिभिः ब्रह्मसूत्रपदैः आत्माज्ञायते किञ्च हेतुमद्भिः सदेव सोम्येदमग्र आसीत्, कथमसतः सज्जायेतेति 'को ह्येवान्यात्कः प्राण्यात्' इत्यादियुक्तिमद्भिः विनिश्चितैः उपक्रमोपसंहारैरेकवाक्यतया असन्दिग्धार्थैः। ब्रह्म सूच्यते एभिः इति ब्रह्मसूत्राणि। 'यतो वा इमानि भूतानि जायन्ते' इत्यादि वाक्यानि। पद्यते ज्ञायते एभिरिति पदानि, 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादीनि। तैः ब्रह्मसूत्रपदैश्चैव। यद्वा 'अथातो ब्रह्मजिज्ञासेत्यादिब्रह्मसूत्राणि, तान्येव पदानि, तैश्च गीतम्॥ ४॥

एवं स्तुत्वा श्रोतारमभिमुखीकृत्य क्षेत्रस्वरूपमाह द्वाभ्याम्—

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः॥ ५॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

महान्तानि च तानि भूतानि महाभूतानि सूक्ष्माणि । अहङ्कारो महाभूतानां कारणम् । बुद्धिः अहङ्कारकारणम् अध्यवसायलक्षणा महत्तत्वमित्यर्थः। न व्यक्तमव्यक्तं बुद्धिकारणम् अव्याकृतम् ईश्वरशक्तिः 'मम माया दुरत्यया' (भ.गी.७.१४) एवशब्दः प्रकृत्यवधारणार्थः। एतावत्येव अष्टधाभिन्नाप्रकृतिः 'च' शब्दः समुच्चयार्थः । दश इन्द्रियाणि ज्ञानेन्द्रियाणि श्रोत्रादीनि पञ्च । कर्मेन्द्रियाणि च वागादीनि पञ्च । एकमिन्द्रियं मनः । पञ्च इन्द्रियगाचराः शब्दादिविषयाः । एतानि चतुर्विंशतितत्त्वानि[69] ॥ ५॥

किञ्च–

इच्छाद्वेषःसुखं दुःखं संधातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥

इच्छा च द्वेषश्च सुखं च दुःखं च, संधातः शरीरं, चेतना ज्ञानात्मिका मनोवृत्तिः। धृतिः धैर्य सविकारं विकारसहितमेतत् क्षेत्रम् । समासेन संक्षेपेण, उदाहृतं - उक्तम्[70] ॥ ६ ॥

एवं क्षेत्रलक्षणमुक्त्वा आत्मज्ञानगुणोपादेयानाह–

अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥

69. अनेन पाञ्चभौतिको देहः इन्द्रियाणि अहंकारो वा आत्मा इति मतानि निरस्तानि । तेषां क्षेत्रान्तर्भूतत्वेन क्षेत्रज्ञत्वासंभवात् इति दर्शितम् (ब्र)

70. एतन्महाभूतादिधृत्यन्तं क्षेत्रमिति संक्षेपेण तुभ्यं मया उक्तम् । कथमेतस्य क्षेत्रत्वम् इति आशङ्कायां 'सर्वकारम्' इति हेतुगर्भं विशेषणम् । विकारवत एव लोके क्षेत्रज्ञत्वदर्शनात् इति भावः ॥ (ब्र)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मानित्वम् आत्मनः श्लाघनं तदभावः अमानित्वम्। स्वधर्म-प्रकटीकरणं दम्भित्वं तदभावः अदम्भित्वम्। अहिंसा - प्राणिनाम-पीडनं क्षान्तिः- परापवक्रादप्राप्तौ अविक्रिया। आर्जवम् अवक्रत्वम्। आचार्यस्य - मोक्षमार्गोपदेष्टुः उपासनं - सेवनं, आचार्योपासनम्। शौचं शुचित्वम्।

तदुक्तम्—

'शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा।
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम्॥ (द.स्मृ. ५.३)॥

इति। स्थैर्यं - स्थिरभावः, मोक्षमार्ग एव कृतव्यवसायित्वं, आत्मनः, कार्यकारणसंघातस्य, विनिग्रहः सन्मार्गे निरोधः आत्मविनिग्रहः[71]॥७॥

किञ्च-

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥८॥

इन्द्रियार्थेषु शब्दादिषु दृष्टादृष्टेषु विषयभोगेषु इत्यर्थः। वैराग्यं च, अनहङ्कार एव - अहङ्काराराहित्यमेव। जन्ममृत्युजराव्याधिदुः खदोषानु-दर्शनं जन्म च मृत्युश्च जरा च व्याधयश्च दुःखानि च तेषु दोषाणामनुदर्शनम् आलोचनम्। अयं भावः— जन्मनि योनिद्वारा निस्सरणं दोषः। मृत्यौ स एव दोषः। जरायां प्रज्ञाशक्तिनिरोधो दोषः[72]। व्याधिषु शिरोरोगादिषु दोषः।

71. आत्मनः देहेन्द्रियादेः मोक्षसाधनप्रातिकूल्यस्वभावनिरोधनेन तदनुकूलतया व्यवस्थापनम्। 'एतत् ज्ञानम् इति प्रोक्तम्' इति पञ्चमेन अन्वयः (ब्र.)

72. सर्वमर्मच्छेदनरूपः दोषः तस्य अनुदर्शनम् पुनः पुनः आलोचनम् (ब्र.)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दुःखेष्वाध्यात्मिकादिषु दोषः। एवं दोषालोचने विषयभोगेषु वैराग्यं जायते[73] ॥ ८॥

किञ्च—

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥

पुत्रदारगृहादिषु[74] असक्तिः[75] - प्रीतित्यागः, अत एव अभिष्वङ्गः - सक्तिविशेषः पुत्रादीनां सुखं दुःखं वा आत्मन्यारोपणं, तदभावः अनभिष्वङ्गः[76]। इष्टानिष्टोपपत्तिषु इष्टानां चानिष्टानां, च उपपत्तिषु - प्राप्तिषु, नित्यं - सदा - समचित्तत्वं - तुल्यचित्तता[77] ॥ ९ ॥

किञ्च—

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥

मयि च - ईश्वरे, अनन्ययोगेन - अपृथक्समाधिना, 'वासुदेवात्परो नास्ति, स एव मे गतिः' इति निश्चयेन इत्यर्थः। अव्यभिचारिणी - निश्चला,

73. ततः प्रत्यगात्मनि, प्रवृत्तिः करणानाम् आत्मदर्शनाय।
74. 'पुत्रदारगृहादिषु' इत्यत्र आदिग्रहणात् अन्येष्वपि भृत्यादिषु सर्वेषु स्नेहविषयेषु इत्यर्थः (गू)
75. ''मम इदम्' इति एतावन्मात्रेण प्रीतिः सक्तिः। तद्राहित्यम् असक्तिः(गू)
76. 'अहमेव अयम्' इति अनन्यत्वभावनया प्रीत्यतिशयः अभिष्वङ्गः तद्राहित्यम् अनभिष्वङ्गः (गू)
77. इष्टोपपत्तिषु हर्षाभावः, अनिष्टोपपत्तिषु विषादाभावः (गू).

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भक्तिः- भजनं, विविक्तं - शुद्धं, चित्तप्रसादकरं, देशं सेवितुं शीलमस्यास्तीति विविक्तदेशसेवी, तस्य भावः विविक्तदेशसेवित्वम्। जनसंसदि, जनानां पामराणां, संसत् सभा, तस्यां, अरतिः विरतिः ॥ १० ॥

किञ्च—

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तं अज्ञानं यदतोऽन्यथा ॥ ११ ॥

आत्मानमधिकृत्य क्रियमाणं ज्ञानं आत्मादिविषयज्ञानम् अध्यात्मज्ञानम्। तस्मिन्नित्यत्वम् नित्यस्य भावः अध्यात्मज्ञान-नित्यत्वम्।[78] तत्वज्ञानार्थदर्शनं, तत्वज्ञानस्यार्थो मोक्षः तस्य दर्शनम् आलोचनम्। ज्ञानफलालोचने हि ज्ञानसाधनानुष्ठाने प्रवृत्तिर्भवतीति भावः। एतत् अमानित्वादिज्ञानसाधनत्वात् प्रत्येकं ज्ञानम् इति प्रोक्तम्। अतः अमानित्वादेः, अन्यथा - विपर्येण यद् - मानित्वदम्भित्वादि, तत् अज्ञानं त्याज्यतया प्रोक्तमिति भावः ॥ ११ ॥

यथोक्तेन ज्ञानेन ज्ञेयं किम् इत्याकाङ्क्षायामाह—

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

यद् ज्ञेयं तत् प्रवक्ष्यामि - यद् ज्ञेयं ज्ञात्वा, अमृतं, कैवल्यं, अश्नुते। एवं वक्ष्यमाणस्य फलं निर्दिश्य श्रोतारमभिमुखीकृत्याह - परं निरतिशयं,

78. तत्रैव निष्ठावत्त्वम् (गू.)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ब्रह्म, आदिः यस्य नास्तीति अनादिमत् । तद्ब्रह्म, सन्न भवतीति न सत् असन्न भवतीति न असत् । विधिमुखेन प्रमाणस्य विषयः सच्छब्देनोच्यते, निषेधस्य विषयस्त्वसच्छब्देनोच्यते । इदं तु तदुभयविलक्षणं[79] अतीन्द्रियत्वेन शब्दैकप्रमाणत्वादिति भावः ॥ १२ ॥

ज्ञेयस्यासत्त्वामाशङ्क्य सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वं प्रतिपाद यन्नाह –

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतश्श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥

तद् - ब्रह्म, सर्वतः पाणयः पादाश्च यस्य तत् सर्वतः पाणिपादं, सर्वतोऽक्षिशिरोमुखानि यस्य तत् सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतयः श्रोत्राणि अस्य सन्तीति सर्वतश्श्रुतिमत् । लोके - प्राणिनिकाये, सर्वं, आवृत्य - व्याप्य तिष्ठति इति सर्वप्राणिपाणिपादादिभिरुपाधिभिः सर्व-व्यवहारास्पदत्वे क्षत्रेज्ञोऽस्तीति भावः ॥ १३ ॥

किञ्च–

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४ ॥

तद्ब्रह्म, सर्वेन्द्रियगुणाभासं, सर्वेन्द्रियाणाम् अन्तःकरणज्ञानेन्द्रिय-कर्मेन्द्रियाणां गुणैः - सङ्कल्पशब्दस्पर्शवचनादिव्यापारैः अवभासत इति

79. निर्विशेषत्वात् स्वप्रकाशत्वात् चैतन्यरूपत्वाच्च ।

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आभासं सर्वेन्द्रियव्यापारै: व्यापृतम् इत्यर्थ: । ध्यायतीव लेलायतीव (बृ. उ.४.३.७) इति श्रुते: सर्वेन्द्रियविवर्जितं - सर्वकरणरहितं, तथा च श्रुति: - 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षु स शृणोत्यकर्ण:' (श्वे.उ. ३.१९) इति । **असक्तं** - सर्वश्लेषवर्जितं, सर्वं विभर्तीति सर्वभृच्चैव । सर्वत्र सद्बुद्ध्यनुगमात् सर्वं सदास्पदं हि । मृगतृष्णिकादयोऽपि निरास्पदा न भवन्ति हि । अत: **सर्वभृत् निर्गुणं** - सत्त्वादिगुणरहितं सत्, **गुणभोक्तृ**, गुणानां शब्दादिद्वारेण दु:खमोहाकारेण परिणतानां सत्वरजस्तमसां, भोक्तृ उपलब्धृ एव ॥ १४ ॥

बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्॥ १५॥

भूतानां - चराचराणां **बहिश्चान्तश्च** तद्ब्रह्म, सुवर्णमिव कटकमकुटादीनां, **अचरं** - स्थावरं, **चरं** जङ्गमं च, तदेव । कार्यस्य कारणात्मकत्वात् । तथापि, **सूक्ष्मत्वात्** - अरूपत्वात् तत् ब्रह्म, **अविज्ञेयं**- अविदुषां ज्ञातुमशक्यं तद्ब्रह्म, अविदुषां योजनलक्षान्तरितमिव **दूरस्थं च**। विदुषां पुन: प्रत्यगात्मत्वात् **अन्तिके** सन्निधौ स्थितं इत्यर्थ:। तथा च श्रुति: तदेजति तन्नेजति तद्दूरे तद्वदन्तिके । तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यत: ॥ (ई.उ.५) इति । **एजति** - चलति, नेजति न चलति, तत् अन्तिक इतिच्छेद:॥ १५ ॥

किञ्च -

अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥ १६॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत्तद् ब्रह्म, अविभक्तं - व्योमवदपरिच्छिन्नं सत्, भूतेषु - सर्वप्राणिषु, विभक्तमिव - उपाधिभेदात्परिच्छिन्नमिव स्थितं, तत् ब्रह्म सृष्टिकाले, प्रभविष्णु - प्रभवनशीलं, स्थितिकाले, भूतभर्तृ - सर्वप्राणिपोषकं च, प्रलयकाले ग्रसिष्णु - ग्रसनशीलं च इति ज्ञेयम्। कार्यकारणरूपेणावस्थितं ब्रह्मैवेत्याशयः ॥ १६ ॥

किञ्च—

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७॥

तत् ब्रह्म ज्योतिषां - सूर्यादीनामपि, ज्योतिः- प्रकाशकं, 'येन सूर्यस्तपति तेजसेद्धः' तस्य भासा सर्वमिदं विभाति' इति श्रुतेः (मु.उ.२-२-२०) यदादित्यगतं तेजः' (भ.गी.१५-१२) इत्यादिस्मृतेश्च। अतः तमसोऽज्ञानात् परम् असंसृष्टमुच्यते । 'आदित्यवर्णं तमसः परस्तात्' (श्वे.उ.३.८) इति श्रुतेः । तदेव ज्ञानं बुद्धिवृत्तौ अभिव्यक्तं तदेव ज्ञेयं रूपाद्याकारेण । ज्ञानगम्यं च, ज्ञानेन अमानित्वादिलक्षणेन ज्ञानसाधनेन प्राप्यम् इत्यर्थः । ज्ञानगम्यं विशिनष्टि। सर्वस्यप्राणिजातस्य, हृदि - बुद्धौ विष्ठितं - विशेषेण स्थितम्[80] ॥ १७ ॥

यथोक्तार्थोपसंहारार्थोऽयं श्लोक आरभ्यते—

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८॥

80. अप्रच्युतस्वरूपेण नियन्तृतया इति शेषः।

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इति - एवं, क्षेत्रं च ज्ञानं च तथा ज्ञेयं च, समासतः सङ्क्षेपत; मया उक्तम्, एतावान् हि सर्वो वेदार्थो गीतार्थश्च उपसंहृत्योक्त इत्यर्थः। मद्भक्तः, मयि - परमेश्वरे भक्तः - समर्पितसर्वात्मभावः, एतत् - यथोक्तं, विज्ञाय, मद्भावाय, मद्भावः परमात्मभावः तस्मै, उपपद्यते मोक्षं गच्छतीत्यर्थः ॥ १८ ॥

एवं क्षेत्रज्ञलक्षणं विविच्य प्रकृतिपुरुषयोः संसारहेतुत्वं कथयति—

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥ १९ ॥

उभावपि, प्रकृतिं - अपरप्रकृतिं, क्षेत्रमित्यर्थः। पुरुषं परप्रकृतिरूपं चैव क्षेत्रज्ञमित्यर्थः। न आदिर्ययोः अनादी - नित्यौ - ईश्वरस्य नित्यत्वात् प्रकृतिपुरुषयोरपि नित्यत्वं युक्तमिति तात्पर्यं विद्धि। विकारांश्च बुद्ध्यादिदेहपर्यन्तान् गुणांश्च सुखदुःखमोहादीन्, प्रकृतिसम्भवानेव, प्रकृतिः त्रिगुणात्मिका माया, तस्याः सम्भवो येषां तान्, प्रकृतिपरिणामा-नित्यर्थः। विद्धि - जानीहि ॥ १९ ॥

प्रकृतिसम्भवा विकारा गुणाश्च के इत्यत्राह—

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषःसुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रकृतिः - कर्त्री, **कार्यकारणकर्तृत्वे**, कार्यं - शरीरं, कारणानि - सुखदुः खादिसाधनानीन्द्रियाणि, तेषां, कर्तृत्वं - उत्पादकत्वं, तस्मिन् तदाकारपरिणामे, प्रकृतिः हेतुरुच्यते कपिलादिभिः । **पुरुषो** - जीवः तत्कृतसुखदुःखानां, **भोक्तृत्वे**, हेतुः उच्यते। अयं भावः - यद्यप्यचेतनायाः प्रकृतेः स्वतः कर्तृत्वं न सम्भवति, तथा पुरुषस्याप्यविकारिणो भोक्तृत्वं न सम्भवति । तथापि कर्तृत्वं नाम क्रियानिर्वर्तकत्वं अचेतनस्यापि चेतनादृष्टवशात् (चैतन्याधिष्ठितत्वात्) सम्भवतीति । यथा वह्नेरूर्ध्वज्वलनं वायोः तिर्यग्गमनं, वत्सादृष्टवशात् स्तन्यपयसः क्षरणमित्यादीनि । अतः पुरुषसन्निधानात्प्रकृतेः कर्तृत्वमुच्यते । भोक्तृत्वं तु सुखदुःखसंवेदनम् । तच्चेतनधर्म एवेति प्रकृतिसन्निधानात्पुरुषस्य भोक्तृत्वमुच्यत इति ॥ २० ॥

पुरुषः प्रकृतिस्थोहि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥

हि - यस्मात्, **पुरुषः**, **प्रकृतौ** - अविद्यायां[81] तिष्ठतीति प्रकृतिस्थः सन्, प्रकृतिं आत्मत्वेन गत इत्यर्थः। **प्रकृतिजान्** - प्रकृतितो जातान् सुखदुःखमोहाकाराभिव्यक्तान्, **गुणान् भुङ्क्ते** - सुखी दुःखी मूढः पण्डितोऽहमित्याद्युपलभ्यते । **अस्य पुरुषस्य**, **गुणसङ्गः** गुणेषु सुख-दुःखादिषु, सङ्गः, सदसद्योनिजन्मसु, सतां देवादीनां च, असतां - तिर्यगादीनां, योनिषु, जन्मानि - जननानि, तेषु विषयभूतेषु, **कारणं** हेतुः अस्मिन्नर्थे प्रकृतिरपि स यथाकामो भवति तत्कर्ता भवतीति ॥ २१ ॥

81 कार्यकरणरूपेण परिणतायाम् इति शेषः ।

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तदित्थं प्रकृत्यविवेकात् पुरुषस्य संसार: न तु स्वरूपत इति तात्पर्येण तस्य स्वरूपमाह–

उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वर:।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुष: पर:॥ २२॥

पर: प्रकृते: पर: पुरुष: अस्मिन् देहे वर्तमानस्सन्, उपद्रष्टा- स्वयमव्यापृतस्सन्, समीपस्थो द्रष्टेति साक्षीत्यर्थ:। अनुमन्ता- अनुमोदित: - सन्निधिमात्रेणानुग्राहक: इति च। तथाच श्रुति: - 'साक्षी चेता केवलो निर्गुणश्च' (श्वे.उ. ६.११) बिभर्ति इति भर्ता धारक इति च। भुनक्तीति भोक्ता। पालक इति च। महांश्चासावीश्वरश्चेति महेश्वर: ब्रह्मादीनामधिपतिरिति च। अविद्यया प्रकल्पितानां अव्यक्तान्तानां देहादीनां प्रत्यगात्मत्वेन परम उपद्रष्टृत्वादिलक्षण आत्मा परमात्मेति च , उक्त: - कथित: ॥ २२ ॥

इत्थं प्रकृतिपुरुषौ विविच्य तज्ज्ञातारं स्तौति–

य एवं वेत्ति पुरुषं प्रकृतिं च गुणै: सह।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥ २३॥

य, एवं - उपद्रष्टृत्वादिरूपं पुरुषं च, गुणै: सह स्वविकारैस्सह, प्रकृतिं च वेत्ति, स पुरुष:, सर्वथा - सर्वप्रकारेण, विधिमुल्लंघ्य वर्तमानोऽपि भूय: - पुन: न अभिजायते - नोत्पद्यते। देहान्तरं न गृह्णाति। 'ब्रह्म वेद ब्रह्मैव भवति' (मु.उ.३.२.१) न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते' (बृ.उ.४.४.३) इत्यादिश्रुतिषु आत्मविद: पुनर्जन्मराहित्यमुक्तम्॥ २३॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अत्रात्मदर्शने बहूनुपायानाह—

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे॥ २४॥

केचित् योगिनः ज्ञानेन - तैलधारावत्सन्ततानवच्छिन्नप्रत्ययेन, आत्मनि - देहे, आत्मना - मनसा, आत्मानं परमात्मानं, पश्यन्ति, अन्ये सांख्येन, सांख्यं नाम - इमे सत्वरजस्तमांसि गुणाः, तद्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आत्मेति चिन्तनं तेन योगेन आत्मानं पश्यन्ति। अपरे केचित्, कर्मयोगेन - ईश्वरार्पणबुद्ध्या अनुष्ठीयमानं कर्मैव योगार्थत्वात् योगः तेन सत्वशुद्धिज्ञानोत्पत्तिद्वारेण आत्मानं पश्यन्तीति सम्बन्धः॥ २४॥

मूढानां तरणोपायमाह—

अन्ये त्वेतदजानन्तः श्रुत्वाऽन्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः॥ २५॥

अन्ये तु, एवं - यथोक्तमात्मानं ध्यानादिष्वन्यतमेनापि, अजानन्तः सन्तः, अन्येभ्यः - आचार्येभ्यः श्रुत्वा, उपासते 'एवं चिन्तय' इत्युक्ताः सन्तो भजन्त इत्यर्थः। श्रुतिपरायणाः श्रुतिः - वेदान्तश्रवणं, परं अयनं - मुक्तिसाधनं येषां ते। केवलं, परोपदेशप्रमाणाः स्वयं विवेकरहिता इत्यभिप्रायः।तेऽपि मृत्युं - मृत्युयुक्तं संसारं, अतितरन्त्येव - अतिक्रामन्त्येव। क्रमेण मुक्ता भवन्तीति भावः॥ २५॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अथ प्रकृतिसंसृष्टात्मनो विवेकानुसन्धानं वक्तुं चराचरं च सर्वं चिदचित्संसर्ग इत्याह—

यावत्सञ्जायते किञ्चित्सत्वं स्थावरजङ्गमम्।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ॥ २६॥

स्थावरं अचरं जङ्गमं - चरं च, स्थावरजङ्गमं किञ्चित्, सत्त्वं वस्तु, यावत्, सञ्जायते - उत्पद्यते, तद्वस्तु क्षेत्रक्षेत्रज्ञसंयोगात्- प्रकृतिपुरुषसंसर्गात्, रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावात् अध्यारोपित-सर्परजतादिसंयोगवत्, सोऽयमध्यासरूपः क्षेत्रक्षेत्रज्ञसंयोग इति भावः। जायत इति विद्धि॥ २६॥

एवमविद्याया निवर्तकं सम्यग्दर्शनमुक्त्वा पुनः शब्दान्तरेणाह[82]—

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति॥ २७॥

यः सर्वेषु - ब्रह्मादिस्थावरान्तेषु, भुतेषु -प्राणिषु, समं - निर्विशेषं यथा तथा, तिष्ठन्तं, तेषु भूतेषु, विनश्यत्स्वपि, अविनश्यन्तं - परमेश्वरं, अव्यक्तादिभ्यः, परमः च असौ ईश्वरः ईशनशीलः तं पश्यति, स एव यथावदवस्थितमात्मानं, पश्यति नेतरः॥ २७॥

82. 'न स भूयोऽभिजायते' (भ.गी.13.23) इति सम्यग्दर्शनफलम् अविद्यादिसंसारबीजनिवृत्तिद्वारेण जन्माभावः उक्तः जन्मकारणं च अविद्यानिमित्तकः क्षेत्रक्षेत्रज्ञसंयोगः उक्तः यतः, अतः तस्याः अविद्यायाः निवर्तकं सम्यग्दर्शनम् उक्तमपि पुनः शब्दान्तरेण उच्यते इति भावः।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उक्तसम्यग्दर्शनस्य फलवचनेन स्तुतिं करोति—

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्॥ २८॥

हि - यस्मात्, सर्वत्र - सर्वभूतेषु, समं - निर्विशेषं यथा भवति तथा, समवस्थितं, ईश्वरं - परमेश्वरं, पश्यन्, जनः, दर्शनाद्धेतोः, आत्मना - स्वेनैव, आत्मानं - स्वात्मानं, न हिनस्ति - हिंसां न करोति, अविद्यया सच्चिदानन्दरूपम् आत्मानं तिरस्कृत्य न विनश्यतीति भावः। ततः तदहिंसनात्, परां उत्कृष्टां, गतिं मोक्षं, याति। यस्त्वेवमात्मानं न पश्यति स आत्महा। न तस्य परा गतिः। तथा च श्रुतिः - 'असूर्या नाम ये लोका अन्धेन तमसावृताः। ताँूस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः' ॥ ई .उ.३.) इति॥ २८॥

यत्तु सर्वभूतस्थमीशं समं पश्यन् आत्मनात्मानं न हिनस्तीत्युक्तम् आत्मसु स्वगुणकर्मवैलक्षण्यभेदभिन्नेषु सत्सु तदनुपपन्नमित्येतदाशङ्क्याह —

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तदात्मानमकर्तारं स पश्यति॥ २९॥

यः कर्माणि - वाङ्मनःकायकार्याणि, प्रकृत्यैव - महदादिकार्यकारणतया माययैव 'मायां तु प्रकृतिं विद्यात्' (श्वे. उ.४.१०) इति श्रुतेः। सर्वशः - सर्वप्रकारैः क्रियमाणानि - निर्वर्त्यमानानि, यदा पश्यति, तदा, सः आत्मानं, क्षेत्रज्ञं, अकर्तारं- सर्वोपाधिवर्जितं, पश्यति निर्गुणस्याकर्तुर्निर्विशेषस्य आकाशस्येव भेदे प्रमाणानुपपत्तेः इत्याशयः॥ २९॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पुनरपि तदेव सम्यग्दर्शनं शब्दान्तरेण प्रपञ्च्यते–

यदा भूतपृथग्भावमेकस्थमनुपश्यति।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा॥ ३०॥

यदा - यस्मिन् काले, **भूतपृथग्भावं**, भूतानां पृथक्त्वं, **एकस्थं** - एकस्मिन्नात्मनि स्थितं, **अनुपश्यति** - शास्त्राचार्योपदेशमनुसृत्य 'आत्मैवेदं सर्वम्' (छा.उ.७.२५.२.) इति पश्यति, **तत एव** - तस्मादात्मन एव च **विस्तारं** - उत्पत्तिविकासमित्यर्थ: । आत्मत: प्राण आत्मत आशा आत्मत स्मर आत्मत आकाश आत्मत: तेज: आत्मत आप आत्मत आविर्भावतिरोभावौ आत्मतोऽन्नम् (छा. उ.७.२६.१) इति अनुपश्यति आलोचयतीव, **तदा** - तस्मिन् काले, **ब्रह्म, सम्पद्यते** - ब्रह्मैव भवतीत्यर्थ: ॥ ३० ॥

एकस्यात्मन: सर्वदेहत्वात्मत्वे सति तद्दोषबन्ध: स्यात् इत्याशङ्क्याह–

अनादित्वान्निर्गुणत्वात्परमात्मायमव्यय:।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ ३१ ॥

हे कौन्तेय, अनादित्वात्, न विद्यते आदि: कारणं यस्य तस्य भाव: अनादित्वं तस्मात्, **निर्गुण**स्य भाव: **निर्गुणत्वं** तस्मात् च **अव्यय:**- नाशरहित:, **अयं परमात्मा**, शरीरे तिष्ठतीति **शरीरस्थोऽपि, न करोति, न लिप्यते** - लिप्तो न भवतियो हि कर्ता स कर्मफलेन लिप्यते । अयं त्वकर्ता, अतो न लिप्यत इत्यर्थ: ॥ ३१॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किमिव न करोति न लिप्यति इत्यत्र दृष्टान्तमाह—

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥ ३२॥

यथाकाशं सर्वगतं - सर्वव्यापि सर्वैवस्तुभिः संयुक्तमपि, सौक्ष्म्यात्, सूक्ष्मत्वात् असङ्गादित्यर्थः। सर्ववस्तुस्वभावैर्नोपलिप्यते - न सम्पद्यते, तथा आत्मा, सर्वत्र देवमनुष्यादौ देहे, अवस्थितोऽपि असङ्गत्वात् देहस्वभावैर्न लिप्यते॥ ३२॥

एवमसङ्गत्वे गगनसाम्यमुक्त्वा प्रकाशत्वे सूर्यदृष्टान्तेनाह—

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥ ३३॥

हे भारत - यथा, एको, रविः सूर्यः कृत्स्नं - अशेषं, इमं, लोकं, प्रकाशयति, तथा, क्षेत्री[83] एकः क्षेत्रज्ञः, कृत्स्नं - अव्यक्तादिस्थावरान्तं, क्षेत्रं प्रकाशयति॥ ३३॥

अध्यायार्थमुपसंहरति—

क्षेत्र क्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्॥ ३४॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे प्रकृतिपुरुषविवेकयोगो नाम त्रयोदशोऽध्यायः॥

83. क्षेत्री - परमात्मा

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्षेत्रक्षेत्रज्ञयो: अन्तरं - इतरेतरवैलक्षण्यविशेषं भूतप्रकृतिमोक्षं च भूतानां - प्राणिनां, प्रकृति: अविद्या, तस्या:, मोक्षं - अभावगमनं च, ज्ञानचक्षुषा - शास्त्रजन्यज्ञानदृष्ट्या, ये, विदु: ते परं - परब्रह्म यान्ति, न पुनर्देहमारभन्त इत्यर्थ: ॥ ३४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीस्वामिशिष्य रामचन्द्रानन्दसरस्वती विरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां प्रकृतिपुरुषविवेकयोगो नाम त्रयोदशोऽध्याय:॥

॥ चतुर्दशोऽध्याय: ॥

पूर्वाध्याये सर्वमुत्पद्यमानं क्षेत्रक्षेत्रज्ञसंयोगादुत्पद्यत इत्युक्तम् । तत्कथमिति तत्प्रदर्शनार्थं 'परं भूय' इत्यादिरध्याय आरभ्यते ॥

श्रीभगवानुवाच—

परं भूय: प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनय: सर्वे परां सिद्धिमितो गता: ॥ १ ॥

ज्ञानानां, यज्ञतप: प्रभृति ज्ञेयवस्तूनां, उत्तमं परं परतत्वविषयं ज्ञानं, भूय: पूर्वाध्यायेषूक्तमपि पुन:, प्रवक्ष्यामि। यत् - ज्ञानं ज्ञात्वा प्राप्येत्यर्थ:। सर्वे मुनय:- मननशीला:, इत: अस्माद्देहबन्धनात् परां - प्रकृष्टां मोक्षाख्यां, सिद्धिं गता: - प्राप्ता: ॥ १ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्याश्च सिद्धेः ऐकान्तिकत्वमाह–

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ २ ॥

इदं - वक्ष्यमाणं, ज्ञानं - ज्ञानसाधनं, उपाश्रित्य - अनुष्ठाय, मम- परमेश्वरस्य, साधर्म्यं - (स्वरूपं) आगताः प्राप्तास्सन्तः, सर्गे सृष्टिकालेऽपि, नोपजायन्ते- नोत्पद्यन्ते । प्रलये - ब्रह्मणः प्रलयकालेऽपि, न व्यथन्ति - व्यथां न यान्ति। न च्यवन्ति इत्यर्थः ॥ २ ॥

ईदृशः क्षेत्रक्षेत्रज्ञसंयोगो भूतकारणमित्याह–

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
सम्भवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥

हे भारत, महत्त्वात् महत्[84] मम - मे बृंहणात्, स्वकार्याणां वृद्धिहेतुत्वात् ब्रह्म - अपरा प्रकृतिः, योनिः - सर्वभूतानां कारणम् । तस्मिन् - ब्रह्मणि प्रकृतावित्यर्थः । अहं गर्भं - सर्वभूतजन्मकारणबीजं, क्षेत्रज्ञमित्यर्थः । दधामि निक्षिपामि । क्षेत्रक्षेत्रज्ञशक्तिमानीश्वरोऽहम- विद्याकामकर्मोपाधिस्वरूपानुविधायिनं क्षेत्रज्ञं क्षेत्रेण संयोजयामीति भावः। ततः तस्माद्गर्भविधानात्, सर्वभूतानां - ब्रह्मादिस्तम्बपर्यन्तानां, सम्भवः - उत्पत्तिः भवति ॥ ३॥

84. सर्वकार्यापेक्षया - अधिकत्वात् कारणं महत्, सर्वकार्याणं वृद्धिहेतुत्वरूपात् बृंहणत्वात् ब्रह्म अव्याकृतम् प्रकृतिः त्रिगुणात्मिका माया (गू.).

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कार्यावस्थोऽपि चिदचित्प्रपञ्चो मयैव कृत इत्याह—

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥

हे कौन्तेय, सर्वयोनिषु - देवमनुष्यमृगादियोनिषु, याः, मूर्तयः देहसंस्थानलक्षणाः, सम्भवन्ति, तासां - मूर्तीनां, अहं महद्ब्रह्म, प्रकृतिः योनिः- मातृवत्कारणम् अहं ईश्वरो बीजप्रदः गर्भाधानकर्ता पिता ॥ ४ ॥

के गुणा कं कथं निबध्नन्ति इत्यत्राह—

सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥

हे महाबाहो, प्रकृतिसम्भवाः[85] प्रकृतिः भगवन्माया, तस्याः सम्भव उद्भवो येषां ते । सत्वमिति रज इति तम इति गुणाः, अव्ययं - नाशरहितं, देहिनं क्षेत्रेज्ञं, देहे निबध्नन्ति - वसन्ति । वस्तुत आत्मानम् आस्पदीकृत्य प्रतिलभन्त इति निबध्नन्ति इत्युच्यते ॥ ५ ॥

तत्र सत्वलक्षणं निबन्धनप्रकारं चाह—

तत्र सत्वं निर्मलत्वात्प्राकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ ६ ॥

85. प्रकृतिसंभवाः - त्रयाणां गुणानां साम्यावस्था प्रकृतिः माया भगवतः । तस्याः सकाशात् परस्पराङ्गाङ्गभावेन वैषम्येण परिणताः प्रकृतिसंभवाः इत्युच्यन्ते ॥ (गू)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे अनघ - अपाप, तत्र - सत्वादीनां मध्ये, सत्वं, निर्मलत्वात्[86], स्फटिकमणिवत्, प्रकाशते, इति प्रकाशकम्[87]। अनामयं[88] - निरुपद्रवं शान्तमिति यावत्, अत:। सुखसङ्गेन - सुखं मम सञ्जातमित्येवं रूप: सुखसङ्ग: तेन च, ज्ञान सङ्गेन च, ज्ञानमन्त:करणधर्म तेन सङ्गेन च देहिनमिति शेष: बध्नाति ॥ ६ ॥

रजसो लक्षणं निबन्धनप्रकारं च आह–

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ ७ ॥

हे कौन्तेय, तृष्णासङ्गसमुद्भवं, अप्राप्ताभिलाष: तृष्णा । प्राप्तविषये मनस: प्रीतिलक्षण: संश्लेष आसङ्ग: । तयो: समुद्भव: यस्मात् तत् रज:- रजोगुणं, रागात्मकं - अनुरञ्जनरूपं, विद्धि । यत: तत् - रज: देहिनं, कर्मसङ्गेन - कर्मसु - दृष्टादृष्टार्थेषु सङ्ग:- तत्परता तेन, निबध्नाति ॥ ७॥

तमसो लक्षणं निबन्धनप्रकारं च आह–

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८॥

86. निर्मलत्वात् - स्वच्छत्वात् - चिद्बिम्बग्रहणयोग्यत्वात्। (गू.)

87. प्रकाशकम् - चैतन्यस्य तमोगुणकृतावरणतिरोधायकम् (गू.)

88. अनामयम् - सुखस्य अभिव्यञ्जकम् (गू.)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे भारत, सर्वदेहिनां, मोहनं - अविवेककरं, तमः - तमोगुणं तु, अज्ञानजं - अज्ञानाज्जातं, आवरणशक्तिप्रधानात् प्रकृत्यंशादुद्भूतं, विद्धि। तत् तमः देहिनं प्रमादालस्यनिद्राभिः कर्तव्यात्कर्मणोऽन्यत्र प्रवृत्तिहेतुभूतम् अनवधानं प्रमादः कर्मस्वनारम्भस्वभावः, आलस्यं, स्तब्धतेति यावत्। पुरुषस्येन्द्रियप्रवर्तनश्रान्त्या सर्वेन्द्रियप्रवृत्त्युप रतिर्निद्रा। ताभिः निबध्नाति ॥ ८ ॥

पुनर्गुणानां व्यापारः सङ्क्षेपत उच्यते—

सत्वं सुखे सञ्जयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ ९ ॥

हे भारत, सत्वं, सुखे, सञ्जयति - संश्लेषयति। रजः कर्मणि, संयोजयति। तमः, ज्ञानं - सत्वकृतं, आवृत्य आच्छाद्य, स्वेनावरणात्मना, प्रमादे - अनवधाने, 'उत समुच्चयार्थः। सञ्जयति - संयोजयति ॥ ९ ॥

प्रकृतिस्वरूपानुसम्बन्धिनः सत्वादयो सर्वे गुणाः सर्वदा वर्तन्ते। कथं परस्परविरुद्धकार्यं जनयन्ति इत्यत्राह—

रजस्तमश्चाभिभूय सत्वं भवति भारत।
रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा ॥ १० ॥

हे भारत सत्वं - सत्वगुणः रजश्च तमश्च उभे अभिभूय - तिरस्कृत्य, भवति[89] - उद्भवति वर्धत इति भावः। तदा स्वकार्यं ज्ञानसुखाद्यारभते। एवं

89. अदृष्टवशात् इत्यादिः।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रजोऽपि सत्वं च तमश्चैव उभे अभिभूय भवति। तदा कर्मादिस्वकार्यमारभते। तथा तमः - तमोगुणोऽपि सत्वं च रजश्च उभे अभिभूय भवति । तदा ज्ञानावरणादिस्वकार्यमारभते ॥ १० ॥

यदा यो गुण उद्भूतो भवति तदा तस्य किं लिङ्गम् इत्यत्र आदौ सत्वलक्षणमाह–

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत ॥ ११ ॥

अस्मिन् - भोगायतने, देहे - सर्वद्वारेषु - श्रोत्रादिषु, यदा ज्ञानं - ज्ञानात्मकः प्रकाशः उपजायते, तदा ज्ञानप्रकाशेन लिङ्गेन, उत- सुखादिलिङ्गेनापि, सत्वं विवृद्धं - प्रवृद्धं, इति विद्यात् - जानीयात् ॥ ११ ॥

रजोगुणलिङ्गान्याह–

लोभःप्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १२ ॥

हे भरतर्षभ, रजसि - रजोगुणे, विवृद्धे सति, लोभः- स्वकीयद्रव्यस्यात्यागशीलता, प्रवृत्तिः - प्रयोजनं अनुद्दिश्यापि चलस्वभावता, कर्मणां - फलसाधनभूतानां कर्मणाम् आरम्भः, अशमः 'इदं ' कृत्वा इदं करिष्यामि इति सङ्कल्पविकल्पानुपरमः, स्पृहा – विषयेच्छा, एतानि, जायन्ते एतैः रजोगुणः विवृद्ध इति विद्यात् ॥ १२ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तमोगुणलिङ्गान्याह—

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३ ॥

हे कुरुनन्दन, अप्रकाश: - ज्ञानानुदय: अप्रवृत्तिश्च - स्तब्धता, प्रमाद: - अकार्यप्रवृत्ति:, मोह:- विपरीतज्ञानं एतानि तमसि, विवृद्धे सति, जायन्ते। एतै: तम: प्रवृद्धमिति विद्यात् ॥ १३ ॥

देहान्तेऽपि यत्फलं प्राप्यते तत्सर्वं प्रवृद्धत्रैगुण्यजन्यमेवेति दर्शयन् सत्वफलमाह —

यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत्।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥ १४ ॥

देहभृत् - शरीरी, सत्वे - सत्वगुणे, प्रवृद्धे सति, यदा प्रलयं- मरणं, याति तदा अमलान्- मलरहितान्, उत्तमविदां - महदादितत्त्व-विदां, हिरण्यगर्भाद्युपासकानामिति यावत् । लोकान् प्रतिपद्यते - प्राप्नोति ॥ १४ ॥

रजस्तम: फलमाह—

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५॥

रजसि प्रवृद्धे सति, प्रलयं - मरणं, गत्वा, कर्मसङ्गिषु - कर्मासक्तियुक्तेषु मनुष्येषु, जायते। तथा तमसि, प्रवृद्धे सति, प्रलीन: - मृत: मूढयोनिषु - श्वसूकरादियोनिषु, जायते ॥ १५॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अतीतश्लोकार्थमेव संक्षिप्याह—

कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६ ॥

आदौ शिष्टजना इति पदमध्याहार्यम् । सुकृतस्य - सात्विकस्य इत्यर्थः । कर्मणः, सात्विकं - सत्वप्रधानं, निर्मलं - प्रकाशबहुलं फलं सुखम् आहुः रजसस्तु- राजसस्य, कर्मण इत्यर्थः । फलमपि, दुःखं - दुःखकरं, आहुः । तथा तमसः - तामसस्य, कर्मणः फलं, अज्ञानं आहुः[90] ॥ १६ ॥

गुणेभ्यः किं किं भवतीत्यत्राह—

सत्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७॥

सत्वात् ज्ञानं, सञ्जायते, रजसः लोभ एव च सञ्जायते । तमसः प्रमादमोहौ भवतः सञ्जायेते । किञ्च अज्ञानमेव[91] च अज्ञानं चापि भवतीति शेषः ॥ १७ ॥

त्रैगुण्यस्य गतिभेदं दर्शयति—

ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १८ ॥

90. अत्र रजस्तमः शब्दौ तत्कार्ये कर्मणि, प्रयुक्तौ । कार्यकारणयोः अभेदोपचारात् (गू.)
91. 'अज्ञानमेव' इत्यत्र 'एव' कारः प्रकाशव्यावृत्त्यर्थः (गू.)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सत्वस्था[92] - सत्वगुणवृत्तिस्थाः, ऊर्ध्वं- देवादिलोकं, गच्छन्ति। देवादिषूत्पद्यन्त इत्यर्थः। राजसाः मध्ये - मर्त्यलोके, तिष्ठन्ति। जघन्यो - निकृष्टश्चासौ गुणः- तमोगुण; तस्य, वृत्तिः - निद्रालस्यादि, तस्यां स्थिता जघन्यगुणवृत्तिस्थाः। तामसा, अधो गच्छन्ति। (पश्वादियोनिषूत्पद्यन्त इत्यर्थः) ॥ १८ ॥

सम्यग्दर्शनात् मोक्षप्राप्तिप्रकारमाह—

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

यदा द्रष्टा - ज्ञाता, गुणेभ्यः - कार्यकारणविषयाकारपरिणतेभ्यः अन्यं- कर्तारं, नानुपश्यति, गुणा एव सर्वावस्थाः सर्वकर्मणां कर्तार इत्येवं पश्यति। किञ्च, गुणेभ्यः परं - व्यतिरिक्तं गुणव्यापारसाक्षिभूतमिति यावत्। वेत्ति, स द्रष्टा, मद्भावं - ब्रह्म, अधिगच्छति ॥ १९ ॥

ततश्च गुणकृतसर्वानर्थनिवृत्त्या कृतार्थो भवतीत्याह—

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥

देही - शरीरी, देहसमुद्भवान् - देहोत्पत्तिबीजभूतान्, त्रीन् एतान् गुणान्, अतीत्य - जीवन्नेवातिक्रम्य, जन्ममृत्युजरादुःखैः विमुक्तः सन् अमृतं- मद्भावं, अश्नुते - प्राप्नोति ॥ २० ॥

92. सत्त्ववृत्तेश्शास्त्रीये ज्ञाने कर्मणि च निरताः। (गू)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जीवन्नेव गुणानतीत्य अमृतमश्नुत इति प्रश्नबीजं प्रतिलभ्य अर्जुन उवाच–

कैर्लिङ्गैस्त्रीन् गुणानेतानतीतो भवति प्रभो।
किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते ॥ २१ ॥

हे प्रभो - स्वामिन्, त्रीन् - एतान् गुणान् अतीतः कै : - कीदृशैः लिङ्गैः - आत्मन्युत्पन्नैः चिह्नैः उपलक्षितो भवति। क आचारो यस्य स किमाचारः। अस्य स्वरूपावगतलिङ्गभूताचारः कीदृश इत्यर्थः । कथं - केन प्रकारेण, त्रीन् एतान् गुणान्, अतिवर्तते - अतिक्रामति ॥ २१ ॥

गुणातीतस्य लक्षणं गुणातीतत्वोपायं चार्जुनेन पृष्टः सन् प्रश्नद्वयार्थ-प्रतिवचनं श्रीभगवानुवाच–

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ २२ ॥

हे पाण्डव, प्रकाशं - सत्वकार्यं च, प्रवृत्तिं - रजःकार्यं च, मोहमेव च - तमःकार्यं च, उपलक्षणार्थमेतत्। एतानि सर्वाण्यपि कार्याणि यथायथं सम्प्रवृत्तानि - सर्वतः प्राप्तानि सन्ति, दुःखबुद्ध्या यो, न द्वेष्टि निवृत्तानि च सन्ति - सुखबुद्ध्या न काङ्क्षति, गुणातीतः स उच्यत इति चतुर्थे-नान्वयः ॥ २२ ॥

अथेदानीं गुणातीतः किमाचार इति प्रश्नस्य प्रतिवचनमाह–

उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येवं योऽवतिष्ठति नेङ्गते ॥ २३ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उदासीनवत् - पक्षपातरहितवत्, आसीन: स्थितो य: गुणै: न विचाल्यते - न प्रचाल्यते। गुणा: । कार्यकरणा विषयाकारपरिणता:, स्वकार्येषु वर्तन्त इति योऽवतिष्ठति, आत्मनेपदाभाव आर्ष:, योऽनुतिष्ठतीति वा पाठ: । नेङ्गते - न चलति । 'इगि' गतौ । गुणकार्यकर्मानुगुणं न चेष्टते। किन्तु स्वरूपावस्थ एव भवतीत्यर्थ: । स गुणातीत इत्युत्तरेणान्वय: ॥ २३ ॥

किञ्च–

समदु:खसुख: स्वस्थ: समलोष्टाश्मकाञ्चन: ।
तुल्यप्रियाप्रियो धीर: तुल्यनिन्दात्मसंस्तुति: ॥ २४ ॥

समे दु:खसुखे यस्य स: समदु:खसुख:, स्वस्मिन् - स्वात्मनि तिष्ठतीति - स्वस्थ: -प्रसन्न:, समलोष्टाश्मकाञ्चन:, समानि लोष्टाश्मकाञ्चनानि यस्य। तुल्ये- समे प्रियं चाप्रियं च यस्य स तुल्यप्रियाप्रिय: धीर:- धीमान्, तुल्ये निन्दा चात्मन: संस्तुतिश्च यस्य स: तुल्यनिन्दात्मसंस्तुति: गुणातीत: स उच्यत इत्यनेनान्वय: ॥ २४ ॥

किञ्च–

मानापमानयो: तुल्य: तुल्यो मित्रारिपक्षयो : ।
सर्वारम्भपरित्यागी गुणातीत: स उच्यते ॥ २५ ॥

य:, मानापमानयोस्तुल्य:, तथा, मित्रारिपक्षयो:, मित्रं चारिश्च मित्रारी तयो: पक्षौ यौ तयो:, तुल्य: सम:, दृष्टादृष्टार्थानि कर्माणि आरभ्यन्त इत्यारम्भा: सर्वारम्भान् परित्यक्तुं शीलमस्यास्तीति सर्वारम्भपरित्यागी च, गुणातीत

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उच्यते । 'उदासीनवत्' इत्यादि गुणातीतः स उच्यत' इत्येतदन्तमुक्तं यावद्यत्नसाध्यं तावद्यतिभिरनुष्ठेयमिति तात्पर्यम् ॥ २५ ॥

अधुना कथं च त्रिगुणातिवर्तनमित्यस्य प्रश्नस्य प्रतिवचनमाह । अयं पूर्वस्मादन्यो विशिष्टतरो गुणातीतत्त्वोपायः—

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ २६ ॥

यः - यतिर्वा, कर्मी वा मां च मामेव, अव्ययानामनेकार्थत्वाच्च शब्दोऽवधारणे । अव्यभिचारेण - निश्चितेन, भक्तियोगेन भक्तिः - भजनं, सैव योगः तेन, सेवते। सः एतान् - उक्तान् गुणान् समतीत्य, ब्रह्मभूयाय- ब्रह्मभावाय, मोक्षायेति यावत् । कल्पते - समर्थो भवति। योग्य इत्यर्थः ॥ २६ ॥

कुत एतदित्यत्राह—

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ २७ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ।

हि - यस्मात्, ब्रह्मणः- परमात्मनः प्रतिष्ठा - प्रतिमा घनीभूतं ब्रह्मैव, अहं, यथा घनीशःभूत एव प्रकाशः सूर्यमण्डलं तद्वदित्यर्थः। तथा, अव्ययस्य - व्ययरहितस्य, अमृतस्य - मोक्षस्य, च प्रतिष्ठा अहं, नित्यमुक्तत्वात् । तथा, शाश्वतस्य - नित्यस्य,धर्मस्य मोक्षसाधनस्य च प्रतिष्ठा अहं

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शुद्धसत्वात्मकत्वात्, तथा ऐकान्तिकस्य, मुख्यस्य, सुखस्य च प्रतिष्ठा अहं, परमानन्दरूपत्वात्, अतो मत्सेविनो मद्भावं यान्तीति भाव: ॥ २७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य ब्रह्मानन्दसरस्वतीस्वामिशिष्य रामचन्द्रानन्दसरस्वती विरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां गुणत्रयविभागयोगो नाम चतुर्दशोऽध्याय: ॥

॥ पञ्चदशोऽध्याय: ॥

यस्मात् मदधीनं कर्मफलज्ञानिनां विज्ञानफलं अतो भक्तियोगेन मां ये सेवन्ते ते मत्प्रसादात् ज्ञानप्राप्तिक्रमेण गुणातीता मोक्षं गच्छन्ति। किमु वक्तव्यमात्मनस्तत्वमेव सम्यग्विजानन्त:, इत्यतोऽर्जुनेनापृष्टमप्यात्मतत्वं विवक्षु: उवाच 'ऊर्ध्वमूलमधश्शाखमश्वत्थं प्राहुरव्ययम्' इत्यादिना । तत्र संसाराद्विरक्तस्य ज्ञानाधिकारो भवतीति वैराग्यहेतोर्वृक्षरूपकल्पनया संसारस्वरूपं वर्णयति–

श्री भगवानुवाच–

ऊर्ध्वमूलमध: शाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥

ऊर्ध्वमूलं, ऊर्ध्वं - उत्कृष्टं, अव्याकृतं ब्रह्म मूलं, कालत: सूक्ष्मत्वात् कारणत्वाच्च नित्यत्वात् अव्यक्तमायाशक्तिमद्ब्रह्म ऊर्ध्वम् इत्युच्यते। तन्मूलं यस्य स: ऊर्ध्वमूलस्तं, अधश्शाखं, अध: प्रसृता: महदहङ्कारतन्मात्रादय: शाखा इव शाखा यस्य तम् । अश्वत्थं - श्व: प्रभातपर्यन्तं स्थास्यतीति

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्वत्थ: । स न भवतीत्यश्वत्थ: तं क्षणविध्वंसिनम् अव्ययं, कारणस्यानादित्वात् ब्रह्मज्ञानपर्यन्तं देहादिसन्तानोऽस्येत्यव्ययम् । अनादित्वादव्ययमाहु: । 'ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थस्सनातन:' (क.उ.६.१.) इत्याद्या: श्रुतय: संसारवृक्षमनादिं कथयन्तीत्यर्थ: । **छन्दांसि** - वेदा: **यस्य** - संसारवृक्षस्य, **पर्णानि** - पत्राणि च । यथा वृक्षस्य रक्षणार्थानि पर्णानि तथा वेदा: - 'संसारवृक्षपरिरक्षणार्था:' । धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात् । **यस्तं** समूलं संसारवृक्षं **वेद** वेत्ति- **स:**, **वेदवित्** - वेदार्थवित् । समूलादस्मात्संसारवृक्षात् अन्यो ज्ञातव्योऽणुमात्रोऽपि नास्तीत्यत: सर्ववेदार्थवित् सर्वज्ञ इति समूलवृक्षज्ञानिनं भगवान् स्तौतीत्यभिप्राय: ॥ १॥

तस्यैव वृक्षस्यावयवकल्पनामाह—

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवाला: ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥ २॥

तस्य - संसारवृक्षस्य, शाखा इव **शाखा** - अव्यक्तमहदहङ्कारतन्मात्रादय: **गुणप्रवृद्धा:**, **गुणै:** - उपादानभूतै: सत्वरजस्तमोभि:, **प्रवृद्धा:**- स्थूलीकृता: **विषयप्रवाला:** पल्लवा यासु तास्सत्य: **अधश्च ऊर्ध्वं च**, **प्रसृता:**- प्रगता:, विस्तारं गता इति यावत् । ऊर्ध्वप्रसृतास्तु देवादियोनिं प्राप्ता:- सुकृतिन: । अध: प्रसृता: पश्वादियोनिं प्राप्ता:दुष्कृतिन इति भाव: । तस्य वृक्षस्य **मूलानि** कर्मजनितरागद्वेषादि वासनालक्षणानि **मनुष्यलोके**, **कर्मानुबन्धीनि**, **कर्म** - धर्माधर्मलक्षणं, **अनुबन्ध:** - पश्चाद्भावी - एषामस्ति तानि **मनुष्यलोके**। विशेषतोऽत्र मनुष्याणां कर्माधिकार: प्रसिद्ध: । देहाद्यपेक्षया,

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अधश्च 'च' कारात् ऊर्ध्वं च । अनुसन्ततानि - अनुप्रविष्टानि। ऊर्ध्वाधोलोकेषु उपभुक्तानीत्यर्थ: ॥ २॥

पुनस्तमेवाह—

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥ ३ ॥

इह - संसारे, स्थितै : प्राणिभि:, अस्य - संसारवृक्षस्य, तथा- ऊर्ध्वमूलत्वादिप्रकारेण, रूपं, नोपलभ्यते स्वप्नमरीच्युदकमाया- गन्धर्वनगरसमत्वात् । दृष्टनष्टस्वरूपत्वाच्च न प्रतिपद्यते । अन्त: परिसमाप्ति:, नोपलभ्यते, अपर्यन्तत्वात् । आदिश्च, नोपलभ्यते, 'इत आरभ्यायं प्रवृत्त' इति नावगम्यत इत्यर्थ:। सम्प्रतिष्ठा- स्थिति:, मध्यमिति यावत्। कथं तिष्ठति इति नोपलभ्यते यस्मादेवं तस्मात् 'अश्वत्थमेन' मिति सार्धश्लोकमेकं वाक्यम्। अश्वत्थमेनं सुविरूढमूलम् असङ्गशस्त्रेण दृढेन छित्वा छित्वा सुविरूढमूलं, सुविरूढानि - विरोहं गतानि, सुदृढानि मूलानि यस्य । तं, एनं - पूर्वोक्तिमश्वत्थं संसारवृक्षं, पुन: पुन: विवेकाभ्यासेन निशितेन, असङ्गशस्त्रेण, गुणमयभोगै: असङ्ग एव, शस्त्रं - आयुधं, तेन, छित्त्वा - उत्कृत्य ॥ ३ ॥

तत: परं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूय:।
तमेव चाद्यं पुरुषं प्रपद्ये यत: प्रवृत्ति: प्रसृता पुराणी ॥ ४ ॥

तत: - पश्चात्, यस्मिन् - पदे, गता: - प्रविष्टा: भूय:- पुन: न निवर्तन्ति यत: - पुरुषात्, पुराणी - चिरन्तनी, प्रवृत्ति: - ऐन्द्रजालिकादिव माया

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

संसारमायावृक्षप्रवृत्तिः प्रसृता - निस्सृता, आद्यं, तं पुरुषं - परमात्मानमेव, प्रपद्ये- शरणं व्रजामीति तत्पदं, परिमार्गितव्यं - अन्वेषणीयम् ॥ ४ ॥

कथम्भूताः तत्पदं गच्छन्ति इत्यत्राह—

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५॥

निर्मानमोहाः निर्गतौ मानो - मिथ्याहङ्कारः मोहः मिथ्याभिनिवेशश्च येभ्यः ते। जितसङ्गदोषाः - जितः सङ्ग एव दोषः यैस्ते अध्यात्मनित्याः अध्यात्मे- आत्मज्ञाने, नित्याः - तत्पराः, विनिवृत्तकामाः, विशेषेण निवृत्ताः कामाः येभ्यस्ते। सुखदुः खहेतुत्वात् सुखदुःखसंज्ञैः, द्वन्द्वैः - प्रियाप्रियादिभिः विमुक्ताः- परित्यक्ताः, अमूढाः- विवेकिनः, अव्ययं तत्पदं, गच्छन्ति ॥ ५ ॥

तमेव पुनर्विवेचयति—

न तद्भासयते सूर्यो न शशाङ्को न पावकः।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ ६ ॥

मम यत्-पदं, तत् पदं, सूर्यः न भासयते, (सर्वप्रकाशकत्वात्)। तथा शशाङ्कश्च, न भासयते, तथा, पावकश्च, न भासयते, यत् मम परमं, धाम - पदं तत् गत्वा, न निवर्तन्ते योगिन इति शेषः ॥ ६ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ननु सर्वा गतिराद्यन्ता हि। 'संयोगा विप्रयोगान्ता:', (वा.रा. २.१०५.१६) इति प्रसिद्धम् । एतद्धामगतानां नास्ति निवृत्तिरिति कथमुच्यत इत्याशङ्क्याह—

ममैवांशो जीवलोके जीवभूत: सनातन:।
मन: षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७॥

सनातन: - प्रसिद्ध:, **मम** - परमात्मन:, **अंश:** - एकदेश: अंश: **जीवलोके**- संसारे, **जीवभूत: सन्** - अविद्योपहित: सन्, भोक्तेति यावत् । **प्रकृतिस्थानि**- प्रकृतौ कर्णशष्कु ल्यादौ, स्वस्थाने स्थितानि, **मन:षष्ठानि**, मन: षष्ठं येषां तानि **इन्द्रियाणि** श्रोत्रादीनि, **कर्षति** । यथा जलसूर्यक: जलसूर्यांशो जलनिमित्तापाये सूर्यमेव गत्वा तेनैवात्मना गच्छति। यथा वा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाश आकाशांश: सन् घटादिनिमित्तापाये सति आकाशं प्राप्य न निवर्तते, तथा जीव: प्रकृतिलयान्मां प्राप्य न निर्वतत इति भाव: ॥ ७ ॥

कदा इत्यत्राह—

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वर:।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ ८॥

ईश्वरो - देहादिसंघातस्वामी जीव:, **यत्**, **शरीरं**, **अवाप्नोति**, **यच्चापि**- यस्मात् शरीरात्, पञ्चम्यर्थे द्वितीया। यदा **उत्क्रामति** - निर्गच्छति, शरीराच्छरीरान्तरं, यातीत्यर्थ: । तदा **वायु: आशयात्** - पुष्पादिस्थानात्, **गन्धान्**

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गन्धवत: सूक्ष्मांशानिव, एतानि, मन:षष्ठानि इन्द्रियाणि गृहीत्वा, संयाति सम्यग्याति ॥ ८ ॥

तानीन्द्रियाण्याह–

श्रोत्रं चक्षु: स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥

अयं - जीव: श्रोत्रं, चक्षु: स्पर्शनं च - त्वगिन्द्रियं रसनं - जिह्वा च, घ्राणमेव च मनश्च षष्ठं प्रत्येकम् इन्द्रियेण सह, अधिष्ठाय - आश्रित्य, विषयान्, - शब्दादीन्, उपसेवते - उपभुङ्क्ते ॥ ९ ॥

एवं देहगतं देहात्–

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुष: ॥ १० ॥

विमूढा: - अविवेकिन:, एनं आत्मानं, उत्क्रामन्तं, पूर्वोपात्तदेहं परित्यजन्तं, वा, स्थितमपि वा - देहे तिष्ठन्तं, भुञ्जानमपि वा - शब्दादीनुपलभमानं, गुणान्वितं वा, गुणा: - सुखदु:खमोहाद्या:, तै:, अन्वितं- अनुगुणं संयुक्तं, नानुपश्यन्ति - नालोचयन्ति। ज्ञानचक्षुषस्तु - विज्ञानदृश: एनं आत्मानं पश्यन्ति। एवं सर्वावस्थासु साक्षित्वेन वर्तमानमात्मानं, मूढा न जानन्ति ॥ १० ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवमात्मनो दुर्विज्ञेयत्वात् विवेकिनोऽपि प्रायशो न जानन्तीत्याह–

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतात्मनो नैनं पश्यन्त्यचेतस:॥ ११॥

योगिन: - समाहितचित्ता:, यतन्त: - यत्नं कुर्वन्त:[93] एनं आत्मानं, आत्मनि - स्वस्यां बुद्धौ, अवस्थितं, 'अयमहमस्मि' इति जानन्तीत्यर्थ:। अकृतात्मान:- अविशुद्धचित्ता: अचेतस: - अविवेकिन: यतन्तोऽपि - शास्त्रादिप्रमाणयत्नं एनं - आत्मानं, न पश्यन्ति॥ ११॥

एतावत्पर्यन्तं यत्पदं परमिति प्रस्तुतम्। तस्य पदस्य सर्वात्मत्वं सर्वव्यवहारसपंदत्वं च विवक्षुश्चतुर्भि: श्लोकै: सङ्गृह्यात्मविभूतिमाह–

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥ १२॥

आदित्यगतं - सूर्याश्रयं, यत् तेज: - प्रकाश:, अखिलं, जगत्, भासयते, प्रकाशयति किंच, चन्द्रमसि, यत्तेज:, अग्नौ, यत्तेज:, तत्तेज: मामकं- मदीयं, विद्धि - जानीहि॥ १२॥

किञ्च–

गामाविश्य च भूतानि धारयाम्यहमोजसा।
पुष्णामि चौषधी:सर्वा:सोमो भूत्वा रसात्मक:॥ १३॥

93. यतन्त: - ध्यानादिभि: प्रयतमाना: (गू)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अहं, गां - भूमिं, आविश्य, ओजसा - बलेन, भूतानि, प्राणिनः, धारयामि । ईश्वरस्य मम रूपं जगद्धारणाय पृथिव्यामाविष्टमिति भावः। 'स दाधार पृथिवीं उतद्याम्' इति श्रुतेः । किं च, रसात्मकः - रसस्वभावः, सर्वरसानामाकर इति यावत्। सोमः भूत्वा, सर्वा ओषधीः - व्रीहियवाद्याः पुष्णामि, स्वात्मरसानुप्रवेशेन पुष्टिमतीः करिष्यामीत्यर्थः ॥ १३ ॥

किं च –

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४॥

अहं, वैश्वानरः भूत्वा - जठराग्निर्भूत्वा, 'अयमग्निर्वैश्वानरः' (बृ.उ. ५.९.१) 'योऽयमन्तः पुरुषे येनेदमन्नं पच्यते' (मैत्रा.२-८) इत्यादिश्रुतेः - प्राणिनां - प्राणवतां, देहं आश्रितः प्रविष्टः प्राणापानसमायुक्तः, चतुर्विधं-भक्ष्यं भोज्यं च, लेह्यं, चोष्यं चेति चतुष्प्रकारं । तत्र यद्दन्तैः अवखण्ड्याव-खण्ड्य भक्ष्यते तद्भक्ष्यमपूपादि । यत्केवलं जिह्वया विलोड्य निगीर्यते तद्भोज्यं पायसादि। यज्जिह्वयां निक्षिप्य रसास्वादेन निगीर्यते द्रवीभूतं गुडादि तल्लेह्यम् । यद्दन्तैर्निपीड्य रसांशं निगीर्य अवशिष्टं त्यज्यते तच्चोष्यं इक्षुखण्डादि-कमिति भेदः । अन्नं - प्राणिभिर्भुक्तं, पचामि पचनं करोमि ॥ १४ ॥

किञ्च–

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेववेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ १५॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सर्वस्य - प्राणिजातस्य हृदि - बुद्धौ, अहं, आत्मा सन्, सन्नि विष्टः अतः मत्त, आत्मनः स्मृतिः - पूर्वानुभूतविषया, प्राणिमात्रस्य भवतीति शेषः । तथा ज्ञानं विषयेन्द्रियसंयोगजं, भवति अपोहनं - स्मृतिज्ञानयोःप्रमोषो भवति। किं च सर्वैर्वेदैः, वेद्यः - वेदितव्यः, अहमेव। वेदान्तकृत् - वेदार्थ-सम्प्रदायकृत्। वेदविच्च - वेदार्थविच्च। अहमेव॥ १५॥

सर्ववेदार्थानां सारभूतमर्थं शृणु इत्याह—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ १६॥

लोके क्षरः च, अक्षर इमौ - निर्दिष्टौ, पुरुषौ, द्वौ सर्वाणि तत्र, भूतानि-ब्रह्मादिस्थावरान्तानि। क्षरः पुरुष उच्यते। 'सहस्रशीर्षा पुरुषः' (श्वे. उ. ३.१४) इति श्रुतेः। ब्रह्मादिशरीरेषु अविवेकात् लोकस्य पुरुषत्वप्रसिद्धेः - कूटस्थःकूटः - शिलाराशिः, पर्वतः तद्वत् स्थितः चेतनो भोक्ता स विवेकिभिः न क्षरतीति अक्षरः। पुरुष इत्युच्यते॥ १६॥

क्षराक्षरोपाधिद्वयदोषेणास्पृष्टो नित्यशुद्धबुद्धमुक्तस्वभाव इत्याह—

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ १७॥

अन्यः - क्षराक्षराभ्यां विलक्षणः उत्तमः उत्कृष्टतम : पुरुषस्तु, परमात्मा देहाद्याविद्योपाधिकृतात्मभ्यः परमश्च असौ आत्मा च, सर्वभूतानां,

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रत्यक्चेतन इत्यर्थः । इति उदाहृतः - उक्तः । वेदान्तेषु स एव शिष्यत इति भावः । तमेव विशिनष्टि । यः, लोकत्रयं स्वकीयाखिलशक्त्या, आविश्य- प्रविश्य, बिभर्ति- स्वरूपसद्भावमात्रेण धारयति। स एव अव्ययः ईश्वरः- ईशनशीलः परमात्मेति यावत् ॥ १७ ॥

एवमुक्ते परमात्मनि प्रसिद्धं पुरुषोत्तमनाम दर्शयन्नाह—

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥

यस्मात् - कारणात् अहं क्षरं, अतीतः, अक्षरादपि च, उत्तमः- उत्कृष्टतमः, ऊर्ध्वतमो वा। अतः कारणात्, लोके वेदे च प्रथितः- प्रख्यातः पुरुषोत्तमः, अस्मि भवामि ॥ १८ ॥

एवं निरुक्तमात्मानं ज्ञातुः फलमाह—

यो मामेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥

हे भारत, यः असंमूढः संमोहवर्जितस्सन्, एवं उक्तप्रकारेण पुरुषोत्तमं, मां जानाति - सः, सर्ववित् - सर्वज्ञस्सन्, सर्वभावेन मां भजति - प्राप्नोति ॥ १९ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अध्यायोक्ततत्त्वं च तज्ज्ञातारं स्तौति–

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ।
एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत ॥ २० ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे पुराणपुरुषोत्तमयोगो नाम पञ्चदशोऽध्याय: ।

हे अनघ - अपाप, **गृह्यतमं** - गोप्यतमं, **इदं, शास्त्रं** - गीताख्यं शास्त्रम्। सर्ववेदार्थश्च गीताशास्त्रार्थ:। स: अस्मिन्नध्याये समासेन उक्त: अत: शास्त्रमिति स्तूयते। **मयोक्तं ,एतत्** - शास्त्रं, **बुद्ध्वा, बुद्धिमान्, कृतकृत्यश्च,** - कृतं, कृत्यं - कर्तव्यं येन स:, **स्यात्** - भवेत्। विशिष्टजन्मप्रसूतेन ब्राह्मणेन यत्कर्तव्यं तत्सर्व भगवत्तत्वे विदिते कृतं भवेदित्यर्थ: । अन्यथा कर्तव्यं न परिसमाप्यत एवेति भाव: । 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' इत्युक्तं च। एतद्धि जन्मसाफल्यम् इति मानवं वाक्यं च । यत: एतत् परमार्थतत्वं श्रुतवानसि अत:त्वं कृतकृत्य इति तात्पर्यम् ॥ २० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीस्वामिशिष्य
रामचन्द्रानन्दसरस्वती विरचितायां भगवद्गीताव्याख्यायां
पदयोजनासमाख्यायां पुराणपुरुषोत्तमयोगो नाम पञ्चदशोऽध्याय:॥

॥ षोडशोऽध्याय: ॥

एतद्बुद्ध्वा इत्यनन्तराध्यायोक्तज्ञानस्य अधिकारिनिरूपणार्थं नवमाध्यायसूचितदेवासुरप्रकृते: विस्तरेण प्रदर्शनार्थम् 'अभयम्' इत्यादि: अध्याय आरभ्यते। तत्र संसारमोक्षाय दैव्या आदानम्, इतरस्य बन्धकत्वात् परिवर्जनं च ।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीभगवानुवाच–

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥

अभयं - अभीरुत्वं, **सत्त्वसंशुद्धिः**, सत्त्वस्य - अन्तःकरणस्य, संशुद्धिः व्यवहारेषु परवञ्चनामायानृतादिपरिवर्जनमित्यर्थः। **ज्ञानयोगव्यवस्थितिः**, ज्ञानं - शास्त्रजन्यं ज्ञानं, योगः - ज्ञातपदार्थानां इन्द्रियाद्युपसंहारेण एकाग्रतया स्वात्मसंवेद्यतापादनं तयोर्व्यवस्थितिः - व्यवस्थानं, तन्निष्ठतेति यावत्। **दानं** - अन्नादीनां यथाशक्ति संविभागः। **दमः**- बाह्येन्द्रियोपरमः। **यज्ञश्च** द्विविधः यागः अग्निहोत्रादिश्रौतः देवयज्ञादिस्मार्तश्च। **स्वाध्यायः** अध्ययनं, **तपः** - वक्ष्यमाणं शारीरादि, **आर्जवं** सर्वदा ऋजुत्वं, एते गुणाः दैवीं सम्पदमभिजातस्य भवन्तीत्युत्तरेणान्वयः ॥ १ ॥

किञ्च–

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलम् ॥ २ ॥

अहिंसा - प्राणिनां पीडावर्जनं, **सत्यं**[94] - यथार्थवचनं, **अक्रोधः**[95] - क्रोधोपशमनं, **त्यागः** - औदार्यं, **शान्तिः** - चित्तोपशमः, **अपैशुनं** - परस्मै पररन्ध्रप्रकटीकरणवर्जनं, भूतेषु दीनेषु, **दया** **अलोलुत्वं** पवर्णलोप आर्षः। इन्द्रियाणां विषये सन्निधौ अविक्रिया इत्यर्थः। **मार्दवं** - मृदुता अक्रौर्यं - **ह्रीः** अकार्यप्रवृत्तौ लज्जा, **अचापलं**[96]– स्पृहणीयविषयसन्निधौ अचाञ्चल्यम् ॥ २॥

94. सत्यम् - अनर्थाननुबन्धि यथार्थवचनम् (गू)
95. अक्रोधः परैः कृतेन आक्रोशेन ताडनेन वा प्राप्तस्य क्रोधस्य उपशमनम् (भा).
96. अचापलम् - असति प्रयोजने वाक्पाणिपादादीनाम् अव्यापारयितृत्वम् (शं.भा)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किं च–

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ ३ ॥

हे भारत, देवानामियं दैवी तां दैवीं सम्पदं, अभिजातस्य - अभिलक्ष्य जातस्य, दैवविभूत्यर्हस्य भाविकल्याणस्येत्यर्थः। तेजः - प्रागल्भ्यं, क्षमा आकृष्टस्य ताडितस्य वा अन्तर्विकारानुत्पत्तिः। उत्पन्नायां विक्रियायां उपशमनमक्रोध इत्यर्थः। तस्मात् अक्राधक्षमयोर्भेदः। धृतिः - धैर्य, शौचं शुचित्वम्। तद् द्विविधं मृज्जलकृतं बाह्यं, मनोनैर्मल्यम् आन्तरम्। अद्रोहः परजिघांसाभावः नातिमानिनो भावः नातिमानिता।[97] आत्मनः पूज्यतातिशय भावनाभाव इत्यर्थः। अभयादीनि एतदन्तानि भवन्ति इत्यर्थः॥ ३ ॥

एवं दैवीं सम्पदं विविच्यासुरीं सम्पदं विवेचयति–

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्॥ ४॥

हे पार्थ, असुराणामियं, आसुरी, तां सम्पदम् अभिजातस्य पुंसः दम्भः धर्मध्वजित्वं, दर्पः - धनस्वजनादिनिमित्त उत्सेकः, अभिमानः- स्वविद्याभिजनानु-गुणोऽभिमानः, क्रोधः परपीडाफलः चित्तविकारः पारुष्यमेव च - साधूनामुद्वेगकरः परुषस्वभावः निष्ठुरभाषणमित्यर्थः। अज्ञानं अविवेकः भवन्तीति शेषः॥ ४ ॥

97. अत्यर्थं मानः अतिमानः। स यस्य विद्यते सः अतिमानी तद्भावः अतिमानिता तदभावः नातिमानिता।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतयोः सम्पदो कार्यं दर्शयन्नाह–

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥ ४ ॥

दैवी सम्पत्, संसारबन्धनात् मोक्षाय मता-आसुरी सम्पत् निबन्धाय, नियतो निबन्धः तस्मै, - मता - स्मृता। एवमुक्ते प्रकृत्यनि र्धारणादतिभीतम् अर्जुनम् आलक्ष्याह- मा शुच इति। हे पाण्डव, त्वं, दैवीं, सम्पदं, अभिजातः -अभिलक्ष्य जातः, भाविकल्याणवानसीत्यर्थः । अतो माशुचः शोकं मा कार्षीः ॥ ५ ॥

ज्ञात्वा परिहर्तव्या इत्यासुरीं सम्पदं ज्ञापयति–

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥

हे पार्थ, अस्मिन् लोके, दैवश्च आसुरश्चेति, भूतसर्गौ[98]- भूतानां सर्गभावौ, द्वौ - द्विविधौ, तत्र दैवः सर्गः - विस्तरश : विस्तरेण मया, प्रोक्तः। आसुरं सर्गं मे -मम वचनात्, शृणु ॥ ६ ॥

आसुरीं विवृणोति 'प्रवृत्तिं च' इत्यादिद्वादशभिः–

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥

98. द्वौ भूतसर्गौ इत्युच्येते ॥ (शं. भा.)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आसुराः - असुरस्वभावा जनाः, प्रवृत्तिं - धर्मे प्रवर्तनं, निवृत्तिं - अधर्मान्निवर्तनं च, न विदुः - न जानन्ति, तेषु आसुरेषु, शौचं, - शुचित्वं, न विद्यते - नास्ति । आचारः सदाचारश्च, न विद्यते। सत्यं च न विद्यते ॥ ७ ॥

किं च–

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥ ८ ॥

ते - आसुराः जनाः जगत् असत्यं, न विद्यते सत्यं श्रुतिस्मृत्यादि प्रामाण्यं यस्य तत्, आहुः। वेदादिप्रामाण्यं न मन्यन्त इत्यर्थः । तदुक्तम्–

'त्रयो वेदस्य कर्तारो मुनिदम्भनिशाचराः'

इत्यादि । अत एव, अप्रतिष्ठं, न विद्यते प्रतिष्ठा - धर्माधर्मरूपा यस्य तत् । स्वाभाविकं जगद्वैचित्र्यम् आहुश्च । अत एव, अनीश्वरं, न विद्यते ईश्वरो नियामको यस्य तत्, आहुश्च । तर्हि कुतोऽस्य जगत उत्पत्तिं वदन्ति ? इत्यत्राह, अपरस्परसम्भूतं, अपरश्च परश्च अपरस्परं, अन्योन्यं स्त्रीपुंसमिथुनं, तस्मात् सम्भूतं जगत् । किमन्यत् कारणमस्य नास्त्यन्यत् किञ्चित् किन्तु कामहैतुकमेव, कामहैतुकं एव स्त्रीपुरुषयोः कामप्रवाहरूपेण हेतुः अस्य इति आहुः इत्यर्थः ॥ ७ ॥

अपि च–

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ९ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतां, लोकायतिकानां, दृष्टिं - दर्शनं, 'दृष्टिर्ज्ञानेऽक्षदर्शन' इत्यभिधानात्, अवष्टभ्य - अवलम्ब्य नष्ट - अदृष्ट आत्मा - देहातिरिक्त आत्मा यैस्ते नष्टात्मानः, अल्पबुद्धयः - दृष्टार्थमात्रबुद्धयः, अत एव, उग्रकर्माणः, उग्रं - हिंस्रं कर्म येषां ते, अहिताः - शत्रवः, भूत्वा, जगतः क्षयाय - नाशाय, प्रभवन्ति - उद्भवन्ति ॥ ९ ॥

किञ्च -

कामभाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वाऽसद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः ॥ १० ॥

दुष्पूरं - पूरयितुमशक्यं, दुष्प्रापमित्यर्थः। काम आश्रित्य, तत्सिसाधयिषया, मोहात् - अज्ञानात्, असद्ग्राहान्[99] - असन्तः - अन्यायगृहीताश्च ते ग्राहाः परिग्राहाः तान्, गृहीत्वा, अशुचीनि - अशास्त्रविहितानि, व्रतानि येषां ते अशुचिव्रताः, दम्भमानमदान्विताः, प्रवर्तन्ते ॥ १० ॥

किञ्च—

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥

प्रलयः - मरणं, अन्तः यस्यास्तां प्रलयान्तां, - अपरिमेयां अपरिच्छेद्यां, चिन्तां आश्रिताः नित्यचिन्ता, परा इत्यर्थः। कामोपभोग एव परमः पुरुषार्थो येषां ते कामोपभोगपरमाः । एतावदिति - कामोपभोग एव

99. असद्ग्रहान् - अशुभनिश्चयान् (शं. भा)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

परमः पुरुषार्थो नान्यदस्तीति निश्चिताः सञ्जातनिश्चयाः, अर्थसञ्चयान्, ईहन्त इत्युत्तरेणान्वयः ॥ ११ ॥

यत एवमतः—

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्॥ १२॥

आशापाशशतैर्बद्धाः, आशा एव पाशाः, तेषां, शतैः बद्धाः - सर्वत आकृष्यमाणाः कामक्रोधपरायणाः कामक्रोधो परं अयनं - आश्रयो येषां ते । कामोपभोगार्थं - कामोपभोगप्रयोजनाय, अन्यायेन - परस्वापहरणादिना, अर्थसञ्चयान् - धनराशीन्, ईहन्ते - चेष्टन्ते । आंदातुमिच्छन्तीति भावः ॥ १२ ॥

तेषां मनोराज्यप्रकारमाह—

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति मनोरथम्॥ १३॥

अद्य मया इदं धनं, लब्धं, इमं मनोरथं, - मनसः, प्रियं, प्राप्स्ये, आत्मनेपदमार्षम् । इदं धनं, मे - मम अस्ति, इदं धनं, मे - मम, आगामि संवत्सरे, पुनः भविष्यति । तेनाहं धनी विख्यातो भविष्यामीति भावः। इत्यज्ञानविमोहिताः सन्तः, नरके पतन्तीति चतुर्थेनान्वयः ॥ १३ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किञ्च—

अस्सौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी॥ १४॥

असौ- दुर्जयो देवदत्तनामा, शत्रुः मया, हतः अपि च, अपरान् - अन्यान् शत्रून्, हनिष्ये। अहं ईश्वरः- स्वामी, अहं सर्वप्रकारेण च, भोगी अहं, सिद्धः पुत्रपौत्रादिभिस्सम्पन्नः, अहं बलवान् सुखी च, इति, अज्ञानविमोहितास्सन्तः नरके पतन्तीति चतुर्थश्लोकेनान्वयः॥ १४॥

किञ्च—

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्ये इत्यज्ञानविमोहिताः॥ १५॥

आढ्यः - धनी, अभिजनवान् - सत्कुलवांश्च, अस्मि मया, धनादिभिः सदृशः, कोऽन्योऽस्ति ? नास्त्येवेत्यर्थः। यक्ष्ये - पराभिभवार्थ यागं करिष्यामि। नटादिभ्यो दास्यामि मोदिष्ये - हर्षमतिशयं प्राप्स्यामि च। इति एवं, अज्ञानविमोहिताः, अज्ञानं - अविवेकः, तेन विमोहिताः पतन्तीत्यनेनान्वयः॥ १५॥

किञ्च उक्तलक्षणलक्षितानां दुर्गतिमाह—

अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥ १६॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अनेकचित्तविभ्रान्ताः - उक्तप्रकारैरनेकैः चित्तैः[100] विविधं, भ्रान्ताः, मोहजालसमावृताः, मोहाः - अविवेकः तदेव जालं, तेन समावृताः काम भोगेषु कामोपभोगेषु, प्रसक्ताः सन्तः उपचितकल्मषाः, अशुचौ - कश्मले, नरके पतन्ति ॥ १६ ॥

यक्ष्य इति तेषां मनोरथः स केवलं दम्भाहङ्कारादिप्रधान एव न तात्विक इत्याशयेनाह -

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१७ ॥

आत्मसम्भाविताः, आत्मनैव सर्वगुणविशिष्टतया सम्भाविताः, न तु साधुभिः। स्तब्धा - अप्रणतात्मानः, धनमानमदान्विताः, धननिमित्तो मानः मदश्च, ताभ्यामन्विताः सन्तः, ते - अविवेकिनः, नामयज्ञैः - नाममात्रैर्यज्ञैः दीक्षितः सोमयाजीत्यादि नामप्रसिद्ध्यर्थमिति यावत्। दम्भेन, न तु श्रद्धया। अविधिपूर्वकं - यथा तथा - इतिकर्तव्यतारहितं, यजन्ते ॥ १७॥

तदेव विशिनष्टि-

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १८॥

ये अहङ्कारं - अहमेव सर्वं करोमि इत्येवंरूपं, तथा बलं सर्वस्य करणे मद्बलमेव पर्याप्तं इत्येवं रूपं, दर्पं - मत्सदृशो न कश्चिदित्येवं रूपं, कामं

100. चित्तैः दुष्टसंकल्पैः (गू).

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवम्भूतस्य मम काममात्रेण सर्वं सम्पत्स्यत इत्येवंरूपं, **क्रोधं** - "मम येऽनिष्टकारिणस्तान् सर्वान् हनिष्यामि इत्येवं रूपं, **संश्रिताः आत्मपरदेहेषु**, आत्मनः- स्वस्य च, परेषां च देहः तेषु, तद्बुद्धिकर्मसाक्षिभूतं, **मां** - ईश्वरं, **प्रद्विषन्तः**[101] - अप्रीयमाणाः मच्छासनं अतिवर्तमानाः, **अभ्यसूयकाः** सद्गुणेषु दोषारोपणं कुर्वन्तः, असहमाना इति यावत् । यजन्ते ॥ १८ ॥

यत एवमतः—

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥

अहं द्विषतः - साधुद्वेषिणः **क्रूरान्** - अशुभकारिणः, **तान् नराधमान्, अजस्रं**, नित्यं, **संसारेषु** - संसारमार्गेषु - **आसुरीषु** - हिंसाक्रूरप्रायासुरसिंह-व्याघ्रादिषु **योनिष्वेव, क्षिपामि** - प्रक्षिपामि ॥ १९ ॥

न तेषां कदापि संसारनिवृत्तिरित्याह—

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ २० ॥

हे कौन्तेय मूढाः - अविवेकिनः, **जन्मनि जन्मनि** प्रतिजन्म, **आसुरीं, योनिम् आपन्ना** - प्रतिपन्नाः सन्तः, **मां अप्राप्यैव, ततः** - अनन्तरं, **अधमां** - निकृष्टतमां, क्रिमिकीटादिरूपां, **गतिं, यान्ति** ॥ २० ॥

101. प्रद्विषन्तः मच्छासनातिवर्तित्वं प्रद्वेषः तं कुर्वन्तः (गू)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आसुरीं सम्पदं सङ्क्षेपेण कथयन् तत्परिहार्यतामाह—

त्रिविधं नरकस्येदं द्वारं नाशनमात्मन:।
काम: क्रोधस्तथालोभस्तस्मादेतत्त्रयं त्यजेत्॥ २१॥

काम: क्रोध: तथा लोभ इति त्रिविधं - त्रिप्रकारं इदं, नरकस्य द्वारं, अत एव, आत्मन:, नाशनं - नाशकरं, तस्मात् कारणात्, एतत् - उक्तं, त्रयं कामादित्रयं,त्यजेत्॥ २१ ॥

तत्त्यागे फलमाह—

एतैर्विमुक्त: कौन्तेय तमोद्वारैस्त्रिभिर्नर:।
आचरत्यात्मनश्श्रेयस्ततो याति परां गतिम्॥ २२॥

हे कौन्तेय, एतै: - पूर्वोक्तै: काम: क्रोधो लोभ इति च, त्रिभि:, तमोद्वारै: तमसो - नरकस्य, द्वारै: विमुक्त:, नर: आत्मन:, श्रेय: मोक्षसाधनतपोयोगादिकं, आचरति - अनुतिष्ठति, तत:- तदाचरणात्, परां गतिं - शान्तिं, याति - मोक्षमित्यर्थ: ॥ २२ ॥

य: शास्त्रविधिमुत्सृज्य वर्तते कामकारत:।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥ २३॥

य: शास्त्रविधिं - कर्तव्याकर्तव्यज्ञानकारणं विधिप्रतिषेधाख्यम् इत्यर्थ:। उत्सृज्य कामकारत: - यथेच्छं, वर्तते स: पुरुष: - सिद्धिं पुरुषार्थयोग्यतां,[102]

102. पुरुषार्थयोग्यतां - अन्त:करणशुद्धिम्

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नावाप्नोति, सुखं च - अस्मिन् लोके सुखमपि, नाप्नोति, परां गतिं - स्वर्गं वा मोक्षं, वा नावाप्नोति ॥ २३ ॥

यस्मादेवम्–

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ २४ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्याय: ॥

तस्मात् - कारणात्, कार्याकार्यव्यवस्थितौ - कर्तव्याकर्तव्यव्यवस्थायां, ते - तव, शास्त्रं - श्रुतिस्मृत्यादिप्रमाणं, ज्ञानसाधनम्। अत:, शास्त्रमेव विधानं, - कुर्यान्न कुर्यादित्येवं रूपो विधि:, तेन, उक्तं, कर्म - स्वकर्म, ज्ञात्वा इह - कर्माधिकारे वर्तमानो यथाधिकारं, कर्म कर्तुं, अर्हसि । चित्तशुद्धितत्वज्ञानमुक्तीनां तन्मूलत्वात् ॥ २४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य ब्रह्मानन्दसरस्वतीस्वामिशिष्यरामचन्द्रा
नन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां
दैवासुरसम्पद्विभागयोगोनाम षोडशोऽध्याय: ॥

॥ सप्तदशोऽध्याय: ॥

पूर्वाध्यायान्ते तस्माच्छास्त्रं प्रमाणं 'ते' इति भगवद्व्याख्यालब्ध-प्रश्नबीजोऽर्जुन उवाच–

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विता:।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तम: ॥ १ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे कृष्ण, ये - केचिदविशेषिताः, शास्त्रविधिं - श्रुतिस्मृतिचोदनां, उत्सृज्य- शास्त्राचार्योपदेशमज्ञात्वेत्यर्थः । श्रद्धापदग्रहणात् श्रद्धया - आस्तिक्यबुद्ध्या वृद्ध व्यवहारदर्शनात् अन्विताः सन्तः, यजन्ते - देवादीन् पूजयन्ति, तेषां निष्ठा - अवस्थानं, का - कीदृशी सत्त्वं किं, आहोस्वित् किं रजः, उत तमः तेषां, देवादिपूजा सात्विकी वा राजसी वा, तामसी वा, इत्यर्थः ॥ १ ॥

एवं पृष्टः शास्त्रविहितश्रद्धया तत्पूर्वकस्य यागादेश्च निष्फलत्वं हृदि निधाय शास्त्रीयस्य यागादेरेव गुणतस्त्रैविध्यं प्रतिपादयितुं शास्त्रीयश्रद्धात्रैविध्यं श्रीभगवानुवाच -

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥

देहिनां स्वभावजा - स्वभावात् अभिव्यक्तजन्मान्तरकृतधर्माधर्मादि संस्कारात् जाता, सा - श्रद्धा, सात्विकीति - सत्त्वनिर्वृत्ता, देवपूजादिविषया, राजसीति - रजोगुणनिर्वृत्ता यक्षरक्षः पूजादिविषया तामसी - तमोनिर्वृत्ता प्रेतपिशाचपूजाविषया इति त्रिविधा त्रिप्रकारा भवति, तां - श्रद्धां, मे - मत्तः पञ्चम्यर्थे षष्ठी, शृणु ॥ २ ॥

यद्यपि श्रद्धा सत्त्ववृत्तिरेव तथापि रजस्तमोमिश्रत्वेन त्रिविधा इत्याह—

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्ध स एव सः ॥ ३ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे भारत! सर्वस्य - प्राणिजातस्य, सत्त्वानुरूपा सत्त्वगुणतारतम्यानुसारिणी, श्रद्धा, भवति तस्मात्, अयं पुरुषः संसारी जीवः, श्रद्धामयः श्रद्धाप्रचुरः अतः यः - पुरुषः, यच्छ्रद्धः - यादृशी - यद्गुणप्रचुरा श्रद्धा यस्य सः। भवति स पुरुषः, स एव - तच्छ्रद्ध एवेत्यर्थः ॥ ३ ॥

ततश्च कार्येण लिङ्गेन देवादिपूजया सत्त्वादिनिष्ठा अनुमेयेत्याह—

यजन्ते सात्विका देवान्यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४ ॥

सात्विकाः- सत्त्वनिष्ठाः, देवान्[103], यजन्ते - पूजयन्ति, राजसाः, यक्षरक्षांसि[104] - यजन्ते । अन्ये - इतरे, तामसा जनाः, प्रेतान्,[105] भूतगणान् - सप्तमातृकादीन् यजन्ते ॥ ४ ॥

एवं शास्त्रीयेष्वेव यागादिषु श्रद्धायुक्तेषु गुणतः फलविशेषः । अशास्त्रीयेषु न कश्चिदपि सुखलवः अपि तु अनर्थ एवेति हृदि निहितं व्यञ्जयन्नाह द्वाभ्याम्—

अशास्त्रविहितं घोरं तप्यन्ते ये तपोजनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥

दम्भाहङ्कारसंयुक्ताः दम्भश्चाहङ्कारश्च ताभ्यां संयुक्ताः. कामराग बलान्विताः, कामरागाभ्यां कृतं [106]बलं तेनान्विता ये जनाः, अशास्त्रविहितं,

103. देवः - वस्वादयः (आ)

104. यक्षाः - कुबेरादयः (आ) रक्षांसि - नैर्ऋतादयः (आ)

105. स्वधर्मात् प्रच्युताः विप्रादयः देहपातात् ऊर्ध्वं वायुदेहमापन्नाः प्रेताः (आ)

106. बलं - 'अवश्यम् इदं साधयिष्यामि' इति आग्रहः (गु)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अविधिचोदितं, घोरं आत्मन: परेषां च पीडाकरं, तप:, तप्यन्ते। तानासुरनिश्चयान्विद्धीति उत्तरेणान्वय: ॥ ५ ॥

किञ्च -

कर्शयन्त: शरीरस्थं भूतग्राममचेतस:।
मां चैवान्त: शरीरस्थं तान्विद्ध्यासुरनिश्चयान्॥ ६॥

ये, अचेतस: - अविवेकिन: शरीरे तिष्ठतीति तं शरीरस्थ: भूतग्रामं करणसंघातं, च, अन्तश्शरीरस्थं - तत्कर्म बुद्धिसाक्षिभूतं, मां च, कर्शयन्त:- कृशीकुर्वन्त: मदनुशासनाकरणमेव मत्कर्शनमिति भाव:। ये तप्यन्ते, तान्, आसुरनिश्चयान्, असुराणामयं निश्चयो येषां तान्, आसुरनिश्चयान्, विद्धि। परहरणार्थं विद्धि इत्युपदेश: ॥ ६ ॥

आहारादिभेदादपि सात्विकादिभेदं दर्शयितुं आह त्रयोदशभि:—

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रिय:।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥

सर्वस्य - सर्वजनस्य, त्रिविध: - त्रिप्रकार:, आहार: भोजनमपि, प्रिय: - इष्टं भवति, तथा - तेन, प्रकारेण, यज्ञ:, तथा तप:, तथा, दानं त्रिप्रकारं प्रियमित्यर्थ: तेषां - आहारादीनां, इमं - वक्ष्यमाणं, भेदं,शृणु। अत्र आहारादीनां सत्वलिङ्गानां उपादानार्थं रजस्तमोलिङ्गानां परिवर्जनार्थं च तानि विवेचयामि, शृण्विति भगवदाशय: ॥ ७ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्र सात्विकाहारमाह–

आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ॥ ८ ॥

रस्याः रसोपेताः स्निग्धाः स्नेहवन्तः, स्थिराः देहे - रसांशेन चिरकालस्थायिनः हृद्याः - हृदयप्रियाः अत एव आयुस्सत्व-बलारोग्यसुखप्रीतिविवर्धनाः, आयुः - जीवनं सत्त्वं - उत्साहः बलं - शक्तिः आरोग्यं - रोगराहित्यं, सुखं - मनः प्रसादः प्रीतिः अभिरुचिः, तासां, विवर्धनाः, आहाराः सात्विकप्रियाः, सात्विकस्य, प्रियाः - इष्टाः ॥ ८ ॥

राजसाहारमाह–

कट्वम्ललवणात्युष्णा तीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥

अतिशब्दः कट्वादिषु सप्तस्वपि सम्बध्यते। अतिकटुः - निम्बादिः, अत्याम्लः अतिलवणः अत्युष्णः अतितीक्ष्णः मरीच्यादिः अतिरूक्षः कोद्रवादिः, अतिविदाही, सर्षपादिः, एते, आहारा राजसस्येष्टाः, दुःखशोकामयप्रदाः दुःखं - तात्कालिकहृदयसन्तापादिः, शोकः - पश्चाद्भाविदौर्मनस्यं, आमयो - रोगः, एतान् प्रददतीति तत्प्रदाः ॥ ९ ॥

तामसाहारमाह–

यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत्, भोजनं यातो, यामः - प्रहरो यस्य तत्। पक्वमोदनं शैत्यावस्थां प्राप्तमित्यर्थः। यद्वा, यातो यामः पचनसमये उपरमो यस्य, तद्यातयामं, अपक्वमित्यर्थः। गतो - निष्पीडनाद्विगतः, रसः यस्य तत्, गतरसं, पूति - दुर्गन्धि, पर्युषितं - दिनान्तर पक्वं, उच्छिष्टं - अन्यभुक्तावशिष्टं, अमेध्यं अपवित्रं अयज्ञार्हं, तद्भोजनं - आहारः तामसप्रियं - तामसस्य प्रियम्॥ १०॥

अथ सात्विकयज्ञमाह—

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्विकः॥ ११॥

विधिदृष्टः - शास्त्रचोदनादृष्टः, यज्ञः अफलाकाङ्क्षिभिः - फलाकाङ्क्षारहितैः पुरुषैः, यष्टव्यमेवेति - यज्ञस्वरूपनिर्वर्तनमेव कार्यमिति मनस्समाधाय, 'एतावानेव पुरुषार्थो मम कर्तव्य' इत्येवं निश्चित्य, इज्यते - क्रियते स यज्ञः, सात्विकः॥ ११॥

राजसयज्ञमाह—

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥ १२॥

हे भरतश्रेष्ठ, यत् - यो यज्ञ इत्यर्थः। कृत्यफलं अभिसन्धाय - उद्दिश्य, दम्भार्थमपि च - महत्त्वख्यापनाय, य इज्यते - क्रियते, तं - यज्ञं, राजसं, विद्धि॥ १२॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तामसं यज्ञमाह–

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥

विधि:- यथाचोदितं, तेन हीन: - रहित: तं विधिहीनं असृष्टं अदत्तं, अन्नं, यस्मिन् तं, असृष्टान्नम् मन्त्रहीनं, मन्त्रा: स्वरवर्णरूपा:, तैर्हीनं मन्त्रहीनम् अदक्षिणं - उक्तदक्षिणारहितं, श्रद्धाविरहितं च यज्ञं, तामसं तमोगुणनिर्वृत्तं, परिचक्षते - कथयन्ति, बुधा इति शेष: ॥ १३॥

अथ तपस्त्रैविध्ये शारीरं तप आह–

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥

देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च गुरुव्यतिरिक्ता: तत्त्वविद:, तेषां, च पूजनं, शौचं - शुचित्वं, आर्जवं ऋजुत्वं, ब्रह्मचर्यं च, अहिंसा च, शारीरं - शरीरनिर्वर्त्यं, शरीरप्रधानै: सर्वैरेव कर्त्रादिभि: साध्यमित्यर्थ: । तप उच्यते ॥ १४ ॥

वाङ्मयं तपस्तु–

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥

अनुद्वेगकरं - प्राणिनामदु:खकरं, सत्यं प्रियहितं, प्रियं च तत् हितं, च परेषां सुखकरं यद्वाक्यं, च स्वाध्यायाभ्यसनं, स्वाध्याय:- वेद:

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्य, अभ्यस्यत इत्यभ्यसनं चैव तत् वाङ्मयं - वाचा निर्वर्त्यं, तप इत्युच्यते ॥ १५॥

मानसं तप आह—

मन:प्रसाद: सौम्यत्वं मौनमात्मविनिग्रह:।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥ १६॥

मन:प्रसाद: - मनश्शन्ति: **सौम्यत्वं** - सौमनस्यं, मुखादिप्रसादकार्यम् अन्त: करणवृत्तिरित्यर्थ:। **मौनं** - वाक्संयम:, **आत्मविनिग्रह:** मनस्संयम:, **भावसंशुद्धि:** - परैर्व्यवहारकाले अमायावित्वं, इत्येतत् मानसं तप: उच्यते॥ १६॥

उक्ततपस: सत्त्वादिभेदेन त्रैविध्यमाह—

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरै:।
अफलाकाङ्क्षिभिर्युक्तै:सात्विकं परिचक्षते॥ १७॥

अफलाकाङ्क्षिभि: - फलाकाङ्क्षारहितै: **युक्तै:** - समाहितै: **नरै:**, **परया श्रद्धया** - आस्तिक्यबुद्ध्या, **तप्तं**, **तत्तप:** **त्रिविधं** - वाङ्मन: कायकृतं, **सात्विकं**, सत्वनिर्वृत्तं, **परिचक्षते** - कथयन्ति॥ १७॥

किञ्च—

सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥ १८॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सत्कारः - वाचा प्रशंसा, मानं - कायेन नमस्कारादिः, पूजा अर्थ लाभादिः फलाभिसन्धिपूर्वकं तदर्थं सत्कारमानपूजार्थं च, दम्भेन च, यत्तपः, क्रियते, तत् - तपः इह - अत्र, चलं - चञ्चलं, अध्रुवं - क्षयिष्णु, राजसं रजोनिर्वृत्तं, इति प्रोक्तम् ॥ १८ ॥

किं च–

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥

मूढग्राहेण - अविवेकनिश्चयेन, आत्मनः - संघातस्य पीडया च परस्य - अन्यस्य, उत्सादनार्थं - विनाशार्थं वा, आभिचाररूपं, यत्, तपः, क्रियते, तत्तपः, तामसमिति, उक्तं - उदाहृतम् ॥ १९ ॥

अथ दानभेदमाह –

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥

दातव्यमित्येवं मनः कृत्वा, यद्दानं, देशे - कुरुक्षेत्रादौ पुण्यदेशे, काले- ग्रहणादौ, पात्रे - पात्राय श्रुतशीलादिसम्पन्नाय ब्राह्मणायेत्यर्थः । चतुर्थ्यर्थे सप्तमी । अनुपकारिणे - अकृतोपकाराय प्रत्युपकारासमर्थाय, च दीयते, तद्दानं, सात्त्विकं, इति स्मृतम् ॥ २० ॥

किञ्च -

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥ २१ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत्तु - दानं, फलं - स्वर्गादिकं, उद्दिश्य वा, पुन:, प्रत्युपकारार्थं वा, परिक्लिष्टं मन: क्लेशसंयुक्तं यथा तथा, दीयते, तद्दानं, राजसं, इति, उदाहृतम् ॥ २१ ॥

किञ्च -

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥

यत् दानं अदेशकाले, 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इति एकवद्भाव:। अदेशे - अपुण्यदेशे, म्लेच्छाशुच्यादिसङ्कीर्णे, अकाले - पुण्यहेतुत्वेनाप्रख्याते ग्रहणादिविशेषरहित इत्यर्थ:। अपात्रेभ्य: - नटविटगायककामुकादिभ्य: दीयते, किं च, देशादिसम्पत्तौ च, असत्कृतं - प्रियवचनपादप्रक्षालनपूजादिरहितं, अवज्ञातं - पराभवयुक्तं, तद्दानं, तामसमिति उदाहृतम् ॥ २२ ॥

यद्यप्यस्मिन् लोके यज्ञतपोदानादि राजसतामसप्रायमेव, तथापि, तत्साद्गुण्यकरणोपायमाह—

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविध: स्मृत:।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिता: पुरा ॥ २३ ॥

ओं तत् सत् इत्येवं, त्रिविध:, ब्रह्मण:- परमात्मन: निर्दिश्यतेऽनेनेति निर्देश: नामोच्चारणं, स्मृत:- वेदान्तविद्भि: चिन्तित: तेन - त्रिविधनिर्देशेन, ब्राह्मणाश्च, वेदाश्च, यज्ञाश्च, पुरा विहिता: - निर्मिता: त्रिधा निर्दिष्टेन परमात्मना, ब्राह्मणादय: पवित्रतमा: सृष्टा:। तस्मात् तस्यायं निर्देशोऽतिप्रशस्त इति भाव: ॥ २३ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यस्मादेवम्—

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥ २४॥

तस्मात् - कारणात्, विधानोक्ताः - शास्त्रचोदिताः, ब्रह्मवादिनां - वेदवादशीलानां, यज्ञदानतपःक्रियाः, सततं, सर्वदा, ओं इत्युदाहृत्य उच्चार्य कृताः प्रवर्तन्ते॥ २४॥

द्वितीयं नाम विवृणोति—

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥ २५॥

मोक्षकाङ्क्षिभिः- मुमुक्षुभिः, तदिति ब्रह्माभिधानमुच्चार्य, यज्ञादिकर्मणः फलं अनभिसन्धाय अभि[107]सन्धानमकृत्वा, यज्ञतपःक्रियाः, यज्ञस्य, तपसश्च, क्रियाः, विविधाः, दानक्रियाश्च क्रियन्ते॥ २५॥

ओं तच्छब्दयोर्विनियोग उक्तः। सम्प्रति सच्छब्दस्य विनियोगमाह द्वाभ्याम् —

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥ २६॥

107. अभिसन्धानम् अकृत्वा - फलाभिसन्धिमकृत्वा इत्यर्थः।

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे पार्थ, सद्भावे - अस्तित्वे, देवदत्तस्य पुत्रादिकमस्ति इत्यस्मिन्नर्थे, साधुभावे - साधुत्वे च, देवदत्तस्य पुत्रादिकं श्रेष्ठमित्यस्मिन्नर्थे च, सदित्येतत्-पदं, प्रयुज्यते। तथा, प्रशस्ते - माङ्गलिके, कर्मणि - विवाहादिके, सच्छब्दः-सदित्येतच्छब्दः, प्रयुज्यते। सदिदं कर्मेति सङ्गच्छत इत्यर्थः ॥ २६ ॥

किञ्च -

यज्ञे तपसि दाने च स्थितिःसदिति चोच्यते।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७॥

यज्ञे च, तपसि, दाने, च, तात्पर्येण, स्थितिः - अवस्थानं, सदिति चोच्यते। विद्वद्भिरिति शेषः। किं च, तदर्थीयं - परमेश्वरार्थीयं, कर्म चैव, सदित्यभिधीयते कथ्यत एव। तदेतत् यज्ञतप आदिकर्म, असात्विकं, विगुणमपि श्रद्धापूर्वकं ब्रह्माभिधानत्रय प्रयोगेण सगुणं सात्विकं सत् श्रद्धा सम्पादितं भवति ॥ २७॥

श्रद्धाहीनस्य सर्वं कर्म निष्फलमित्याह—

अश्रद्धयाहुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥

हे पार्थ, यत्, अश्रद्धया, हुतं, हवनं, कृतं दत्तं, विप्रेभ्य इति शेषः। तपस्तप्तं स्तुतिनमस्कारादि, तत्सर्वं असदित्युच्यते। मत्प्राप्ति-

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

साधनमार्गबाह्यत्वात्। यतः, इह - अस्मिन् लोके, न फलति अयशस्करत्वात्, प्रेत्य लोकान्तरे न फलति विगुणत्वात् ॥ २८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीस्वामिशिष्यरामचन्द्रा नन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥

॥ अष्टादशोऽध्यायः ॥

सर्वस्यैव गीताशास्त्रस्यार्थं उपसंहृत्य वक्तव्य इति अयम् अध्याय आरभ्यते अत्र तु संन्यासत्यागशब्दार्थयोः विशेषं बुभुत्सुः अर्जुन उवाच—

सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

केशी नाम हयच्छद्मासुरः, तं निषूदयति इति केशिनिषूदनः, तस्य सम्बुद्धिः हे केशिनिषूदन अत एव हे महाबाहो। हे हृषीकेश! संन्यासस्य सन्न्यासशब्दार्थस्य - त्यागस्य - त्यागशब्दार्थस्य च, तत्त्वं तस्य भावः तत्त्वं-याथार्थ्यं, पृथग् वेदितुं-ज्ञातुं, इच्छामि-तत् ब्रूहीति भावः ॥ १ ॥

यद्यपि संन्यासश्च त्यागश्च पूर्वमुक्तौ, तथापि अनिर्णीताशयत्वेन पृष्टवन्तम् अर्जुनं प्रति उत्तरं श्रीभगवानुवाच—

काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कवय: - केचित्पण्डिता:, कामयितुं योग्यानि काम्यानि अश्वमेधादीनि, तेषां कर्मणां, **न्यासं** - त्यागं, सन्यास शब्दार्थं, विदु: जानन्ति । **विचक्षणा:** पण्डिता: **सर्वकर्मफलत्यागं** सर्वाणि - नित्यनैमित्तिकानि कर्माणि, तेषां फलस्य त्याग:, तं त्यागं, त्यागशब्दार्थम् आहु: । यदि काम्यकर्मपरित्यागो वा फलपरित्यागो वा अर्थो वक्तव्य: सर्वथा परित्यागमात्रं संन्यासत्यागशब्दयो: एकोऽर्थ: । अत: त्यागन्यासौ घटपटाविव न भिन्नाविति भाव: ॥ २ ॥

सन्न्यासिनां केवलं कर्मफलासम्बन्धं दर्शयन्, अंसंन्यासिनां नित्यकर्मफलप्राप्तिं दर्शयति—

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिण: ।
यज्ञदानतप: कर्म न त्याज्यमिति चापरे ॥ ३ ॥

एके मनीषिण:- सांख्यादिदृष्टिमाश्रिता: पण्डिता:, कर्मयोगोदिकं, दोषवत् - रागादिदोष इव, त्याज्यम् इति, प्राहु: - अपरे कर्मनिष्ठा:, न तु ज्ञानिन: यज्ञदानतप: कर्म न त्याज्यम् इत्याहु : ॥ ३ ॥

एवं मतभेदमुपन्यस्य स्वमतं कथयति—

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविध:सम्प्रकीर्तित: ॥ ४ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे भरतसत्तम ! भरतवंश्यश्रेष्ठ, तत्र - त्यागे, मे - मम, निश्चयं शृणु । हे पुरुषव्याघ्र - पुरुषश्रेष्ठ, हि - यस्मात्, त्यागः त्रिविधः[108] त्रिप्रकारः सम्प्रकीर्तितः सम्यक् शास्त्रेषु कथितः ॥ ४ ॥

तं निश्चयमाह—

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥

यत्, यज्ञदानतपः कर्म, यज्ञो दानं तप इत्येतत्त्रिविधं, कर्म, तत्, कार्यं- कर्तव्यं, न त्याज्यमेव । तस्मात्, यज्ञश्च, दानं च तपश्च, मनीषिणां - फलानभिसन्धीनां पण्डितानां, पावनानि - विशुद्धिकराण्येव ॥ ५ ॥

येन प्रकारेण कृतान्येतानि पावनानि भवन्ति तत्प्रकारं दर्शयन् आह—

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६ ॥

हे पार्थ, एतानि - पूर्वोक्तानि यज्ञादीनि कर्माणि, सङ्गं कर्मणि ममकारं च फलानि च, त्यक्त्वा कर्तव्यानीति, निश्चितं, मे- मम- मतं संमतं उत्तमं उत्कृष्टम् ॥ ६ ॥

अनात्मविदा नित्यकर्म न त्याज्यमिति दर्शयन् त्यागत्रैविध्यमाह—

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागः तामसः परिकीर्तितः ॥ ७ ॥

108. त्रिविधः - तामसादिप्रकारैः (शं.भा)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नियतस्य - नित्यस्य, कर्मणः सन्न्यासः, न उपपद्यते - अज्ञस्य नोपयुज्यते । कर्मणश्चित्तशुद्धिकरत्वात् । अतः मोहात् - अज्ञानात् तस्य नित्यकर्मणः, परित्यागः, तामस इति परिकीर्तितः ॥ ७ ॥

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥

यः कायक्लेशभयात् - शरीरदुःखभयादेव, यत् नित्यं कर्म, दुःखमिति, त्यजेत्, स- पुरुषः, राजसं - रजोगुणनिर्वृत्तं, त्यागं कृत्वा, त्यागफलं, त्यागस्य ज्ञानपूर्वत्यागस्य, फलं - मोक्षं, न लभेदेव ॥ ८ ॥

किञ्च—

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागःसात्विको मतः ॥ ९ ॥

हे अर्जुन सङ्गं, फलं च, त्यक्त्वा, यत् नियतं - नित्यकर्म, कार्यं इत्येव - कर्तव्यमित्येव, क्रियते, स त्यागः सात्विक इति मतः ॥ ९ ॥

एवम्भूतसात्विकपरित्यागनिष्ठितस्य लक्षणमाह—

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्यते ।
त्यागी सत्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

सत्वसमाविष्टः, सत्वेन - आत्मज्ञानविवेकहेतुना समाविष्टः संयुक्तः अत एव, मेधा - आत्मज्ञानप्रज्ञा अस्यास्तीति मेधावी, अत एव च्छिन्नोऽविद्याकृतः, संशयो येन स छिन्नसंशयः, त्यागी, अकुशलं -

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अशोभनं काम्यं कर्म, न द्वेष्टि। एतत् संसारकारणं किमनेनेत्येवं, अप्रीतो न भवति। कुशले - शोभने नित्यकर्मणि, नानुषज्यते। सत्वशुद्धिज्ञानोत्पत्ति तन्निष्ठाहेतुत्वेन, मोक्षकारणमिति प्रीतिं न करोतीत्यर्थः ॥ १० ॥

अनात्मविदः कर्मफलत्याग एव न तु स्वकर्मत्याग इत्याह—

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागि स त्यागीत्यभिधीयते ॥ ११ ॥

हि - यस्मात्, देहं बिभर्तीति देहभृत् - देहाभिमानवान् तेन अशेषतः- अशेषेण, कर्माणि त्यक्तुं - संन्यसितुं, न शक्यं - न शक्यत इत्यर्थः। यस्तु- देहाभिमानी - अज्ञ इति यावत्, कर्मफलत्यागी, कर्मणां नित्यानां क्रियमाणानां, फलं त्युक्तुं शीलमस्य स त्यागी इति अभिधीयते - कथ्यते ॥ ११ ॥

फलं त्यक्त्वा कर्म कर्तुः अज्ञस्यापि बन्धनिवृत्तिःभवति नान्यस्य इत्याह —

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥ १२ ॥

अनिष्टं - नरकादिलक्षणमिति, इष्टं, देवादिलक्षणमिति, मिश्रं - इष्टानिष्टसंयुक्तं मनुष्यलक्षणं चेति, त्रिविधं, कर्मणः- धर्माधर्मलक्षणस्य,

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

फलं - अत्यागिनां - कर्मफलात्यागिनां, प्रेत्य - परत्र भवति सन्न्यासिनां तु - कर्मफलत्यागिनां तु क्वचिदपि, कर्मफलं न भवति ॥ १२ ॥

ननु भुक्तवतः तृप्तिरिव, कर्म कुर्वतः कर्मफलं कथं न भवेत् इत्याशङ्क्य, सङ्गत्यागिनो निरहङ्कारस्य सतः कर्मलेपो नास्ति इति उपपादयितुम् आह-पञ्चैतानिति त्रिभिः—

पञ्चैतानि महाबाहो कारणानि निबोध मे।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥

हे महाबाहो ! सर्वकर्मणां, सिद्धये निष्पत्तये, कृतान्ते[109] - सिद्धान्ते, ज्ञातव्याः पदार्थाः संख्यायन्तेऽस्मिन्निति सांख्यं - वेदान्तः, तस्मिन्, सांख्ये, प्रोक्तानि एतानि - वक्ष्यमाणानि, पञ्च कारणानि निर्वर्तकानि, मे - मम, वचनानीति शेषः । निबोध जानीहि ॥ १३ ॥

तानि कानीत्यत्राह—

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४ ॥

अधिष्ठानं देहः - तथा कर्ता - चिदचिद्ग्रन्थिः अहङ्कारः पृथग्विधं - शब्दाद्युपलब्धये नानाप्रकारं करणं श्रोत्रादि, विविधाः च - कार्यतः स्व-रूपतश्च, पृथक् - पृथग्भूता, चेष्टाः प्राणव्यापाराश्च, चतुर्षु उक्तेषु

109. कृतान्ते इति वेदान्तशास्त्रविशेषणम् 'कृतम्' इति 'कर्म' उच्यते। तस्य अन्तः परिसमाप्तिः तत्त्वंज्ञानोत्पत्या यत्र तस्मिन् कृतान्ते शास्त्रे (गू)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अधिष्ठानादिषु पञ्चमं, दैवं चैव - चक्षुराद्यनुग्राहकं सूर्यादि पञ्चमकारणमित्यर्थः ॥ १४ ॥

तस्मादेव–

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५ ॥

नरः शरीरवाङ्मनोभिः, यत्कर्म, न्याय्यं - धर्म्यं वा, विपरीतं - अन्याय्यं वा, प्रारभते - उपक्रमते, तस्य कर्मणः, एते - अधिष्ठानादयः, पञ्च हेतवः ॥ १५ ॥

ततः किमत आह–

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥

तत्र - सर्वस्मिन् कर्मणि, एते पञ्चहेतव इति एवं सति, यः, आत्मानं, तु केवलं कर्तारं पश्यति स दुर्मतिः, अकृतबुद्धित्वात् - वेदान्ताचार्योपदेशन्यायेन स्वस्यासंस्कृतबुद्धित्वात्, न पश्यति ॥ १६ ॥

कः पुनःसम्यक् पश्यतीत्यत्राह–

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न विद्यते ।
हत्वापि स इमान् लोकान्न हन्ति न निबध्यते ॥ १७॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यस्य - शास्त्राचार्योपदेशन्याय संस्कृतात्मनः, **अहङ्कृतः** - 'अहं कर्ता इति कृतः, भावः भावना **नास्ति**, आत्मन्यविद्याकल्पिते अधिष्ठानादयः पञ्चैव कर्तारि, अहं तु तद्व्यापाराणां साक्षिभूतः केवलो निर्विकार इति एवं पश्यतीति भावः । **यस्य बुद्धिः** अन्तः करणं **न लिप्यते** इदमहमकार्षं, तेनाहं नरकं गमिष्यामि' इत्येवं नानु[110] शायिनी भवति, **स** सुमतिः पश्यति तात्पर्यम्, **इमान् लोकान्** जनान् प्राणिनः, लौकिकदृष्ट्या, **हत्वापि**, परमार्थस्य दृष्ट्या, **न हन्ति न निबध्यते** ॥ १७॥

सर्वमिदम् अकर्तृत्वाद्यनुसन्धानं सत्त्वगुणवृद्ध्यैव भवति । सत्त्वस्योपादेयताज्ञा- पनाय कर्मणि सत्वादिगुणकृतवैषम्यं प्रपञ्चयिष्यन् कर्मचोदनप्रकारमाह—

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥ १८ ॥

कर्मचोदना - कर्मभिश्चोदना[111] 'चोदना' चोपदेशश्च विधिश्चैकार्थवाचिनः[112] इति भट्टवचनात् । ज्ञानमिति ज्ञेयमिति परिज्ञातेति, **त्रिविधा**- त्रिप्रकारा कर्म सङ्गृह्यतेऽस्मिन्निति **कर्मसङ्ग्रहः** । क्रियतेऽनेनेति **करणं** श्रोत्रादि बाह्यम् अन्तस्थं च बुद्ध्यादि । 'कर्तुरीप्सिततमं **कर्म**'[113] । **कर्ता**[114]- करणानां व्यापारयिता, इति **त्रिविधः** ॥ १८ ॥

110. नानुशायिनी - नानुशयवती, नक्लेशशलिनी इत्यर्थः (आ)
111. चोदना इति प्रवर्तकम् उच्यते (गू)
112. अस्मिन् वचने क्रियाप्रवर्तकवचनत्वं यद्यपि चोदनापदशक्यतया प्रतीयते, तथापि वचनत्वं विहाय प्रवर्तकमात्रम् इह लक्ष्यते, ज्ञानादिषु वचनत्वाभावात्
113. कर्म संगृह्यते - समवैति अत्र इति कर्मसंग्रहः (गू)
114. चिदचिद्ग्रन्थि यः क्रियायाः निर्वर्तकः न तु कूटस्थ आत्मा ।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अथेदानीं क्रियाकारकफलानां सर्वेषां गुणात्मकत्वात् सत्वरजस्तमोगुणभेदत: त्रिविधो भेदो वक्तव्य इत्याह–

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदत: ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

गुणा: संख्यायन्ते अस्मिन्निति गुणसंख्यानं, तस्मिन् गुणसंख्याने कपिले शास्त्रे कापिलशास्त्रं गुणभोक्तृविषये प्रमाणत्वात् ज्ञानं च कर्म च क्रियाकारकं, कर्ताच क्रियाणां निर्वर्तक: । गुणभेदत: त्रिधैवेति प्रोच्यते - कथ्यते, तान्यपि - ज्ञानादीनि च, यथावत् - यथाशास्त्रं, शृणु ॥ १९ ॥

तत्र ज्ञानस्य त्रैविध्यमाह–

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् ॥ २० ॥

येन - ज्ञानेन, विभक्तेषु - भिन्नेषु, सर्वभूतेषु - अव्यक्तादिस्थावरान्तेषु, अविभक्तं - व्योमवदखण्डं, अव्ययं - नाशरहितं, एकं भावं - आत्मेति वस्तु, ईक्षते, तद् ज्ञानं, सात्विकं - सत्त्वनिर्वृत्तं, विद्धि ॥ २० ॥

किञ्च -

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ॥
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥

यद् ज्ञानं तु, सर्वेषु भूतेषु - पृथक्त्वेन - भेदेन - पृथग्विधान् - भिन्नप्रकारान्, भिन्नसुखदु:खादिलक्षणान्, नानाभावान्, नानाविधा वस्तुत एव

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भिन्नाश्च ते भावा आत्मन: तान्, वेत्ति तज्ज्ञानं राजसं, विद्धि ॥ २१ ॥

किञ्च—

यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् ।
अतत्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥

यद् ज्ञानं तु, एकस्मिन्, कार्ये देहे, बहिर्वा प्रतिमादौ, सक्तं सत् कृत्स्नवत् कृत्स्नं सर्वविषयमिव स्थितं अहैतुकं - निर्युक्तिकं, अत एव, अल्पं लघुत्वात्, अतत्वार्थवत् - अयमाभूतार्थं यत्, तत् ज्ञानं, तामसं - तमोगुणनिर्वृत्तमिति, उदाहृतं उक्तं, तामसानां प्राणिनामविवेकिनां ज्ञानमीदृशं दृश्यत इत्यर्थ: ॥ २२ ॥

अथ कर्मणस्त्रैविध्यमाह -

नियतं सङ्गरहितमरागद्वेषत: कृतम् ।
अफलप्रेप्सुनाकर्म यत्तत्सात्विकमुच्यते ॥ २३ ॥

यत् - कर्म, नियतं - नित्यं, सङ्गरहितं - आसक्तिवर्जितं, अफलप्रेप्सुना - अफलाभिसन्धिना कर्त्रा अरागद्वेषत: रागद्वेषाभावेन, कृतं, तत्कर्म सात्विकं उच्यते ॥ २३ ॥

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुन: ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कामेप्सुना - कामान् प्राप्तुमिच्छुना, फलाभिसन्धिना कर्त्रा, साहङ्कारेण अहमेव श्रोत्रिय इत्येवं रूपेण अहङ्कारेण वर्तत इति साहङ्कारस्तेन, वा बहुलायासं - बहुक्लेशं यत्कर्म क्रियते। पुनरिति पादपूरणार्थः । तत्कर्म राजसं इति उदाहृतम् ॥ २४ ॥

किञ्च—

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत् तामसमुच्यते ॥ २५ ॥

अनुबन्धं[115] - कर्मणि कृते सत्यनुबध्यमानं दुःखं क्षयं - कर्मणि क्रियमाणे अर्थविनाशः हिंसां - प्राणिपीडां, पौरुषं - पुरुषकारं, आत्मनः कर्मसमापनसामर्थ्यं अनवेक्ष्य - अविमृश्य, मोहात् - अविवेकात्, यत् कर्म, आरभ्यते, तत् - कर्म तामसं, इति, उदाहृतम् ॥ २५ ॥

अथ कर्तृभेदमाह—

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥ २६ ॥

मुक्तसङ्गः - परित्यक्तसङ्गः, अनहंवादी - अनहंवदनशीलः, धृत्युत्साहसमन्वितः, धृतिः - धैर्यं, उत्साहः - उद्यमः, ताभ्यां समन्वितः - संयुक्तः, सिद्ध्यसिद्ध्योः - आरब्धस्य कर्मणः सिद्धावसिद्धौ च, निर्विकारः अविकृतचित्तः कर्ता सात्त्विकः, उच्यते ॥ २६ ॥

115. पश्चाद्भावि यद्वस्तु सः अनुबन्धः, तं अनुबन्धम् (शं.भा)

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किञ्च—

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्ता राजसःपरिकीर्तितः ॥ २७॥

रागोऽस्यास्तीति रागी यशोऽर्थी, कर्मफलप्रेप्सुः- कर्मफलार्थी, लुब्धः- परद्रव्याभिलाषुकः तीर्थादौ स्वद्रव्यस्य च अपरित्यागी हिंसात्मकः- परपीडाकरस्वभावः, अशुचिः - बाह्याभ्यन्तरशौचवर्जितः हर्षशोकान्वितः - इष्टप्राप्तौ अनिष्टवियोगे च हर्षः, अनिष्टप्राप्तौ इष्टवियोगे च शोकः ताभ्यामन्वितः संयुक्तः, कर्ता, राजस इति परिकीर्तितः ॥ २७॥

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥

अयुक्तः- असमाहितः, प्राकृतः - अत्यन्तासंस्कृतबुद्धिः - बालिश इत्यर्थः । स्तब्धः - अनम्रः दण्डवत् कस्मैचित् न नमतीत्यर्थः । शठः मायावी, शक्तिगूहनकारीति यावत् नैष्कृतिकः परावमानी, अलसः - कर्तव्येष्वप्रवृत्तिशीलः विषादी - विषादवान्, सर्वदा अवसन्नस्वभावः, दीर्घसूत्री - कर्तव्यानां दीर्धप्रसारणः सर्वदा मन्दस्वभावः, अद्य कर्तव्यं मासेनापि न करोतीत्यर्थः । कर्ता तामस उच्यते ॥ २८ ॥

इदानीं बुद्धेर्गुणतः त्रैविध्यं प्रतिजानीते—

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥ २९ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दिग्विजये प्रभूतं दैवं मानुषं च धनं जयतीति धनञ्जयः, तस्य सम्बुद्धिः हे धनञ्जय, अशेषेण निरवशेषतः, पृथक्त्वेन - विवेकेन, प्रोच्यमानं - कथ्यमानं, गुणतः - सत्त्वादिगुणतः त्रिविधं - त्रिप्रकारं बुद्धेश्च, धृतेश्च भेदं शृणु, इति सूत्रोपन्यासः ॥ २९ ॥

तत्रादौ सात्त्विकीं बुद्धिमाह—

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिःसा पार्थ सात्त्विकी ॥ ३० ॥

हे पार्थ, या बुद्धिः, अत्र ज्ञानं बुद्धेः वृत्तिः बुद्धिस्तु वृत्तिमती, धृतिरपि बुद्धेर्वृत्तिविशेष एवेति निर्णयः । प्रवृत्तिं - बन्धहेतुं - कर्ममार्गं च, निवृत्तिं मोक्षहेतुं ज्ञानमार्गं च, कार्याकार्ये - कर्तव्याकर्तव्ये, करणाकरणे इत्येके, भयाभये, भयं - शास्त्रातिक्रमणं, अभयं शास्त्रानतिक्रमणं, बन्धं - कथं बन्ध इति सहेतुकं, मोक्षं - कथं मोक्ष इति सहेतुकं, वेत्ति, सा बुद्धिः, सात्त्विकी ॥ ३० ॥

राजसीं बुद्धिमाह—

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिःसा पार्थ राजसी ॥ ३१ ॥

हे पार्थ, यया बुद्ध्या, धर्मं - धर्मशास्त्रचोदितं, अधर्मं प्रतिषिद्धं कार्यं,च, अकार्यमेव च, अयथावत् - न यथावत्, न सर्वतो निर्णयेन, प्रतिजानाति, सा बुद्धिः राजसी ॥ ३१ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
Acc.No ...
Acc.Date 2-4-25

तामसीं बुद्धिमाह—

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिःसा पार्थ तामसी ॥ ३२ ॥

हे पार्थ, या बुद्धिः तमसा - तमोगुणेन, आवृतासती, अधर्मं - प्रतिषिद्धं, धर्मं - विहितमिति सर्वार्थान्, सर्वे ज्ञेयाः पदार्थाः तान्, विपरीतांश्च[116] - व्यत्यस्तान्, मन्यते, सा बुद्धिः, तामसी ॥ ३२ ॥

अथ सात्विकीं धृतिमाह—

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिस्सा पार्थ सात्विकी ॥ ३३ ॥

हे पार्थ, योगेन - समाधिना, अव्यभिचारिण्या - अनन्यगामिन्या, यया, धृत्या, मनः प्राणेन्द्रियक्रियाः मनश्च प्राणश्च इन्द्रियाणि च तेषां, क्रियाः चेष्टाः, धारयते - नियच्छति[117], सा धृतिः, सात्विकी ॥ ३३ ॥

राजसीं धृतिमाह—

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिस्सा पार्थ राजसी ॥ ३४ ॥

हे अर्जुन - हे पार्थ, फलाकाङ्क्षी पुरुषः प्रसङ्गेन-प्रकृष्टसङ्गेन, धर्मकामार्थान्, धर्मश्च कामश्च अर्थश्च तान् यया धृत्या धारयते-मनसि नित्यमेव कर्तव्यरूपमवधारयते सा धृतिः राजसी ॥ ३४ ॥

116. विपरीतांश्च - 'च' कारः अवधारणार्थः । विपरीतानेव इत्यर्थः ।
117. नियच्छति - उच्छास्त्रप्रवृत्तेः निरुणद्धि ।

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तामसीं धृतिमाह-

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥

हे पार्थ! दुर्मेधाः कुत्सितप्रज्ञः पुरुषः यया धृत्या स्वप्नं-निद्रां, भयं-भीतिं शोकं-विषादं अवसादं विषण्णत्वमिति यावत्। मदं विषयानुभवजनितं न विमुञ्चति - न त्यजति। सा धृतिः तामसी ॥ ३५ ॥

अथेदानीं सुखस्य त्रिविधं भेदमाह-

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥

हे भरतर्षभ ! त्रिविधं सुखं इदानीं मे - मत्तः विभक्तिव्यत्यय आर्षः, शृणु। तत्र सात्विकं सुखमाह-अभ्यासादिति सार्धश्लोकेन। यत्र अस्मिन् सुखे अभ्यासात्-परिचयात्, रमते-रतिं प्राप्नोति, दुःखस्य-सांसारिक-दुःखस्य अन्तं-अवसानं, दुःखान्तं निगच्छति च नितरां प्राप्नोति, तत्, सात्विकं सुखमित्युत्तरेणान्वयः ॥ ३६ ॥

किञ्च -

यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत्तत् किमपि, अग्रे पूर्वं, विषमिव - ज्ञानवैराग्यसमाध्यारम्भे अत्यन्तायासपूर्वकत्वात् दुःखकरमिव भवति, परिणामे - परिपाके, अभ्यासपाटवेनेत्यर्थः । अमृतोपमं - अमृततुल्यं, आत्मबुद्धिप्रसादजं, आत्मनो बुद्धेः प्रसादो नैर्मल्यं, तस्माज्जातं, तत् सुखं, सात्त्विकं, इति प्रोक्तं विद्वद्भिः कथितम् ॥ ३७ ॥

राजसं सुखमाह—

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

विषयेन्द्रिययोगात् यत्तत्सुखं, अग्रे प्रथमक्षणे, अमृतोपमं, परिणामे परिपाके, विषमिव - बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वाद्दुःखकरं, तत्सुखं राजसमिति, स्मृतम् ॥ ३८ ॥

तामसं सुखमाह—

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥

यत् - सुखं, अग्रे अनुभवकाले, अनुबन्धे च - विपाके, आत्मनो मोहनं मोहकरं अत एव निद्रालस्य प्रमादेभ्यः उत्तिष्ठति जायत इति निद्रालस्यप्रमादोत्थं, निद्रादयो ह्यनुभववेलायां मोहहेतवः, मोहोऽत्र यथावत्स्थितवस्त्वप्रकाशः, तत्र निद्रायां मोहहेतुत्वं स्पष्टम् । आलस्यमिन्द्रियव्यापारमान्द्यं, इन्द्रियव्यापारमान्द्ये च ज्ञानमान्द्यं भवत्येव

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रमादः कर्तव्यानवधानरूप इति । तत्रापि ज्ञानमान्द्यं भवति । तयोरपि मोहहेतुत्वमित्यनुसन्धेयम् । तत् सुखं, तामसं इति उदाहृतम् ॥ ३९ ॥

अथेदानीं प्रकरणार्थमुपसंहरति–

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥

यत् सत्त्वं - प्राणिजातं, प्रकृतिजैः, एभिः , त्रिभिः सत्वादिभिः गुणैः, मुक्तं परित्यक्तं, पृथिव्यां वा - मनुष्यादिषु दिवि देवेषु वा अन्येषु च पुनः, नास्ति, क्रियाकारकलक्षणः सर्वसंसारः सत्वरजस्तमोगुणात्मकोऽविद्याकल्पित इत्यर्थः ॥ ४० ॥

इत्थं सर्वस्य जनस्य त्रिगुणात्मकत्वात् संसारकारणप्रवृत्तिःकथं स्यात् इत्याशङ्क्य सर्ववेदस्मृत्यः एतावानेव संसारनिवृत्तिकाङ्क्षिभिः अनुष्ठेय इत्येवमर्थं दर्शयन्नाह–

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥

हे परन्तप, ब्राह्मणक्षत्रियविशां, ब्राह्मणाश्च क्षत्रियाश्च, विशो - वैश्याश्च, तेषां, शूद्राणां च, शूद्राणामसमासकरणं द्विजत्वाभावात्, कर्माणि स्वभावप्रभवैः, ब्राह्मणस्वभावस्य सत्वगुणः प्रभवः कारणं, तथा क्षत्रियस्वभावस्य सत्वोपसर्जनं रजः प्रभवः, वैश्यस्वभावस्य तम उपसर्जनं रजः प्रभवः शूद्रस्वभावस्य रज उपसर्जनं तमः प्रभवः, चतुर्णां

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रशान्त्यैश्वर्येहामूढस्वभावदर्शनात्, गुणै: सत्वादिभि: प्रविभक्तानि - पृथक् व्यवस्थितानि ॥ ४१ ॥

तत्र ब्राह्मणस्य स्वाभाविकानि कर्माण्याह–

शमो दमस्तप:शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम् ॥ ४२ ॥

शम: अन्त:करणनियमनं, दम: बाह्येन्द्रियनियमनं, तप: कृच्छ्रचान्द्रायणादि, शौचं अन्तर्बहिश्शुद्धत्वं, क्षान्ति: क्षमा, आर्जवं, ऋजुत्वं ज्ञानं - शास्त्रीयं, विज्ञानं - अनुभव: आस्तिक्यं अस्ति भाव: वेदार्थेषु श्रद्धा च, इत्येतत्, ब्राह्मं ब्राह्मणस्येदं, स्वभावजं कर्म - स्वभावाज्जातं कर्मेत्यर्थ: ॥ ४२ ॥

क्षत्रियस्य स्वाभाविकं कर्माह–

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥

शौर्य - शूरत्वं, तेज: - प्रागल्भ्यं, धृति: - धैर्यं, दाक्ष्यं - स्वकार्य-निर्वृत्तौ सामर्थ्यं, युद्धे च, अपलायनं - अनिर्वर्तनं, दानं - देयेषु मुक्तहस्तता, ईश्वरभावश्च स्वव्यतिरिक्तसकलजननियमनस्वभाव: । एतत्, क्षात्रं क्षत्रस्येदं, स्वभावजं कर्म - क्षत्रियस्य स्वभावाज्जातं कर्मेत्यर्थ: ॥ ४३ ॥

वैश्यशूद्रयो: स्वाभाविकं कर्माह–

कृषिगौरक्ष्यवाणिज्यं वैश्यं कर्म स्वभावजम्।
22 परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ननु कथं दोषांशं परिहृत्य स्वकर्मणि क्रियमाणे सति गुणांश; सम्भविष्यति इत्याशङ्कायामाह—

असक्तबुद्धिःसर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥

सर्वत्र- पुत्रदारादिषु आसक्तिनिमित्तेषु, **असक्ता** - सङ्गरहिता, **बुद्धिः**- अन्तःकरणं, यस्य सः **असक्तबुद्धिः** । **जितात्मा** - वशीकृतान्तःकरणः विगता, स्पृहा - देहजीवितभोगेषु तृष्णा यस्य सः **विगतस्पृहः**, **सन्न्यासेन** कर्मासक्तिफलत्यागेन, सम्यग्दर्शनेन वा, **परमां** - प्रकृष्टां, **नैष्कर्म्यसिद्धिं**, आत्मज्ञानान्निर्गतानि कर्माणि यस्मात्स निष्कर्मा, तस्य भावः नैष्कर्म्यं, तदेव सिद्धिः, तस्य वा सिद्धिः - निष्पत्तिः तां, **अधिगच्छति** प्राप्नोति ॥ ४९ ॥

एवम्भूतस्य ज्ञाननिष्ठतया ब्रह्मभावप्रकारमाह—

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥

हे कौन्तेय, सिद्धिं - कर्मानुष्ठानैर्ज्ञानयोग्यतां, **प्राप्तः** परमात्मानं, **यथा** येन प्रकारेण, **आप्नोति, तथा**, तं प्रकारं, **या परा, ज्ञानस्य, निष्ठा** - पर्यवसानं, तां निष्ठां, **समासेनैव** - सङ्क्षेपेणैव, **मे** - मम, वचनात्, **निबोध** जानीहि ॥ ५० ॥

तत्प्रकारमेवाह बुद्ध्येति श्लोकत्रयेण -

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विशुद्धया - मायारहितया, बुद्ध्या - अध्यवसायलक्षणया, युक्तः, धृत्या - धैर्येण, आत्मानं - कार्यकारणसंघातं, नियम्य - वशीकृत्य, शब्दादीन् विषयान्, त्यक्त्वा सामर्थ्याच्छरीरस्थितिमात्रान्[119] केवलान् मुक्त्वा, ततोऽधिकसुखार्थान् त्यक्त्वेत्यर्थः । शरीरस्थित्यर्थेन प्राप्तेषु च, रागद्वेषौ व्युदस्य - परित्यज्य, ब्रह्मभूयाय कल्पत इति तृतीयेणान्वयः ॥ ५१ ॥

ततः—

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥

विविक्तसेवी - विजनस्थलवासी, लघ्वाशी - लघुभोजनशील; विविक्तसेवालघ्वाशनयोर्ग्रहणं निद्रादिदोषनिवर्तकत्वेन चित्तप्रसादहेतुत्वात् । यतवाक्कायमानसः, यतानि - संयतानि, वाक्च कायश्च मानसं च येन सः । नित्यं, ध्यानयोगपरः ध्यानं आत्मस्वरूपचिन्तनं योगः - आत्मविषयैकाग्रीकरणं, तौ, परौ परत्वेन कर्तव्यौ यस्य सः न तु मन्त्रजपादिः वैराग्यं, समुपाश्रितः - सम्यगुपाश्रितः ब्रह्मभूयाय कल्पत इत्युत्तरेणान्वयः ॥ ५२ ॥

किञ्च—

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममःशान्तो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

119. शब्दादि समस्तविषयत्यागे देहस्थितिरपि दुःखा स्यात् इत्याशङ्क्याह सामर्थ्यात् इति (आ)

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अहङ्कारं, बलं - सामर्थ्यं, दर्पं - योगबलादुन्मार्गप्रवृत्तिलक्षणं, कामं - इच्छां, क्रोधं - च, परिग्रहं - इन्द्रियमनोगतदोषपरित्यागेऽपि शरीरधारण-प्रसङ्गेन धर्मानुष्ठाननिमित्तेन प्राप्तं बाह्यपरिग्रहं च विमुच्य, निर्ममः निर्गतो ममकारो यस्मात्सः, अत एव, शान्तः उपरतहर्षायासः, ज्ञाननिष्ठा इत्यर्थः। ब्रह्मभूयाय ब्रह्मभावाय, कल्पते - समर्थो भवति ॥ ५३ ॥

ब्रह्मभावं पश्यतो लक्षणमाह—

ब्रह्मभूते प्रसन्नात्मा न शोचति न काङ्क्षति।
समःसर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥

ब्रह्मभूतः - ब्रह्मस्वरूपं प्राप्तः अत एव, प्रसन्नात्मा प्रसन्नचित्तः, न शोचति - नष्टान्न सन्तप्यते, न काङ्क्षति अप्राप्तं न वाञ्छति च, देहाध्यासाभावात्। अत एव, सर्वेषु भूतेषु समस्सन् आत्मौपम्येन सुखदुःखदर्शनात्। परां - प्रकृष्टां मद्भक्तिं - ज्ञानलक्षणां, लभते ॥ ५४ ॥

ततो ज्ञानलक्षणया -

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्वतः।
ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५ ॥

अहं, यावान् - यादृशः, यश्चापि यश्चारवण्डानन्दमयः, अस्मि तं, मां, अद्वैतं चैतन्यमात्रैकरसं, अजमजरं, अभयमनिधनं, भक्त्या, तत्त्वतः अभिजानाति, ततः मामेव, तत्त्वतः, ज्ञात्वा, तदनन्तरं, मां विशते, तत्त्वज्ञानस्याप्युपरमे सति, परमानन्दरूपो भवतीत्यर्थः। नात्र

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ज्ञानानन्तरप्रवेश क्रिये भिन्ने विवक्षिते, ज्ञात्वा विशते तदनन्तरमिति । किं तर्हि फलान्तराभावात् ज्ञानमात्रमेव । क्षेत्रज्ञं चापि मां विद्धि' इत्युक्तत्वात् ॥ ५५ ॥

एवं वर्णाश्रमोचितनित्यनैमित्तिककर्मणां परित्यक्तफलादिकानां परमपुरुषाराधनरूपाणामनुष्ठितानां विपाक उक्तः । इदानीं काम्यानामपि कर्मणामुक्तेन प्रकारेणानुष्ठितानां स एव विपाक इत्याह–

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥

अहं व्यपाश्रयो व्यपाश्रयणं प्राप्यस्थानं यस्य सः मद्व्यपाश्रयः मय्यर्पितसर्वात्मभाव इत्यर्थः । पुरुषः सदा सर्वकर्माणि - नित्यनैमित्तिकानि, अपिशब्दात् काम्यानि, कुर्वाणः - अनुतिष्ठन्, मत्प्रसादात् अव्ययं, शाश्वतं - नित्यं, पदं, आप्नोति ॥ ५६ ॥

यस्मादेवं तस्मात्–

चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥

चेतसा - विवेकबुद्ध्या, सर्वकर्माणि - दृष्टादृष्टार्थानि, मयि परमेश्वरे, सन्न्यस्य - 'यत्करोषि यदश्नासी'त्युक्तन्यायेन समर्प्य, मत्परस्सन्, अहमेव परो यस्य सः । बुद्धियोगं, बुद्ध्या - व्यवसायात्मिकया योगः तं, उपाश्रित्य, सततं सर्वदा, 'ब्रह्मार्पणं ब्रह्महवि' रिति न्यायेन कर्मानुष्ठानकालेऽपि मच्चितः भव ॥ ५७ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततः—

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।
अथ चेत् त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि॥ ५८॥

मच्चित्तः त्वं, मत्प्रसादात्, सर्वदुर्गाणि - सर्वाणि सांसारिकदुःखानि, तरिष्यसि - अतिक्रमिष्यसि,विपक्षे दोषमाह - अथेति, अथचेत्, त्वं, अहङ्कारात् -पण्डितोऽहमिति गर्वात्, मदुक्तं - न श्रोष्यसि चेत्, - विनङ्क्ष्यसि - विनाशं गमिष्यसि, पुरुषार्थात् भ्रश्यसीत्यर्थः॥ ५८॥

ननु त्वद्वाक्याकरणात् यद्वा तद्वा भवतु। नाहं तु बन्धुभिर्युद्धं करिष्यामीत्यत्राह—

यद्यहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति॥ ५९॥

अहङ्कारं - सर्वमहं जानामीत्यभिमानं, आश्रित्य न योत्स्ये, - युद्धं न करिष्यामीति, मन्यसे - चिन्तयसि चेत्, एष ते - तव, व्यवसायः - निश्चयः, मिथ्या - अस्वतन्त्रत्वान्मृषैव, तदेवाह- प्रकृतिरिति। प्रकृतिः - तव क्षत्रियस्वभावः त्वां नियोक्ष्यति - योद्धुं नियुञ्ज्यादित्यर्थः॥ ५९॥

तदेवोपपादयति—

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्॥ ६०॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे कौन्तेय, स्वभावजेन - क्षत्रस्वभावाज्जातेन, स्वेन आत्मीयेन, कर्मणा - शौर्यादिना, निबद्धः - नियन्त्रितः, त्वं यत्कर्म कर्तुं नेच्छसि, तत्कर्म, मोहात् अविवेकात्, अवशोऽपि - परवशोऽपि, करिष्यस्येव ॥ ६० ॥

तदेवं श्लोकद्वयेन सांख्यादिमतेन प्रकृतिपारतन्त्र्यं कर्मपारतन्त्र्यं चोक्तम् । सम्प्रति स्वमतमाह–

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

हे अर्जुन, सर्वभूतानां - सर्वप्राणिनां, हृद्देशे - हृदयमध्ये, य ईश्वरो - नियमनशीलः अन्तर्यामी, यन्त्रारूढानि - यन्त्राण्यारूढानि अधिष्ठितानि, दारुयन्त्रकृतानि कृत्रिमभूतानि । अत्र इवशब्दो द्रष्टव्यः । लोके सूत्रधारो यथा छद्मना भ्रामयतिं तद्वदित्यर्थः । सर्वभूतानि मायया- निजशक्त्या, भ्रामयन् -भ्रमणं कुर्वन्, तिष्ठति । यन्त्राणि प्राणि-शरीराणि । आरूढानि सर्वभूतानि देहाभिमानिनो जीवान्, मायया भ्रामयन् तिष्ठतीत्यर्थः । तथा च श्रुतिः–

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च । (श्वे.उ.६.११)

किं च'य आत्मनि तिष्ठन्नात्मानमन्तरा यमयति यमात्मा न वेद यस्याः शरीरं च - 'य आत्मात्माशरीरं य आत्मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः (श.ब्रा.१४५.३०) इत्यादि ॥ ६१ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत एवमतः -

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥

हे भारत ! सर्वभावेन - सर्वात्मना, तं - ईश्वरमेव, शरणं रक्षितारं, गच्छ ततः तत्प्रसादात् परां प्रकृष्टां, शान्तिं - चित्तप्रसादं च, शाश्वतं-पारमेश्वरं स्थानं च, प्राप्स्यसि ॥ ६२ ॥

सर्वगीतार्थमुपसंहरन्नाह—

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतमं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥

इति - उक्तप्रकारेण, ते - तुभ्यं, मया, गुह्यात् - गोप्यात्, गुह्यतमं - अतिगोप्यं, ज्ञानं, आख्यातं - कथितम् । एतत् - मदुक्तं गीताशास्त्रं, अशेषेण - साकल्येन, विमृश्य - आलोच्य पश्चात् यथा इच्छसि, तथा कुरु । एतस्मिन् पर्यालोचिते सति तव मोहो निवर्तिष्यते । ततो युद्धं करिष्यसीति भावः ॥ ६३ ॥

अतिगम्भीरं गीताशास्त्रं अशेषतः पर्यालोचयितुमशक्नुवतः कृपया स्वयमेव तस्य सारं सङ्गृह्य कथयति त्रिभिः ।—

सर्वगुह्यतमं भूयः शृणु मे परमं वचः।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भूय: पुन:, सर्वगुह्यतमं - सर्वेभ्यो गुह्येभ्य: गोप्यतमं, परमं - प्रकृष्टं - मे मम, वच: - वाक्यं, शृणु, त्वं मे - मम दृढं गाढं यथा तथा, इष्ट: असि - प्रियोऽसीति, मत्वा, तत: तेन् कारणेन सार्वविभक्तिक: तसि: ते - तुभ्यं, हितं परं - ज्ञानप्राप्तिसाधनं, वक्ष्यामि, दृढमतिरिति केषांचित्पाठ: ॥ ६४ ॥

तत्किमित्यत्राह—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥

मन्मना मयि, मन: चित्तं यस्य स:, भव **मद्भक्त:** - मद्गत: भव, **मद्याजी** - मद्यजनशील: भव **मां, नमस्कुरु,** एवं, वर्तमान: मय्येव अर्पितसाध्यसाधनप्रयोजनो, **मामेव, एष्यसि,** अत्र संशयो नास्ति। **मे,** मम **प्रिय: असि,** अत: **ते** तुभ्यं, **सत्यं** यथा भवति तथा, **प्रतिजाने** - प्रतिज्ञां करोमि अस्मिन्नर्थे एवं भगवत: सत्यप्रतिज्ञातृत्वं बुद्ध्वा भगवद्भक्ते: अवश्यम्भाविमोक्षफलमवधार्य भगवच्छरणैकपरायणो भवेदिति वाक्यार्थ: ॥ ६५॥

सर्वकर्मयोगनिष्ठाया: परमरहंस्यमीश्वर: शरणताम् उपसंहृत्य सम्प्रति कर्मयोगनिष्ठा फलं सर्ववेदान्तविहितं सम्यग्दर्शनं वक्तव्यमित्याह —

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच: ॥ ६६ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सर्वे च ते धर्माः तान् सर्वधर्मान् - सर्वकर्माणि । धर्मशब्देनात्र अधर्मोऽपि गृह्यते, नैष्कर्म्यस्य विवक्षितत्वात् । 'नाविरतो दुश्चरितात्' (क.उ.२.२.२४) इति श्रुतेः । 'त्यज धर्ममधर्मं च' इत्यादिस्मृतिभ्यश्च । परित्यज्य- सन्न्यस्य, एकं सर्वात्मानं सर्वभूतस्थं, मां - ईश्वरं, अहमेव इत्येवं शरणं व्रज । एवं निश्चितबुद्धिं त्वां, सर्वपापेभ्यः सर्वधर्माधर्म-बन्धनरूपेभ्यः मोक्षयिष्यामि - स्वात्मभावप्रकाशीकरणेन, उक्तं च, 'अज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥' (भ.गी.१०-११) इति । अतः मा शुचः - शोकं मा कार्षीः । शुचिर् शोचविशरणक्षेदेषु इति धातो दैवदिकात् माङ् । इरितो वा (अष्टाध्यायी . ३.९५६) इति वैकल्पिकोऽङादेशः । शोकेन मा विशीर्णो भूरित्यर्थः । 'सीदन्ति मम गात्राणि (भ.गी.१.२८) इति ज्ञापकात् । अयं भावः - 'अशोच्यानन्वशोचस्त्वं (भ.गी. २.११) इत्युपक्रम्य 'मामेकं शरणं व्रजे' १८. ६६.त्युपसंहृतेऽस्मिन् ग्रन्थे निश्चितं परमं निश्रेयससाधन-मात्मज्ञानमेव । यथा - 'यज्ज्ञात्वामृतश्नुते' (भ.गी.१३.१३) ततो मां तत्वतो ज्ञात्वा' (भ.गी.१८.२५) इति 'ज्ञात्वा मां शान्तिमृच्छति' (भ.गी.५.२९) 'जानाति पुरुषोत्तमं' (भ.गी.१५.१९) 'तेषां ज्ञानी नित्ययुक्तः' (भ.गी.४.३८) न हि ज्ञानेन सदृशं पवित्रं (भ.गी.७.१७) इत्यादि भगवद्वचनेभ्यः । 'तमेव' विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' ''ब्रह्मविदाप्नोति परं'' (तै.उ. २.१.१०) 'ब्रह्म वेद ब्रह्मैव

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भवति' (मु.उ.३.२.३) 'तरति शोकमात्मवित्' (छा.उ. ७.१.३) य एनं विदुरमृतास्ते भवन्ति (गुह्यका. ६३) ('ज्ञात्वा देवं मुच्यते सर्वपाशैः इत्यादि श्रुतिभ्यश्च । तस्मात् सर्वकर्मसन्न्यास पूर्वकज्ञाननिष्ठाया आत्यन्तिकस्संसारोपरम इति सिद्धम् । नापि ज्ञानस्य कर्मसाहाय्यापेक्षा, केवलत्वात् कर्मत्यागानन्तरसम्भवाच्च । तस्मादत्र ज्ञाननिष्ठैव प्रतिपादिता इति ॥ ६६ ॥

अथ इदानीं शास्त्रसम्प्रदायविधिमाह–

इदं ते नातपस्काय नाभक्तया कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७॥

ते – तुभ्यं, आख्यातं, इदं – गीताशास्त्रं, अतपस्काय तपोरहिताय, न वाच्यम् । अभक्ताय – गुरौ देवे च भक्तिरहिताय, न वाच्यम् कदाचन । अशुश्रूषवे शुश्रूषारहिताय, न वाच्यम्, यो मां – वासुदेवं, प्राकृतमानुषं मत्वा, अभ्यसूयति – आत्मप्रशंसादिदोषाद्यारोपणेन ईश्वरत्वमजानन् न सहते तस्मै च न वाच्यम् । भक्तिशुश्रूषा (वि) नया (दि) भिर्यो वर्तते तस्मै वक्तव्यमित्यर्थः ॥ ६७ ॥

सम्प्रदायप्रवर्तकस्य फलमाह–

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यः, परमं गुह्यं - गोप्यं, इदं - उक्तग्रन्थं, मद्भक्तेषु - मयि भक्तिमत्सु, अभिधास्यति - वक्ष्यति, पुनर्भक्तेर्ग्रहणात् गीताशास्त्रग्रहणे केवलेन भक्तिमात्रेण पात्रं भवतीति गम्यते। असौ मयि परां - प्रकृष्टां, भक्तिं कृत्वा, परमगुरोः श्रीकृष्णस्य शुश्रूषा मया क्रियत इत्येवं कृत्वेत्यर्थः । तस्य च इदं फलं, मामेवैष्यति - मुच्यत एव, असंशयः - अत्र संशयः नास्ति ॥ ६८ ॥

किञ्च—

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥

तस्मात् - गीताशास्त्रसम्प्रदायप्रवर्तकात् पुरुषात् मनुष्येषु - मनुष्याणां मध्ये, मे - मम, प्रियकृत्तमः अत्यन्तं प्रियकारी, कश्चिदपि, न च - नास्त्येव। किञ्च - तस्मात् - गीताशास्त्रसम्प्रदायप्रवर्तकात्, अन्यः मे - मम - प्रियतरः अत्यन्तप्रियः भुवि न भविता - न भविष्यति ॥ ६९ ॥

एवं सम्प्रदायप्रवर्तके फलमुक्त्वा, परतः फलमाह—

अध्येष्येते च य इमं धर्म्यं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥ ७० ॥

यः, धर्म्यं - धर्मादनपेतं, इमं आवयोः संवादं - संवादरूपं ग्रन्थं, अध्येष्यति - पठिष्यति - तेन पुरुषेण, ज्ञानयज्ञेन, ज्ञानमेव यज्ञः तेन, अहं,

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इष्ट: - पूजित:, स्यां भवेयं, इति, मे - मम मति: - निश्चय: । यद्यसौ गीतार्थमनवबुध्यमान एव केवलं जपति । तथापि मम तच्छृण्वतो मामेवासौ प्रकाशयतीति । यथा लोके यदृच्छयापि कश्चित् कस्यापि नाम गृह्णाति, तदासौ मामाह्वयतीति तत्पार्श्वमागच्छति । तथा अहमपि, तस्य सन्निहितो भवेयमिति भाव: ॥ ७० ॥

श्रोतु: फलमाह–

श्रद्धावाननसूयश्च शृणुयादपि यो नर: ।
सोऽपि मुक्त: शुभान् लोकान् प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥

य: नर:, श्रद्धावान् - श्रद्दधान:, अनसूयश्च - ईर्ष्यारहित: सन्, इमं, ग्रन्थं, शृणुयादपि, अंपिशब्दात् किमुतार्थज्ञानवान् । सोऽपि पापान्मुक्त: शुभान् प्रशस्तान् पुण्यकर्मणां, पुण्यं - अश्वमेधादि कर्म येषां तेषां, लोकान्, प्राप्नुयात् ॥ ७१ ॥

सम्यग्बोधानुत्पत्तौ पुनरुपदेक्ष्यामीत्याशयेनाह–

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोह: प्रणष्टस्ते धनञ्जय ॥ ७२ ॥

हे पार्थ, त्वया, एकाग्रेण - साधनेन, चेतसा - चित्तेन, एतत् - गीताशास्त्रं, श्रुतं कच्चित् - श्रुत्वा अवधारितं किम् इत्यर्थ: ॥ हे धनञ्जय, तत अज्ञानसंमोह: येनाज्ञानसंमोहेन न योत्स्यामीत्युक्तवान्, स:, अज्ञाननिमित्ताविवेक:, प्रणष्ट: - प्रकर्षेण नष्ट: कच्चित् ॥ ७२ ॥

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवमुक्तः कृतकृत्योऽस्मीत्यर्जुन उवाच–

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥ ७३ ॥

हे अच्युत, त्वत्प्रसादात्, मोहः आत्मविषयाविवेकः, नष्टः - विगतः, अयमहमस्मीति स्वरूपानुसन्धानरूपा, स्मृतिः लब्धा - प्राप्ता । अहं, गतसन्देहः - विगतसंशयः सन्, तव, वचनं, करिष्ये इति स्थितः, अस्मि - युद्धं कर्तुमुद्यतोऽस्मि ॥ ७३ ॥

अथ इदानीं कथासन्दर्भप्रदर्शनार्थं सञ्जय उवाच–

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥

इति - एवं, वासुदेवस्य, महात्मनः - महाबुद्धेः - पार्थस्य च, अद्भुतं - विस्मयकरं रोमहर्षणं - रोमाञ्चकरं, इमं - यथोक्तं संवादं, अहं, अश्रौषं - श्रुतवान् - अस्मि ॥ ७४ ॥

श्रुतप्रकारमनुवदति–

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यतरं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५ ॥

व्यासप्रसादात् - व्यासानुग्रहात्, प्राप्तदिव्यचक्षुश्रोत्रलाभात्, योगं - योगाख्यं, परं -प्रकृष्टं, एतत् गुह्यतमं - अतिरहस्यं शास्त्रं, स्वयं, साक्षात्, कथयतः, योगेश्वरात् श्रीकृष्णात्, श्रुतवान् अस्मि ॥ ७५ ॥

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किञ्च—

राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

हे राजन् - धृतराष्ट्र, अद्भुतं, पुण्यं केशवार्जुनयोः इमं संवादं, संस्मृत्य संस्मृत्य - चिन्तयित्वा, मुहुर्मुहुः श्रवणेनापि पापहरं श्रुत्वा, हृष्यामि - रोमाञ्चितो भवामि ॥ ७६ ॥

तच्च संस्मृत्यसंस्मृत्य रूपमत्यद्भुतं हरेः।
विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥ ७७ ॥

हे राजन्, अद्भुतं, हरेः - श्रीकृष्णस्य, तद् रूपं विश्वरूपं, संस्मृत्य संस्मृत्य - ध्यात्वा ध्यात्वा, मे - मम, महान् - विस्मयः - आश्चर्यं, भवति। पुनः पुनः, हृष्यामि च ॥ ७७ ॥

किमत्र बहुनोक्तेन—

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे मोक्षयोगो नामाष्टादशोऽध्यायः ॥

यत्र - यस्मिन् पक्षे, योगेश्वरः योगमायेश्वरः श्रीकृष्णः यत्र यस्मिन् पक्षे धनुर्धरः - गाण्डीवधन्वा, पार्थः तत्र - तस्मिन् - पाण्डवानां, पक्षे, श्रीः

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
अधियज्ञ: कथं कोऽत्र	8	2
अधिष्ठानं तथा कर्ता	18	14
अध्यात्मज्ञाननित्यत्वम्	13	11
अध्येष्यते च य इमम्	18	70
अनन्तविजयं राजा	1	16
अनन्तश्चास्मि नागानाम्	10	29
अनन्यचेता: सततम्	8	14
अनन्याश्चिन्तयन्तो माम्	9	22
अनपेक्ष: शुचिर्दक्ष:	12	16
अनादित्वान्निर्गुणत्वात्	13	31
अनादिमध्यान्तमनन्त	11	19
अनाश्रित: कर्मफलम्	6	1
अनिष्टमिष्टं मिश्रं च	18	12
अनुद्वेगकरं वाक्यम्	17	15
अनुबन्धं क्षयं हिंसाम्	18	25
अनेकचित्तविभ्रान्ता:	16	16
अनेकबाहूदरवक्त्रनेत्रम्	11	16
अनेकवक्त्रनयनम्	11	10
अन्तकाले च मामेव	8	5
अन्तवत्तु फलं तेषाम्	7	23
अन्तवन्त इमे देहा:	2	18
अन्नाद्भवन्ति भूतानि	3	14
अन्ये च बहव: शूरा:	1	9
अन्ये त्वेवमजानन्त:	13	25

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
अपरं भवतो जन्म	4	4
अपरे नियताहारा:	4	30
अपरेयमितस्त्वन्याम्	7	5
अपर्याप्तं तदस्माकम्	1	10
अपाने जुह्वति प्राणम्	4	29
अपि चेत्सुदुराचारो	9	30
अपि चेदसि पापेभ्य:	4	36
अप्रकाशोऽप्रवृत्तिश्च	14	13
अफलाकाङ्क्षिभिर्यज्ञो	17	11
अभयं सत्त्वसंशुद्धि:	16	1
अभिसंधाय तु	17	12
अभ्यासयोग	8	8
अभ्यासेऽप्यस	12	10
अमानित्वमदम्भित्वम्	13	7
अमी च त्वां धृत	11	26
अमी हि त्वाम्	11	21
अयनेषु च	1	11
अयति: श्रद्धयो	6	37
अयुक्त: प्राकृत:	18	28
अवजानन्ति माम्	9	11
अवाच्यवादांश्च	2	36
अविनाशि तु	2	17
अविभक्तं च	13	16
अव्यक्तादीनि	2	28

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
अव्यक्ताद्व्यक्तय:	8	18
अव्यक्तोऽयम्	2	25
अव्यक्तोऽक्षर	8	21
अव्यक्तं व्यक्तिम्	7	24
अशास्त्रविहितम्	17	5
अशोच्यानन्व	2	11
अश्रद्दधाना:	9	3
अश्रद्धया हुतं दत्तम्	17	28
अश्वत्थ: सर्ववृक्षाणाम्	10	26
असक्तबुद्धि: सर्वत्र	18	49
असक्तिरनभिष्वङ्ग:	13	9
असत्यमप्रतिष्ठं ते	16	8
असौ मया हत: शत्रु:	16	14
असंयतात्मना योगा	6	36
असंशयं महाबाहो	6	35
अस्माकं तु विशिष्टा ये	1	7
अहं क्रतुरहं यज्ञ:	9	16
अहंकारं बलं दर्पम्	16	18
अहंकारं बलं दर्पम्	18	53
अहमात्मा गुडाकेश	10	20
अहं वैश्वानरो भूत्वा	15	14
अहं सर्वस्य प्रभवो	10	8
अहं हि सर्वयज्ञानाम्	9	24

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
अहिंसा सत्यमक्रोध:	16	2
अहिंसा समता तुष्टि:	10	5
अहो बत महत्पापम्	1	45
आ		
आख्याहि मे को भवान्	11	31
आचार्या: पितर: पुत्रा:	1	34
आढ्योऽभिजनवानस्मि	16	15
आत्मसम्भाविता: स्तब्धा	16	17
आत्मौपम्येन सर्वत्र	6	32
आदित्यानामहं विष्णु:	10	21
आपूर्यमाणमचलप्रतिष्ठम्	2	70
आब्रह्मभुवनाल्लोका:	8	16
आयुधानामहं वज्रम्	10	28
आयु:सत्त्वबलारोग्य	17	8
आरुरुक्षोमुनेर्योगम्	6	3
आवृतं ज्ञानमेतेन	3	39
आशापाशतै:	16	12
आश्चर्यवत्पश्यति	2	29
आसुरीं योनिम्	16	20
आहारस्त्वपि सर्वस्य	17	7
आहुस्त्वामृषय: सर्वे	10	13
इ		
इच्छाद्वेषसमुत्थेन	7	27
इच्छा द्वेष: सुखम्	13	6

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
इति गुह्यतमं शास्त्रम्	15	20
इति ते ज्ञानमाख्यातम्	18	63
इति क्षेत्रं तथा ज्ञानम्	13	18
इत्यर्जुनं वासुदेवः	11	50
इत्यहं वासुदेवस्य	18	74
इदमद्य मया लब्धम्	16	13
इदं तु ते गुह्यतमम्	9	1
इदं ते नातपस्काय	18	67
इदं शरीरं कौन्तेय	13	1
इदं ज्ञानमुपाश्रित्य	14	2
इन्द्रियस्येन्द्रियस्यार्थे	3	34
इन्द्रियाणां हि चरताम्	2	67
इन्द्रियाणि पराण्याहुः	3	42
इन्द्रियाणि मनो बुद्धि	3	40
इन्द्रियार्थेषु वैराग्यम्	13	8
इमं विवस्वते योगम्	4	1
इष्टान्भोगान्हि	3	12
इहैकस्थं जगत्कृत्स्नम्	11	7
इहैव तैर्जितः सर्गो	5	19
ई		
ईश्वरः सर्वभूतानाम्	18	61
उ		
उच्चैःश्रवसमश्वानाम्	10	27
उत्क्रामन्तं स्थितम्	15	10

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
उत्तमः पुरुषस्त्वन्यः	15	17
उत्सन्नकुलधर्माणाम्	1	44
उत्सीदेयुरिमे लोकाः	3	24
उदाराः सर्व एवैते	7	18
उदासीनवदासीनः	14	23
उद्धरेदात्मनात्मानम्	6	5
उपद्रष्टाऽनुमन्ता च	13	22
ऊ		
ऊर्ध्वं गच्छन्ति सत्वस्थाः	14	18
ऊर्ध्वमूलमधःशाखम्	15	1
ऋ		
ऋषिभिर्बहुधा गीतम्	13	4
ए		
एतच्छ्रुत्वा वचनम्	11	35
एतद्योनीनि भूतानि	7	6
एतन्मे संशयं कृष्ण	6	39
एतान्न हन्तुमिच्छामि	1	35
एतान्यपि तु कर्माणि	18	6
एतां दृष्टिमवष्टभ्य	16	9
एतां विभूतिं योगं च	10	7
एतैर्विमुक्तः कोन्तेय	16	22
एवमुक्तो हृषीकेशम्	1	24
एवमुक्त्वाऽर्जुनः संख्ये	1	47
एवमुक्त्वा ततो राजन्	11	9

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
एवमुक्त्वा हृषीकेशम्	2	9
एवमेतद्यथात्थ त्वम्	11	3
एवं परम्पराप्राप्तम्	4	2
एवं प्रवर्तितं चक्रम्	3	16
एवं बहुविधा यज्ञा:	4	32
एवं बुद्धे: परं बुद्ध्वा	3	43
एवं सततयुक्ता ये	12	1
एवं ज्ञात्वा कृतं कर्म	4	15
एषा तेऽभिहिता सांख्ये	2	39
एषा ब्राह्मी स्थिति: पार्थ	2	72
ओ		
ओमित्येकाक्षरं ब्रह्म	8	13
ओं तत्सदिति निर्देशो	17	23
क		
कच्चिन्नोभयविभ्रष्ट:	6	38
कच्चिदेतच्छ्रुतं पार्थ	18	72
कट्वम्ललवणात्युष्ण	17	9
कथं न ज्ञेयमस्माभि:	1	39
कथं भीष्ममहं संख्ये	2	4
कथं विद्यामहं योगिन्	10	17
कर्मजं बुद्धियुक्ता हि	2	51
कर्मण: सुकृतस्याहु:	14	16
कर्मणैव हि संसिद्धिम्	3	20
कर्मणो ह्यपि बोद्धव्यम्	4	17

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
कर्मण्यकर्म यः पश्येत्	4	18
कर्मण्येवाधिकारस्ते	2	47
कर्म ब्रह्मोद्भवं विद्धि	3	15
कर्मेन्द्रियाणि संयम्य	3	6
कर्शयन्तः शरीरस्थम्	17	6
कविं पुराणमनुशा	8	9
कस्माच्च ते न नमेरन्	11	37
काङ्क्षन्तः कर्मणाम्	4	12
काम एष क्रोध एष	3	37
कामक्रोधवियुक्तानाम्	5	26
काममाश्रित्य दुष्पूरम्	16	10
कामात्मानः स्वर्गपराः	2	43
कामैस्तैस्तैर्हृतज्ञानाः	7	20
काम्यानां कर्मणाम्	18	2
कायेन मनसा बुद्ध्या	5	11
कार्पण्यदोषोपहत	2	7
कार्यकारणकर्तृत्वे	13	20
कार्यमित्येव यत्कर्म	18	9
कालोऽस्मि लोकक्षय	11	32
काश्यश्च परमेष्वासः	1	17
किरीटिनम् गदिनं चक्र	11	46
किरीटिनं गदिनं चक्रि	11	17
किं कर्म किमकर्मेति	4	16
किं तद्ब्रह्म किमध्यात्मम्	8	1

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
किं पुनर्ब्राह्मणा: पुण्या:	9	33
कुतस्त्वा कश्मलमिदम्	2	2
कुलक्षये प्रणश्यन्ति	1	40
कृपया परयाविष्टो	1	28
कृषिगोरक्ष्यवाणिज्यम्	18	44
कैर्लिङ्गैस्त्रीन्गुणानेतान्	14	21
क्रोधाद्भवति सम्मोह:	2	63
क्लेशोऽधिकतर:	12	5
क्लैब्यं मा स्म गम: पार्थ	2	3
क्षिप्रं भवति धर्मात्मा	9	31
क्षेत्रक्षेत्रज्ञयोरेवम्	13	34
क्षेत्रज्ञं चापि मां विद्धि	13	2
गतसङ्गस्य मुक्तस्य	4	23
गतिर्भर्ता प्रभु: साक्षी	9	18
गाण्डीवं स्रंसते हस्तात्	1	30
गामाविश्य च भूतानि	15	13
गुणानेतानतीत्य त्रीन्	14	20
गुरूनहत्वा हि महानु	2	5

च

चञ्चलं हि मन: कृष्ण	6	34
चतुर्विधा भजन्ते माम्	7	16
चातुर्वर्ण्यं मया सृष्टम्	4	13
चिन्तामपरिमेयां च	16	11
चेतसा सर्वकर्माणि	18	57

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
ज		
जन्म कर्म च मे दिव्यम्	4	9
जरामरणमोक्षाय	7	29
जातस्य हि ध्रुवो मृत्युः	2	27
जितात्मनः प्रशान्तस्य	6	7
ज्ञानयज्ञेन चाप्यन्ये	9	15
ज्ञानविज्ञानतृप्तात्मा	6	8
ज्ञानेन तु तदज्ञानम्	5	16
ज्ञानं कर्म च कर्ता च	18	19
ज्ञानं तेऽहं सविज्ञानम्	7	2
ज्ञानं ज्ञेयं परिज्ञाता	18	18
ज्ञेयः स नित्यसन्यासी	5	3
ज्ञेयं यत्तत्प्रवक्ष्यामि	13	12
ज्यायसी चेत्कर्मणस्ते	3	1
ज्योतिषामपि तज्ज्यो	13	17
त		
ततः पदं तत्परिमा	15	4
तच्च संस्मृत्य	18	77
ततः शङ्खाश्च भेर्यश्च	1	13
ततः स श्वेतैर्हयैर्युक्ते	1	14
ततः स विस्मयाविष्टो	11	14
तत्त्ववित्तु महाबाहो	3	28
तत्र तं बुद्धिसंयोगम्	6	43
तत्र सत्त्वं निर्मलत्वात्	14	6

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
तत्रापश्यत्स्थितान्पार्थः	1	26
तत्रैकस्थं जगत्कृत्स्नम्	11	13
तत्रैकाग्रं मनः कृत्वा	6	12
तत्रैवं सति कर्तारम्	18	16
तत्क्षेत्रं यच्च यादृक् च	13	3
तदित्यनभिसंधाय	17	25
तद्बुद्धयस्तदात्मानः	5	17
तद्विद्धि प्रणिपातेन	4	34
तपस्विभ्योऽधिको	6	46
तपाम्यहमहंवर्षम्	9	19
तमस्त्वज्ञानजं विद्धि	14	8
तमुवाच हृषीकेशः	2	10
तमेव शरणं गच्छ	18	62
तस्माच्छास्त्रं प्रमाणं ते	16	24
तस्मात्प्रणम्य प्रणिधाय	11	44
तस्मात्त्वमिन्द्रियाण्यादी	3	41
तस्मात्त्वमुत्तिष्ठ	11	33
तस्मात्सर्वेषु कालेषु	8	7
तस्मादसक्तः सततम्	3	19
तस्मादज्ञानसंभूतम्	4	42
तस्मादोमित्युदाहृत्य	17	24
तस्माद्यस्य महाबाहो	2	68
तस्मान्नार्हा वयं हन्तुम्	1	37
तस्य संजनयन्हर्षम्	1	12

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
तं विद्याद्दुःखसंयोग	6	23
तं तथा कृपयाविष्टम्	2	1
तानहं द्विषतः क्रूरान्	16	19
तानि सर्वाणि संयम्य	2	61
तुल्यनिन्दास्तुतिर्मौनी	12	19
तेजः क्षमा धृतिः	16	3
ते तं भुक्त्वा स्वर्गलोकम्	9	21
तेषामहं समुद्धर्ता	12	7
तेषामेवानुकम्पार्थम्	10	11
तेषां सततयुक्तानाम्	10	10
तेषां ज्ञानी नित्ययुक्त	7	17
त्यक्त्वा कर्मफलासङ्गम्	4	20
त्याज्यं दोषवदित्येके	18	3
त्रिभिर्गुणमयैर्भावैः	7	13
त्रिविधा भवति श्रद्धा	17	2
त्रिविधं नरकस्येदम्	16	21
त्रैगुण्यविषया वेदाः	2	45
त्रैविद्या मां सोमपाः	9	20
त्वमक्षरं परमं वेदितव्यम्	11	18
त्वमादिदेवः पुरुषः	11	38

द

दण्डो दमयतामस्मि	10	38
दम्भो दर्पोऽभिमानश्च	16	4
दंष्ट्राकरालानि च ते	11	25

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
दातव्यमिति यद्दानम्	17	20
दिवि सूर्यसहस्रस्य	11	12
दिव्यमाल्याम्बरधरम्	11	11
दुःखमित्येव यत्कर्म	18	8
दुःखेष्वनुद्विग्नमनाः	2	56
दूरेण ह्यवरं कर्म	2	49
दृष्ट्वा तु पाण्डवानीकं	1	2
दृष्ट्वेदं मानुषं रूपम्	11	51
देवद्विजगुरुप्राज्ञ	17	14
देवान्भावयतानेन	3	11
देहिनोऽस्मिन्यथा देहे	2	13
देही नित्यमवध्योऽयम्	2	30
दैवमेवापरे यज्ञम्	4	25
दैवी ह्येषा गुणमयी	7	14
दैवी संपद्विमोक्षाय	16	5
दोषैरेतैः कुलघ्नानाम्	1	43
द्यावापृथिव्योरिद	11	20
द्यूतं छलयतामस्मि	10	36
द्रव्ययज्ञास्तपोयज्ञाः	4	28
द्रुपदो द्रौपदेयाश्च	1	18
द्रोणं च भीष्मं च	11	34
द्वाविमौ पुरुषौ लोके	15	16
द्वौ भूतसर्गौ लोके	16	6

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
ध		
धर्मक्षेत्रे कुरुक्षेत्रे	1	1
धूमेनाव्रियते वह्निः	3	38
धूमो रात्रिस्तथा कृष्णः	8	25
धृत्या यया धारयते	18	33
धृष्टकेतुश्चेकितानः	1	5
ध्यानेनात्मनि पश्यन्ति	13	24
ध्यायतो विषयान्पुंसः	2	62
न		
न कर्तृत्वं न कर्माणि	5	14
न कर्मणामनारम्भात्	3	4
न काङ्क्षे विजयं कृष्ण	1	32
न च तस्मान्मनुष्येषु	18	69
न च मत्स्थानि	9	5
न च मां तानि कर्माणि	9	9
न चैतद्विद्मः कतरन्नो	2	6
न जायते म्रियते वा	2	20
न तदस्ति पृथिव्यां वा	18	40
स तद्भासयते सूर्यो	15	6
न तु मां शक्यसे द्रष्टुम्	11	8
न त्वेवाहं जातु नासम्	2	12
न द्वेष्ट्यकुशलं कर्म	18	10
न प्रहृष्येत्प्रियं प्राप्य	5	20
न बुद्धिभेदं जनयेत्	3	26
नभःस्पृशं दीप्तमनेक	11	24

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
नमः पुरस्तादथ पृष्ठ	11	40
न मां कर्माणि लिम्पन्ति	4	14
न मां दुष्कृतिनो मूढाः	7	15
न मे पार्थास्ति कर्तव्यम्	3	22
न मे विदुः सुरगणाः	10	2
न रूपमस्येह तथो	15	3
न वेदयज्ञाध्ययनैः	11	48
नष्टो मोहः स्मृतिर्लब्धा	18	73
न हि कश्चित्क्षणमपि	3	5
न हि देहभृता शक्यम्	18	11
न हि प्रपश्यामि	2	8
न हि ज्ञानेन सदृशम्	4	38
नात्यश्नतस्तु योगोऽस्ति	6	16
नादत्ते कस्यचित् पापम्	5	15
नान्तोऽस्ति मम दिव्या	10	40
नान्यं गुणेभ्यः कर्तारम्	14	19
नासतो विद्यते भावः	2	16
नास्ति बुद्धिरयुक्तस्य	2	66
नाहं प्रकाशः सर्वस्य	7	25
नाहं वेदैर्न तपसा	11	53
निमित्तानि च पश्यामि	1	31
नियतस्य तु संन्यासः	18	7
नियतं कुरुकर्मत्वं	3	8
नियतं सङ्गरहितम्	18	23

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
निराशीर्यतचित्तात्मा	4	21
निर्मानमोहा जितसङ्ग	15	5
निश्चयं शृणु मे तत्र	18	4
निहत्य धार्तराष्ट्रान्नः	1	36
नेहाभिक्रमनाशोऽस्ति	2	40
नैते सृती पार्थ जानन्	8	27
नैनं छिन्दन्ति शस्त्राणि	2	23
नैव किञ्चित् करोमीति	5	8
नैव तस्य कृतेनार्थो	3	18
प		
पञ्चैतानि महाबाहो	18	13
पत्रं पुष्पं फलं तोयम्	9	26
परस्तस्मात्तु भावोऽन्यो	8	20
परं ब्रह्म परं धाम	10	12
परं भूयः प्रवक्ष्यामि	14	1
परित्राणाय साधूनाम्	4	8
पवनः पवतामस्मि	10	31
पश्य मे पार्थ रूपाणि	11	5
पश्यादित्यान्वसून्	11	6
पश्यामि देवांस्तव देव	11	15
पश्यैतां पाण्डुपुत्राणाम्	1	3
पाञ्चजन्यं हृषीकेशो	1	15
पार्थ नैवेह नामुत्र	6	40

-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, K

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
पिताहमस्य जगतो	9	17
पिताऽसि लोकस्य चरा	11	43
पुण्यो गन्धः पृथिव्यां च	7	9
पुरुषः प्रकृतिस्थो हि	13	21
पुरुषः स परः पार्थ	8	22
पुरोधसां च मुख्यं माम्	10	24
पूर्वाभ्यासेन तेनैव	6	44
पृथक्त्वेन तु यज्ज्ञानम्	18	21
प्रकाशं च प्रवृत्तिं च	14	22
प्रकृतिं पुरुषं चैव	13	19
प्रकृतिं स्वामवष्टभ्य	9	8
प्रकृतेः क्रियमाणानि	3	27
प्रकृतेर्गुणसम्मूढाः	3	29
प्रकृत्यैव च कर्माणि	13	29
प्रजहाति यदा कामान्	2	55
प्रयत्नाद्यतमानस्तु	6	45
प्रयाणकाले मनसा	8	10
प्रलपन्विसृजन्गृह्णन्	5	9
प्रवृत्तिं च निवृत्तिं च	18	30
प्रवृत्तिं च निवृत्तिं च	16	7
प्रशान्तमनसं ह्येनम्	6	27
प्रशान्तात्मा विगतभीः	6	14
प्रसादे सर्वदुःखानाम्	2	65
प्रह्लादश्चास्मि दैत्यानां	10	30
प्राप्य पुण्यकृतां लोकान्	6	41

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
ब		
बन्धुरात्मात्मनस्तस्य	6	6
बलं बलवतामस्मि	7	11
बहिरन्तश्च भूतानाम्	13	15
बहूनां जन्मनामन्ते	7	19
बहूनि मे व्यतीतानि	4	5
ब्राह्मस्पर्शेष्वसक्तात्मा	5	21
बीजं मां सर्वभूतानाम्	7	10
बुद्धियुक्तो जहातीह	2	50
बुद्धिर्ज्ञानमसंमोह:	10	4
बुद्धेर्भेदं धृतेश्चैव	18	29
बुद्ध्या विशुद्धया युक्त:	18	51
बृहत्साम तथा सम्नाम्	10	35
ब्रह्मणो हि प्रतिष्ठाहं	14	27
ब्रह्मण्याधाय कर्माणि	5	10
ब्रह्मभूत: प्रसन्नात्मा	18	54
ब्रह्मार्पणं ब्रह्म हवि:	4	24
ब्राह्मणक्षत्रियविशाम्	18	41
भ		
भक्त्या त्वनन्यया शक्य	11	54
भक्त्या मामभिजानाति	18	55
भयाद्रणादुपरतम्	2	35
भवान्भीष्मश्च कर्णश्च	1	8
भवाप्ययौ हि भूतानाम्	11	2

SU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kere

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
भीष्मद्रोणप्रमुखतः	1	25
भूतग्रामः स एवायम्	8	19
भूमिरापोऽनलो वायुः	7	4
भूय एव महाबाहो	10	1
भोक्तारं यज्ञतपसाम्	5	29
भोगैश्वर्यप्रसक्तानाम्	2	44
म		
मच्चित्तः सर्वदुर्गाणि	18	58
मच्चित्ता मद्गतप्राणाः	10	9
मत्कर्मकृन्मत्परमो	11	55
मत्तः परतरं नान्यत्	7	7
मदनुग्रहाय परमम्	11	1
मनः प्रसादः सौम्यत्वम्	17	16
मनुष्याणां सहस्रेषु	7	3
मन्मना भव मद्भक्तो	9	34
मन्मना भव मद्भक्तो	18	65
मन्यसे यदि तच्छक्यम्	11	4
मम योनिर्महद्ब्रह्म	14	3
ममैवांशो जीवलोके	15	7
मया ततमिदं सर्वम्	9	4
मयाऽध्यक्षेण प्रकृतिः	9	10
मया प्रसन्नेन तवार्जुन	11	47
मयि चानन्ययोगेन	13	10
मयि सर्वाणि कर्माणि	3	30

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
मय्यावेश्य मनो ये माम्	12	2
मय्यासक्तमनाः पार्थ	7	1
मय्येव मन आधत्स्व	12	8
महर्षयः सप्त पूर्वे	10	6
महर्षीणां भृगुरहम्	10	25
महात्मानस्तु मां पार्थ	9	13
महाभूतान्यहंकारो	13	5
मा ते व्यथा मा च	11	49
मात्रास्पर्शास्तु कौन्तेय	2	14
मानापमानयोस्तुल्यः	14	25
मामुपेत्य पुनर्जन्म	8	15
मां च योऽव्यभिचारेण	14	26
मां हि पार्थ व्यपाश्रित्य	9	32
मुक्तसङ्गोऽनहंवादी	18	26
मूढग्राहेणात्मनो यत्	17	19
मृत्युः सर्वहरश्चाहम्	10	34
मोघाशा मोघकर्माणो	9	12
य		
य इदं परमं गुह्यम्	18	68
य एनं वेत्ति हन्तारम्	2	19
य एवं वेत्ति पुरुषम्	13	23
यच्चापि सर्वभूतानाम्	10	39
यच्चावहासार्थमस	11	42
यजन्ते सात्त्विका देवा	17	4

SU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kere

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
यज्ज्ञात्वा न पुनर्मोहम्	4	35
यज्ञदानतप:कर्म	18	5
यज्ञशिष्टामृतभुजो	4	31
यज्ञशिष्टाशिन: सन्तो	3	13
यज्ञार्थात्कर्मणोऽन्यत्र	3	9
यज्ञे तपसि दाने च	17	27
यततो ह्यपि कौन्तेय	2	60
यतन्तो योगिनश्चैनम्	15	11
यत: प्रवृत्तिर्भूतानाम्	18	46
यतेन्द्रियमनोबुद्धि:	5	28
यतो यतो निश्चरति	6	26
यत्करोषि यदश्नासि	9	27
यत्तदग्रे विषमिव	18	37
यत्तु कामेप्सुना कर्म	18	24
यत्तु कृत्स्नवदेकस्मिन्	18	22
यत्तु प्रत्युपकारार्थम्	17	21
यत्रकाले त्वनावृत्तिम्	8	23
यत्र योगेश्वर: कृष्णो	18	78
यत्रोपरमते चित्तम्	6	20
यत्सांख्यै: प्राप्यते	5	5
यथाकाशस्थितो नित्यम्	9	6
यथा दीपो निवातस्थो	6	19
यथा नदीनां बहवो	11	28
यथा प्राकशयत्येक:	13	33

U-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
यथा प्रदीप्तं ज्वलनम्	11	29
यथा सर्वगतं सौक्ष्म्यात्	13	32
यथैधांसि समिद्धोऽग्निः	4	37
यदग्रे चानुबन्धे च	18	39
यदहंकारमाश्रित्य	18	59
यदक्षरंवेदविदो	8	11
यदा ते मोहकलिलम्	2	25
यदादित्यगतं तेजो	15	12
यदा भूतपृथग्भावम्	13	30
यदा यदा हि धर्मस्य	4	7
यदा विनियतं चित्तम्	6	18
यदा सत्त्वे प्रवृद्धे तु	14	14
यदा संहरते चायम्	2	58
यदा हि नेन्द्रियार्थेषु	6	4
यदि मामप्रतीकारम्	1	46
यदि ह्यहं न वर्तेय	3	23
यदृच्छया चोपपन्नम्	2	32
यदृच्छालाभसंतुष्टो	4	22
यद्यदाचरति श्रेष्ठः	3	21
यद्यद्विभूतिमत्सत्त्वम्	10	41
यद्यप्येते न पश्यन्ति	1	38
यया तु धर्मकामार्थान्	18	34
यया धर्ममधर्मं च	18	31
यया स्वप्नं भयं शोकम्	18	35

SU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kere

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
यस्त्वात्मरतिरेव	3	17
यस्त्विन्द्रियाणि मनसा	3	7
यस्मात्क्षरमतीतोऽहम्	15	18
यस्मान्नोद्विजते लोको	12	15
यस्य नाहंकृतो भावो	18	17
यस्य सर्वे समारम्भाः	4	19
यं यं वाऽपि स्मरन्भावम्	8	6
यं लब्ध्वा चापरं लाभम्	6	22
यं सन्न्यासमिति प्राहुः	6	2
यं हि न व्यथयन्त्येते	2	15
यः शास्त्रविधिमुत्सृज्य	16	23
यः सर्वत्रानभिस्नेहः	2	57
यातयामं गतरसम्	17	10
या निशा सर्वभूतानाम्	2	69
यान्ति देवव्रता देवान्	9	25
यामिमां पुष्पितां वाचम्	2	42
यावत्संजायते किञ्चित्	13	26
यावदेतान्निरीक्षेऽहम्	1	22
यावानर्थ उदपाने	2	46
युक्तः कर्मफलं त्यक्त्वा	5	12
युक्ताहारविहारस्य	6	17
युञ्जन्नेवं सदात्मानम्	6	15
युञ्जन्नेवं सदात्मानम्	6	28
युधामन्युश्च विक्रान्तः	1	6

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
ये चैव सात्त्विका भावा:	7	12
ये तु धर्म्यामृतमिदम्	12	20
ये तु सर्वाणि कर्माणि	12	6
ये त्वक्षरमनिर्देश्यम्	12	3
ये त्वेतदभ्यसूयन्त:	3	32
येऽप्यन्यदेवताभक्ता:	9	23
ये मे मतमिदं नित्यम्	3	31
ये यथा मां प्रपद्यन्ते	4	11
ये शास्त्रविधिमुत्सृज्य	17	1
येषामर्थे काङ्क्षितं नो	1	33
येषां त्वन्तगतं पापम्	7	28
ये हि संस्पर्शजा भोगा:	5	22
योगयुक्तो विशुद्धात्मा	5	7
योगसन्न्यस्तकर्माणम्	4	41
योगस्थ: कुरु कर्माणि	2	48
योगिनामपि सर्वेषाम्	6	47
योगी युञ्जीत सततम्	6	10
योत्स्यमानानवेक्षेऽहम्	1	23
यो न हृष्यति न द्वेष्टि	12	17
योऽन्त:सुखोऽन्तराराम:	5	24
यो मामेजगनादिं च	10	3
यो मामेवमरांमूढो	15	19
यो मां पश्यति सर्वत्र	6	30
यो यो यां यां तनुं भक्त:	7	21
योऽयं योगस्त्वया प्रोक्त:	6	33

SU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kere

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
र		
रजस्तमश्चाभिभूय	14	10
रजसि प्रलयं गत्वा	14	15
रजो रागात्मकं विद्धि	14	7
रसोऽहमप्सु कौन्तेय	7	8
रागद्वेषवियुक्तैस्तु	2	64
रागी कर्मफलप्रेप्सुः	18	27
राजन् संस्मृत्य संस्मृत्य	18	76
राजविद्या राजगुह्यम्	9	2
रुद्राणां शंकरश्चास्मि	10	23
रुद्रादित्या वसवो ये च	11	22
रूपं महत्ते बहुवक्त्र	11	23
ल		
लभन्ते ब्रह्मनिर्वाणम्	5	25
लेलिह्यसे ग्रसमानः	11	30
लोकेऽस्मिन्द्विविधा	3	3
लोभः प्रवृत्ति	14	12
व		
वक्तुमर्हस्यशेषेण	10	16
वक्त्राणि ते त्वरमाणा	11	27
वायुर्यमोऽग्निर्वरुणः	11	39
वासांसि जीर्णानि यथा	2	22
विद्याविनयसंपन्ने	5	18
विधिहीनमसृष्टान्नम्	17	13

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
विविक्तसेवी लघ्वाशी	18	52
विषया विनिवर्तन्ते	2	59
विषयेन्द्रियसंयोगात्	18	38
विस्तरेणात्मनो योगम्	10	18
विहाय कामान्यः	2	71
वीतरागभयक्रोधाः	4	10
वृष्णीनां वासुदेवोऽस्मि	10	37
वेदानां सामवेदोऽस्मि	10	22
वेदाविनाशिनं नित्यम्	2	21
वेदाहं समतीतानि	7	26
वेदेषु यज्ञेषु तपःसु	8	28
व्यवसायात्मिका बुद्धिः	2	41
व्यामिश्रेणेव वाक्येन	3	2
व्यासप्रसादाच्छ्रुतवान्	18	75

श

शक्नोतीहैव यः सोढुम्	5	23
शनैः शनैरुपरमेत्	6	25
शमो दमस्तपः शौचम्	18	42
शरीरं यदवाप्नोति	15	8
शरीरवाङ्मनोभिर्यत्	18	15
शुक्लकृष्णे गती ह्येते	8	26
शुचौ देशे प्रतिष्ठाप्य	6	11
शुभाशुभफलैरेवम्	9	28
शौर्यं तेजो धृतिर्दाक्ष्यम्	18	43
श्रद्धया परया तप्तम्	17	17
श्रद्धावाननसूयश्च	18	71

SU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerala

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
श्रद्धावांल्लभते ज्ञानम्	4	39
श्रुतिविप्रतिपन्ना ते	2	53
श्रेयान्द्रव्यमयाद्यज्ञात्	4	33
श्रेयान्स्वधर्मो विगुण:	3	35
श्रेयान्स्वधर्मो विगुण:	18	47
श्रेयो हि ज्ञानमभ्या	12	12
श्रोत्रादीनीन्द्रियाण्यन्ये	4	26
श्रोत्रं चक्षु: स्पर्शनं च	15	9
श्वशुरान्सुहृदश्चैव	1	27

स

	Ch.	V
स एवायं मया तेऽद्य	4	3
सक्ता: कर्मण्यविद्वांस:	3	25
सखेति मत्वा प्रसभम्	11	41
स घोषो धार्तराष्ट्राणाम्	1	19
सततं कीर्तयन्तो माम्	9	14
स तया श्रद्धया युक्त:	7	22
सत्कारमानपूजार्थम्	17	18
सत्त्वं रजस्तम इति	14	5
सत्त्वं सुखे संजयति	14	9
सत्त्वात्संजायते ज्ञानम्	14	17
सत्त्वानुरूपा सर्वस्य	17	3
सदृशं चेष्टते स्वस्या:	3	33
सद्भावे साधुभावे च	17	26
समदु:खसुख: स्वस्थ:	14	24
समं कायशिरोग्रीवम्	6	13
समं पश्यन्हि सर्वत्र	13	28

J-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Ke

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

	Ch.	V
समं सर्वेषु भूतेषु	13	27
समः शत्रौ च मित्रे च	12	18
समोऽहं सर्वभूतेषु	9	29
सर्गाणमादिरन्तश्च	10	32
सर्वकर्माणि मनसा	5	13
सर्वकर्माण्यपि सदा	18	56
सर्वगुह्यतमं भूयः	18	64
सर्वतः पाणिपादं तत्	13	13
सर्वद्वाराणि संयम्य	8	12
सर्वद्वारेषु देहेऽस्मिन्	14	11
सर्वधर्मान्परित्यज्य	18	66
सर्वभूतस्थमात्मानं	6	29
सर्वभूतस्थितं यो माम्	6	31
सर्वभूतानि कौन्तेय	9	7
सर्वभूतेषु येनैकम्	18	20
सर्वमेतदृतं मन्ये	10	14
सर्वयोनिषु कौन्तेय	14	4
सर्वस्य चाहं हृदि	15	15
सर्वानीन्द्रियकर्माणि	4	27
सर्वेन्द्रियगुणाभासम्	13	14
सहजं कर्म कौन्तेय	18	48
सहयज्ञाः प्रजाः सृष्ट्वा	3	10
सहस्रयुगपर्यन्तम्	8	17
संकरो नरकायैव	1	42
संकल्पप्रभवान्कामान्	6	24
संतुष्टः सततं योगी	12	14

SU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerala

CC-0. In Public Domain. Digitization by eGangotri. Funding MID

Puranattukara
Acc.No. 38988
Acc.Date 2-4-25

	Ch.	V
संनियम्येन्द्रियग्रामम्	12	4
सन्यासस्तु महाबाहो	5	6
सन्यासस्य महाबाहो	18	1
संन्यासं कर्मणाम्	5	1
सन्यासः कर्मयोगश्च	5	2
साधिभूताधिदैवं माम्	7	30
सांख्ययोगौ पृथग्बालाः	5	4
सिद्धिं प्राप्तो यथा	18	50
सीदन्ति मम गात्राणि	1	29
सुखदुःखे समे कृत्वा	2	38
सुखमात्यन्तिकं यत्तत्	6	21
सुखं त्विदानीं त्रिविधम्	18	36
सुदुर्दर्शमिदं रूपम्	11	52
सुहृन्मित्रार्युदासीन	6	9
स्थाने हृषीकेश तव	11	36
स्थितप्रज्ञस्य का भाषा	2	54
स्पर्शान्कृत्वा बहिर्बाह्यान्	5	27
स्वधर्ममपि चावेक्ष्य	2	31
स्वभावजेन कौन्तेय	18	60
स्वयमेवात्मनात्मानम्	10	15
स्वे स्वे कर्मण्यभिरतः	18	45

ह

हतो वा प्राप्स्यसि	2	37
हन्त ते कथयिष्यामि	10	19
हृषीकेशं तदा वाक्यम्	1	21

Central Sanskrit University, Ministry of Education
Puranattukara P.O.
Thrissur-680551
LIBRARY
Guruvayoor Campus Library

* * * *

Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

SU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kere

CC-0. In Public Domain. Digitization by eGangotri. Funding MID
uruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



CSUGCKL
R66,6 1
38988
Acc.No: 38988

SU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kere